ఇందు శ్రీకామాక్షీ దేవియొక్క ఎల్లలు, క్షేత్రాంగి యను దుర్గాలయము మొదలు శ్వేతదేవుని ఆలయము వరకనియు, ఆ ఎల్లలో ముఖ్యమైన దుర్గాలయము ఆరనియు, విష్ణ్వాలయము నాలుగనియు, శివాలయము ఐదనియు, తీర్థము నాలుగనియు, ఆ కామాక్షీ దేవియొక్క ఆలయములో అన్నపూర్ణ ఆలయము, శాస్త్రాలయము, అంజన కామాక్షీ సన్నిధి, సంతాన స్తంభము అనునవి గలవనియు, వీని వృత్తాంతములు ఇట్లున్నవనియు తెలుపబడియున్నది.



పదునొకండవ అధ్యాయము—

ఇది శ్రీకామాక్షీదేవి ఆలయములో పరాశక్తి యుండు మంటపము గాయత్రీ మంటపమనియు, దానికి ఆధారము మహాబిలమనియు, ఆ మహాబిలమునకున్న మహిమచే వచ్చిన నామ వివరణ ఇది యనియు, అందులో కామకోటి, కామకోష్టము అను రెండు నామములకుగల విశేషము లివి యనియు, తర్వాత బంధకాసురుని ఉపద్రవ మిది యనియు, ఆ అసురుని ఉపద్రవమునకు భయపడి వచ్చిన దేవతలకు ఆ మహా బిల ప్రభావము విశదీకరించిన విధమిది యనియు, ఆ బిల ప్రదక్షిణ మహిమము లివి యనియు తెలుపునది.

పండ్రెండవ అధ్యాయము—

కామకోటి పీఠమున ఆసీనయైయుండు శ్రీ త్రిపురసుందరి వర్ణనను, దేవతలకు హింసావృత్తికిగాను బిలమునుండి దేవి వెలువడి లోకమును భస్మముచేసి త్రిమూర్తులను రప్పించిన వెనుక అంతర్ధానమైనదియు, తర్వాత ఆ దేవి బంధకాసుర ప్రేతముతో వెలువడినదియు, వెలువడి ఆ బంధకుని పూడ్చి తనకు ఆలయము కట్టి తన్ను ప్రతిష్ఠింప జేసి, దర్శించు విధానమును దేవతలకు జెప్పినదనియు, వారు తన్ను దర్శించినతోడనే వారికి తన చరితను చెప్పినదనియు, దేవి బోధించిన ప్రకారము ఆ దేవతలు పూజించినదియు, నాలుగు యుగములలో పరాశక్తిని పూజించినది వీరనియు తెలుపునది.

పదమూడవ అధ్యాయము—

బంధకాసురుని పూర్వ మొదలినపుడు, ఆ పల్లమున తప మొనర్చిన అసురుని శ్రీహరి హతమార్చు కాలమున, అసుర కూటము వెల్లువలుగరాగా, వాని నంతముసేయ రెండు శివభూతములు ప్రత్యక్షమై, వానిని హతమొనర్చి, శ్రీహరితో యుద్ధము చేసి, ఓడిపోగా, శ్రీహరి నిలిచెను, కూరుచుండెను పండుకొనెను అను మూడు విధములుగ నుండినదియు, త్రివిధ స్వరూపమైన శ్రీహరి శివభూతములను హింసించినది శివాపరాధమని యెంచి అది

పోవుటకు శివుని ధ్యానింప, వారి అనుగ్రహముచే పంచతీర్థమువచ్చి వారి అపరాధమును పోగొట్టినదనియు, తర్వాత ఆ రెండు భూతములను ఆ తీర్థమునకు కావలిగా నియమించి వానికి ఆహార తృప్తి నొనర్చి, శ్రీహరిని అచట నొక క్షేత్రముగ మార్పజేసినదియు తెలుపునది.

పదునాల్గవ అధ్యాయము—

శ్రీ ఏకామ్రనాథునికి వల్లభిగానుండిన కామాక్షీ దేవి బ్రహ్మ యొక్క కోరికచే స్వర్ణ విగ్రహముగ నియమింపబడిన కారణమును ఆ అంబికా సౌందర్యమును, ఈ కాంచీ క్షేత్రములలో దేవి లేని కారణమును, పరమశివుని ముఖనేత్రముచే మండిన మన్మథుడు, కామాక్షీ దేవి యొద్ద వరముపొంది, కోటి మన్మథులుగ తరలి రుద్రకోట్లను ఓడించినదియు, మన్మథకోటి ఆసన్నమగు కాలమున భూలోకమున నున్న సకల శివక్షేత్రములలో శక్తి స్వరూపమైన అంబికా విగ్రహములన్నియు అంతర్ధానమైనందువల్ల బ్రహ్మచే ప్రతిష్ఠింపబడిన కారణమును, బ్రహ్మను గూర్చి స్వర్ణ కామాక్షీ దేవికి ఏకామ్రేశ్వరునికి కల్యాణము గావింపబడు విధానమును, పరాశక్తిని రుద్రయామళ తంత్ర ప్రకారము జేయవలసిన పూజా విధానములను చెప్పినదనియు, బ్రహ్మ తనకు శ్రీచక్ర స్థానమును త్రొక్కినందుచే కల్గిన కనుగ్రుడ్డిని పోగొట్టుకొన్న విధమును, తరువాత పరాశక్తిని పూజించినవారి చరితములను తెలుపునది.

|| ಶ್ರೀ ಮಹಾತ್ರಿಪುರಸುಂದರ್ಯೈ ನಮಃ ||

|| ಶ್ರೀ ಗುರು ಕಾಮಾಕ್ಷೀ ದೇವ್ಯೈ ನಮಃ ||

# ಶ್ರೀ ಕಾಮಾಕ್ಷೀ ವಿಲಾಸ ಸಾರಸಂಗ್ರಹ

## ಮೊದಲನೆಯ ಅಧ್ಯಾಯ

ಪರಾಶಕ್ತಿ ಅನೇಕವಿಧವಾದ ಬಿಲರೂಪವಾಗಿಯೂ. ಯಂತ್ರರೂಪವಾಗಿಯೂ, ಬಿಂಬರೂಪವಾಗಿಯೂ ಮತ್ತು ಹಲವು ರೂಪಗಳಲ್ಲಿಯೂ ಪ್ರಕಟವಾಗಿ ತನ್ನ ಮಹಿಮೆಯನ್ನು ಪ್ರದರ್ಶಿಸಲು ಆರಿಸಿರುವ ಕ್ಷೇತ್ರಗಳು ಹಲವಿವೆ. ಅವುಗಳಲ್ಲಿ, ಪರಾಶಕ್ತಿ ಬಿಲಯಂತ್ರಬಿಂಬರೂಪವಾಗಿರುವ ಅಸಾಧಾರಣಮಹಿಮೆಯನ್ನು, ಶಿವಸ್ವರೂಪವಾಗಿ ಕಾಣಿಸುವ ಅದ್ಭುತ ದೃಶ್ಯವನ್ನೂ. ಮತ್ತು ವಿಷ್ಣುಸ್ವರೂಪವಾಗಿರುವ ಮೋಹಕ ದೃಶ್ಯವನ್ನೂ ತೋರಿಸುವ ಪವಿತ್ರ ಕ್ಷೇತ್ರ, ಕಾಂಚೀನಗರ. ಆದ್ದರಿಂದ ಶ್ರೀಕಾಂಚೀಪುರಕ್ಕೆ ವಿಶೇಷ ಮಹಿಮೆ ಉಂಟು ಎಂದು ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ಪರಾಶಕ್ತಿ, "ಶಿವಕಾಮೇಶ್ವರಾಂಕಸ್ಥಾ ಶಿವಸ್ವಾಧೀನವಲ್ಲಭಾ" ಎಂದು ನಾಮಗಳನ್ನು ಪಡೆದಿರುವುದರಿಂದ, ಜ್ಯೋತಿರ್ಲಿಂಗ–ಶಕ್ತಿಸ್ವರೂಪಿಣಿಯಾಗಿಯೂ, "ವಿಷ್ಣುರೂಪಿಣೀ, ವಿಷ್ಣುಮಾಯಾ ವಿಲಾಸಿನೀ"ಎಂಬ ನಾಮಗಳನ್ನು ಪಡೆದಿರುವುದರಿಂದ ವರದರಾಜಮೂರ್ತಿಯಾಗಿಯೂ ಇದ್ದಾಳೆ; ಮುಕ್ತಾತ್ಮರಿಗೆ ಸರ್ವಮಂತ್ರ, ಸರ್ವಜ್ಞಾನ ಸಿದ್ಧಿ ದೊರೆಯುವುದಕ್ಕಾಗಿ ಆಕೆ ಜ್ಯೋತಿರ್ಲಿಂಗ ಶಕ್ತಿಸ್ವರೂಪಿಣಿಯಾಗಿಯೂ, ಬದ್ಧಾತ್ಮರಿಗೆ ಮಾಯಾವಿಲಾಸರೂಪವಾದ ಇಷ್ಟಕಾಮ್ಯ ಭೋಗಸಿದ್ಧಿ ದೊರೆಯುವುದಕ್ಕಾಗಿ ವರದರಾಜಮೂರ್ತಿಯಾಗಿಯೂ ಇದ್ದಾಳೆ ಎಂಬ ಅಂಶವೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ವಿವರಿಸಲ್ಪಟ್ಟಿದೆ.

ಇದಲ್ಲದೆ, ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಕಾಂಚಿಯ ಮೊದಲನೆಯ ಆವರಣಕ್ಕೆ ಎಲ್ಲೆಯಾಗಿ ಪೂರ್ವದಲ್ಲಿ ಸಮುದ್ರ, ದಕ್ಷಿಣದಲ್ಲಿ ದಕ್ಷಿಣಪಿನಾಕಿನಿ, ಪಶ್ಚಿಮದಲ್ಲಿ ಶಿಲಾಹ್ರದ, ಉತ್ತರದಲ್ಲಿ ಸ್ವಾಮಿಪುಷ್ಕರಿಣಿ ಇದೆ ಎಂದೂ, ಎರಡನೆಯ ಆವರಣಕ್ಕೆ ಎಲ್ಲೆಯಾಗಿ ಪೂರ್ವದಲ್ಲಿ ಮಹಾಬಲಿಪುರ, ದಕ್ಷಿಣದಲ್ಲಿ ದೇವಗಿರಿ, ಪಶ್ಚಿಮದಲ್ಲಿ ವಿರಿಂಚಿಪುರ, ಉತ್ತರದಲ್ಲಿ ನಾಗಲಾಪುರ ಇದೆ ಎಂದೂ, ಮೂರನೆಯ ಆವರಣದ ಎಲ್ಲೆಯಾಗಿ ಪೂರ್ವದಲ್ಲಿ ತ್ರಿವೇಣೀ ಸಂಗಮ ನಗರ, ದಕ್ಷಿಣದಲ್ಲಿ ವ್ಯಾಘ್ರಪುರ, ಪಶ್ಚಿಮದಲ್ಲಿ ಕ್ಷೀರಾಬ್ಧಿಪುರ, ಉತ್ತರದಲ್ಲಿ ನಂದಿಗಂಗಾಪುರ ಇದೆ ಎಂದೂ ಹೇಳಲಾಗಿದೆ. ಹೀಗೆ ಕಾಂಚಿಯ ಮೂರು

ಆವರಣಗಳನ್ನು ವರ್ಣಿಸಿ, ಸತ್ಯವ್ರತ ಕ್ಷೇತ್ರ ಮುಂತಾದ ಒಂಭತ್ತು ನಾಮಗಳನ್ನು ವಿವರಿಸಲಾಗಿದೆ 'ಪಾಲಾರು' ಎಂಬ ನದಿಯ ವೃತ್ತಾಂತವೂ ಇಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ಪರಾಶಕ್ತಿಯತ್ರಿವಿಧ ಸ್ವರೂಪವನ್ನೂ ಆಯಾಯಾ ರೂಪದ ವೃತ್ತಾಂತವನ್ನೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಪ್ರತಿಪಾದಿಸಿದ್ದಾರೆ.

## ಎರಡನೆಯ ಅಧ್ಯಾಯ

ಈ ಅಧ್ಯಾಯದಲ್ಲಿ, ವರದರಾಜಸ್ವಾಮಿಯ ಕ್ಷೇತ್ರದ ಎಲ್ಲೆ ಕ್ಷೇತ್ರಾಂಗಿ ಎಂಬ ದುರ್ಗಾಲಯದಿಂದ ಆರಂಭಿಸಿ ನರಸಿಂಹಸ್ವಾಮಿ ಆಲಯದವರೆಗೆ ಎಂದು ಹೇಳಿದ್ದಾರೆ. ಈ ಎಲ್ಲೆಯೊಳಗೆ ಮುಖ್ಯವಾದ ದುರ್ಗಾಲಯಗಳು ನಾಲ್ಕು, ಶಿವಾಲಯಗಳು ಮೂರು, ವಿಷ್ಣು ಆಲಯಗಳು ಎಂಟು. ಮುದ್ರೆಗಳು ಐದು, ಮತ್ತು ತೀರ್ಥಗಳು ನಾಲ್ಕು ಎಂದು ಪ್ರತಿಪಾದಿಸಲಾಗಿದೆ. ಇವೆಲ್ಲದರ ವೃತ್ತಾಂತವನ್ನು ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ನಿರೂಪಿಸಿದ್ದಾರೆ.

## ಮೂರನೆಯ ಅಧ್ಯಾಯ

ಲಕ್ಷ್ಮೀದೇವಿಯೂ ಸರಸ್ವತಿಯೂ ತನಗೇ ಮಹಿಮೆ ಹೆಚ್ಚೆಂದು ಸ್ಪರ್ಧೆ ಹೂಡಿ, ತಮಗೆ ಸಾರ್ಥಕವಾಗಿ ತೀರ್ಪು ಕೊಡಬಹುದೆಂದು ಇಂದ್ರನನ್ನು ಕೇಳಲು, ಆಗ ಸರಸ್ವತಿಯ ಶಾಪದಿಂದ ಇಂದ್ರ 'ಹಸ್ತಿಗಿರಿ'ಯ ರೂಪವನ್ನು ಪಡೆದನೆಂಬ ಕಥೆ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ಈ ಹಸ್ತಿಗಿರಿಯಮೇಲೆ ವರದರಾಜಸ್ವಾಮಿಯ ಸನ್ನಿಧಿ ಇದೆ. ಈ ಹಸ್ತಿಗಿರಿಯಲ್ಲಿ ನರಸಿಂಹಸ್ವಾಮಿ 'ಗುಹಾನರಸಿಂಹ' ನಾಗಿ ಕಾಣಿಸಲು ಕಾರಣವೇನೆಂಬುದನ್ನೂ, ವರದರಾಜಸ್ವಾಮಿ ಸನ್ನಿಧಿಯ ಹಿಂಭಾಗದಲ್ಲಿ ಎರಡು ಹಲ್ಲಿಗಳು ಇರುವ ಕಾರಣವನ್ನೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ನಿರೂಪಿಸಿದ್ದಾರೆ.

## ನಾಲ್ಕನೆಯ ಅಧ್ಯಾಯ

ಹಸ್ತಿಗಿರಿಯಲ್ಲಿ ಶ್ರೀಮಹಾವಿಷ್ಣು ವರದರಾಜಮೂರ್ತಿಯಾಗಿ ಆವಿರ್ಭವಿಸಿರುವುದು ಬ್ರಹ್ಮದೇವನಿಗೆ ಸೃಷ್ಟಿದಂಡವನ್ನು ಕೊಡವುದಕ್ಕಾಗಿ ಎಂದು ಇಲ್ಲಿ ಹೇಳಲಾಗಿದೆ. ಸೃಷ್ಟಿದಂಡವನ್ನು ಪಡೆಯಲು ಬ್ರಹ್ಮದೇವನು ಆರಂಭಿಸಿದ ಯಾಗವನ್ನು ನಾಶಪಡಿಸುವ ಸಲುವಾಗಿ ಸರಸ್ವತೀದೇವಿ ವೇಗವತೀನದಿಯ ರೂಪದಲ್ಲಿ ಬಂದಳೆಂದೂ, ಆ ನದಿಯಿಂದ ಯಾಗಕ್ಕೆ ಯಾವ ವಿಘ್ನವೂ ಉಂಟಾಗದಂತೆ ವರದರಾಜಸ್ವಾಮಿ ರಕ್ಷಿಸಿದನೆಂದೂ,ವರದರಾಜಸ್ವಾಮಿಗೆ ಈ ಹಸ್ತಿಗಿರಿಯ ಮೇಲೆ ವೈಕುಂಠವೇ ಮುಂತಾದ ಇತರ ಸ್ಥಾನಗಳಿಗಿಂತ ಹೆಚ್ಚಾಗಿ ಪ್ರೇಮವುಂಟಾಗಲು ಕಾರಣವಿದೆಯೆಂದೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ವಿಸ್ತಾರವಾಗಿ ವರ್ಣಿಸಿದ್ದಾರೆ.



## ಐದನೆಯ ಅಧ್ಯಾಯ

ವೇಗವತೀನದಿಯ ರೂಪದಲ್ಲಿ ಬಂದ ಸರಸ್ವತೀದೇವಿಗೆ ಶ್ರೀಮಹಾವಿಷ್ಣುವಿನಿಂದ ಉಂಟಾದ ಪರಿಭವವನ್ನೂ. ಶ್ರೀಮಹಾವಿಷ್ಣುವೇ ಮತ್ತೆ ಆಕೆಯ ಪರಿಭವವನ್ನು ನಿವಾರಣೆ ಮಾಡಿದುದನ್ನೂ, ಅನಂತರ ಸರಸ್ವತೀದೇವಿ ಬ್ರಹ್ಮದೇವನ ಜೊತೆ ಪ್ರೇಮದಿಂದ ಕೂಡಿ ಹರ್ಷದಿಂದ ಇದ್ದುದನ್ನೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ.

## ಆರನೆಯ ಅಧ್ಯಾಯ

ಏಕಾಂಬರನಾಥಸ್ವಾಮಿಯ ಎಲ್ಲೆ ಗಯಾರೋಹಣೇಶ್ವರ ಆಲಯದಿಂದ ಆರಂಭಿಸಿ ಶ್ವೇತಪ್ಪೆರುಮಾಳ್ ಆಲಯದ ವರೆಗೆ ಎಂದೂ, ಆ ಎಲ್ಲೆಯೊಳಗೆ ಮುಖ್ಯವಾದ ದುರ್ಗಾಲಯಗಳು ನಾಲ್ಕು. ಶಿವಾಲಯಗಳು ಎಂಟು, ವಿಷ್ಣು ಆಲಯಗಳು ಎಂಟು, ಮುದ್ರೆಗಳು ಐದು, ತೀರ್ಥಗಳು ನಾಲ್ಕು ಎಂದೂ ಅಧ್ಯಾಯದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ. ಇವೆಲ್ಲದರ ವೃತ್ತಾಂತವನ್ನೂ ನಿರೂಪಿಸಿದ್ದಾರೆ.

## ಏಳನೆಯ ಅಧ್ಯಾಯ

ಏಕಾಂಬರನಾಥಸ್ವಾಮಿ ವಾಸವಾಗಿರುವ ಮಾವಿನಮರದ ಸ್ವರೂಪ, ಒಂದು ಪ್ರಳಯಕಾಲದಲ್ಲಿ ಮಾರ್ಕಂಡೇಯನಿಗಾಗಿ ಈ ಮಾವಿನಮರ ಬೆಳೆದು, ಮಾರ್ಕಂಡೇಯನನ್ನು ರಕ್ಷಿಸಿ ಕಾಂಚಿಯಲ್ಲಿ ಅವನನ್ನು ಬಾಳಿಸಿದ ರೀತಿ ಮತ್ತು ಮಾವಿನಹಣ್ಣಿನ ಮಹಿಮೆ ಈ ಅಂಶಗಳನ್ನು ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಪ್ರತಿಪಾದಿಸಿದ್ದಾರೆ.

## ಎಂಟನೆಯ ಅಧ್ಯಾಯ

ಏಳನೆಯ ಅಧ್ಯಾಯದಲ್ಲಿ ಹೇಳಿದ ಮಾವಿನಮರದ ಬುಡದಲ್ಲಿರುವ ಜ್ಯೋತೀ-ರ್ಲಿಂಗೇಶ್ವರನ ಸ್ವರೂಪವನ್ನೂ, ಆ ಜ್ಯೋತಿರ್ಲಿಂಗೇಶ್ವರನ ಆಲಿಂಗನಕ್ಕಾಗಿ ಉಮಾದೇವಿ ಕೈಲಾಸವನ್ನು ಬಿಟ್ಟು ಬಂದ ಕಾರಣವನ್ನೂ, ಕೈಲಾಸದಿಂದ ಹೊರಟ ಉಮಾದೇವಿ ಬದರಿಕಾಶ್ರಮಕ್ಕೆ ಬಂದು ಸೇರಿದುದನ್ನೂ, ಆ ಆಶ್ರಮದಲ್ಲಿದ್ದ ಕಾತ್ಯಾಯನ ಮಹರ್ಷಿ ಅಂಬಿಕೆಗೆ ಯೋಗದಂಡ ಮುಂತಾದುದನ್ನು ಕೊಟ್ಟ ವೃತ್ತಾಂತವನ್ನೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ನಿರೂಪಿಸಿದ್ದಾರೆ. ಯೋಗದಂಡಾದಿಗಳನ್ನು ಪಡೆದ ಅಂಬಿಕೆ ಕಾಶಿಗೆ ಬಂದು ಅಲ್ಲಿ ಎಲ್ಲರಿಗೂ ದುಃಖಕ್ಕೆ ಕಾರಣವಾಗಿದ್ದ ದ್ವಾದಶ ವರ್ಷ ಕ್ಷಾಮವನ್ನು ಕೊನೆಗಾಣಿಸಿದಳು. ಕಾಂಚಿಗೆ ಬಂದಾಗ ಯೋಗದಂಡ ಮುಂತಾದ ಸಾಮುಗ್ರಿಯೆಲ್ಲವೂ ಶಿವಪೂಜೆಗೆ ಉಪಯುಕ್ತವಾದ ಶಿವಲಿಂಗ ಮುಂತಾದ ರೂಪದಲ್ಲಿ ಮಾರ್ಪಟ್ಟಿತು. ಅಂಬಿಕೆ ಕಾಂಚಿಯಲ್ಲಿ ಕಠೋರ ತಪವನ್ನಾಚರಿಸುತ್ತಿ-

ರಲು ಶಿವನ ಮಹಿಮೆಯಿಂದ ಗಂಗೆಯೇ ಕಂಪಾನದಿಯಾಗಿ ಹರಿದು ಬಂದಳು. ಆ ಪ್ರವಾಹವನ್ನು ಉಮಾದೇವಿ ಪ್ರಲಯಬಂಧನಿಯ ನೆರವಿನಿಂದ ತಡೆಗಟ್ಟಿದಳು. ಮತ್ತೆ ಶಿವನ ಪ್ರಭಾವದಿಂದ ಪ್ರಲಯಬಂಧಿನಿಯ ಕಪಾಲದಲ್ಲಡಗಿದ್ದ ಪ್ರವಾಹ ಹರಿದು ಹೊರಬರಲು, ಆ ಪ್ರವಾಹವನ್ನು ಕಂಡು ಕಾಮಾಕ್ಷಿದೇವಿ ಏಕಾಂಬರನಾಥನನ್ನು ಆಲಿಂಗಿಸಿಕೊಂಡಳು. ಆಲಿಂಗನ ಮಾಡಿದ ಕೂಡಲೆ ಶಿವನು ದರ್ಶನಲಾಭವನ್ನನುಗ್ರಹಿಸಿ ಕಾಮಾಕ್ಷಿಯನ್ನು ಮದುವೆಯಾಗಿ ಎಲ್ಲರಿಗೂ ಅನುಗ್ರಹ ಮಾಡಿದನು. ಈ ಕಥೆ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ನಿರೂಪಿತವಾಗಿದೆ.

## ಒಂಭತ್ತನೆಯ ಅಧ್ಯಾಯ

ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಸರ್ವತೀರ್ಥದ ಮಹಿಮೆ ಉಕ್ತವಾಗಿದೆ. ಈ ಸರ್ವತೀರ್ಥವನ್ನು ಏಕಾಂಬರನಾಥಸ್ವಾಮಿ ತನ್ನ ಕಾಲಿನ ಹೆಬ್ಬೆರಳಿನಿಂದ ಉಂಟು ಮಾಡಿದನು. ಎರಡು ಸಲ ಹರಿದು ಬಂದ ಕಂಪಾನದಿಯ ಪ್ರವಾಹ ಈ ತೀರ್ಥದಲ್ಲೇ ಬಿದ್ದಿದೆ. ಕಾಮಾಕ್ಷಿದೇವಿಯೇ ಈ ಸರ್ವತೀರ್ಥವನ್ನು ಕಟ್ಟಿಸಿದಳು. ಆ ದೇವಿ ತಾನು ನಡೆಸುತ್ತಿದ್ದ ಮೂವತ್ತೆರಡು ಧರ್ಮಗಳನ್ನು ನಡೆಸಲು ಗಣಪತಿಗೆ ಆಜ್ಞೆ ಇತ್ತಳು. ಒಬ್ಬ ಬ್ರಾಹ್ಮಣನ ಪಿತೃಗಳು ಈ ಸರ್ವತೀರ್ಥದ ಮಹಿಮೆಯಿಂದಲೆ, ನರಕದಿಂದ ಕೈಲಾಸಕ್ಕೆ ಹೋಗಿ ಸೇರಿದರು. ಈ ವಿಷಯಗಳನ್ನು ಒಂಭತ್ತನೆಯ ಅಧ್ಯಾಯದಲ್ಲಿ ವಿವರಿಸಿದ್ದಾರೆ.

## ಹತ್ತನೆಯ ಅಧ್ಯಾಯ

ಶ್ರೀಕಾಮಾಕ್ಷೀದೇವಿಯ ಎಲ್ಲೆ ಕ್ಷೇತ್ರಾಂಗಿ ಎಂಬ ದುರ್ಗಾಲಯದಿಂದ ಆರಂಭಿಸಿ ಶ್ವೇತಪ್ಪೆರುಮಾಳ್ ಆಲಯದ ವರೆಗೆಂದೂ, ಈ ಎಲ್ಲೆಯೊಳಗೆ ಮುಖ್ಯವಾದ ದುರ್ಗಾಲಯಗಳು ಆರು, ವಿಷ್ಣು ಆಲಯಗಳು ನಾಲ್ಕು, ಶಿವಾಲಯಗಳು ಐದು, ತೀರ್ಥಗಳು ನಾಲ್ಕು ಎಂದೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಹೇಳಿದೆ. ಶ್ರೀಕಾಮಾಕ್ಷೀದೇವಿಯ ಆಲಯದಲ್ಲಿ ಅನ್ನಪೂರಣಿ ಆಲಯ, ಶಾಸ್ತಾ ಆಲಯ, ಅಂಜನ ಕಾಮಾಕ್ಷಿಸನ್ನಿಧಿ, ಮತ್ತು ಸಂತಾನಸ್ತಂಭ ಇವೆ. ಅವುಗಳ ವೃತ್ತಾಂತವನ್ನೂ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಕಾಣಬಹುದು.

## ಹನ್ನೊಂದನೆಯ ಅಧ್ಯಾಯ

ಶ್ರೀಕಾಮಾಕ್ಷೀದೇವಿಯ ಆಲಯದಲ್ಲಿ ಪರಾಶಕ್ತಿ ವಿರಾಜಿಸುತ್ತಿರುವ ಮಂಟಪವೇ ಗಾಯತ್ರೀಮಂಟಪ. ಅದಕ್ಕೆ ಆಧಾರವಾಗಿರುವುದು ಮಹಾಬಿಲ. ಆ ಮಹಾ



ಬಿಲದ ಮಹಿಮೆಯಿಂದ ಜನಿತವಾದ ನಾಮಗಳ ವಿವರಣೆ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ಕಾಮಕೋಟಿ ಮತ್ತು ಕಾಮಕೋಷ್ಠ ಎಂಬ ಎರಡು ನಾಮಗಳ ವಿಶೇಷಣಗಳನ್ನೂ ಇಲ್ಲಿ ವಿವರಿಸಿದ್ದಾರೆ. ಬಂಧಕಾಸುರನ ಉಪದ್ರವ, ಆ ಅಸುರನ ಉಪಟಳಕ್ಕೆ ಹೆದರಿ ಅಲ್ಲಿ ಬಂದ ದೇವತೆಗಳಿಗೆ ಈ ಮಹಾಬಿಲದ ಮಹಿಮೆ ಹೇಳಲ್ಪಟ್ಟ ವಿಧಾನ ಮತ್ತು ಆ ಬಿಲಪ್ರದಕ್ಷಿಣದ ಮಹಿಮೆ ಮುಂತಾದ ಅನೇಕ ವಿಷಯಗಳನ್ನು ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ.

## ಹನ್ನೆರಡನೆಯ ಅಧ್ಯಾಯ

ಕಾಮಕೋಟಿಪೀಠವಲ್ಲಿ ವಿರಾಜಿಸುತ್ತಿರುವ ಶ್ರೀ ತ್ರಿಪುರಸುಂದರಿಯ ಮಹಿಮೆ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ದೇವತೆಗಳ ದುಃಖ ನಿವೃತ್ತಿಗಾಗಿ ದೇವೀ ಬಿಲದಿಂದ ಹೊರಬಂದು ಲೋಕವನ್ನೆಲ್ಲಾ ಸುಟ್ಟು ಬೂದಿಮಾಡಿ ತ್ರಿಮೂರ್ತಿಗಳನ್ನು ಸೃಷ್ಟಿಸಿ ಅಂತರ್ಧಾನವಾದಳು. ಮತ್ತೆ ಆ ದೇವಿ ಬಂಧಕಾಸುರನ ಪ್ರೇತದೊಂದಿಗೆ ಹೊರಬಂದು, ದೇವತೆಗಳಿಗೆ "ಈ ಬಂಧಕನ ಪ್ರೇತವನ್ನು ಹುಗಿದು ನನಗೆ ಆಲಯಕಟ್ಟಿ ನನ್ನನ್ನು ಪ್ರತಿಷ್ಠೆಮಾಡಿ ಪೂಜಿಸಿ" ಎಂದು ಹೇಳಿ ಪೂಜಾವಿಧಾನವನ್ನೂ ಉಪದೇಶಿಸಿದಳು. ಅವರು ದೇವಿಯ ದರ್ಶನಮಾಡಿದಮೇಲೆ ದೇವಿಯೇ ಆ ದೇವತೆಗಳಿಗೆ ತನ್ನ ವೃತ್ತಾಂತವನ್ನು ಹೇಳಿದಳು. ದೇವಿಯ ಉಪದೇಶದಂತೆ ದೇವತೆಗಳು ಆ ದೇವಿಯನ್ನು ಪೂಜಿಸಿದರು. ಈ ಕಥೆಯನ್ನು ವಿವರಿಸಿ, ನಾಲ್ಕು ಯುಗಗಳಲ್ಲಿ ಯಾರು ಯಾರು ಪರಾಶಕ್ತಿಯನ್ನು ಪೂಜಿಸಿದರೆಂದು ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ.

## ಹದಿಮೂರನೆಯ ಅಧ್ಯಾಯ

ಬಂಧಕಾಸುರನನ್ನು ಹುಗಿಯುವಾಗ, ಆ ಹಳ್ಳದಲ್ಲಿ ತಪಸ್ಸುಮಾಡುತ್ತಿದ್ದ ಅಸುರನನ್ನು ಶ್ರೀ ಮಹಾವಿಷ್ಣು ಕೊಲ್ಲಬೇಕಾಯಿತು. ಆಗ ಅಸುರಗಣಗಳು ಹೇರಳವಾಗಿ ಬಂದು ಯುದ್ಧಮಾಡಲು, ಅವರನ್ನು ನಾಶಗೊಳಿಸಲು ಎರಡು "ಶಿವಭೂತ" ಗಳು ಪ್ರಾದುರ್ಭವಿಸಿ ಅಸುರರನ್ನು ಸಂಹರಿಸಿದುವು. ಆ ಎರಡು ಭೂತಗಳೂ ಅಸುರರ ರಕ್ತಪಾನದಿಂದ ಮತ್ತರಾಗಿ ಶ್ರೀ ಮಹಾವಿಷ್ಣುವಿನ ಜೊತೆ ಹೋರಾಡಿ ಸೋತುಹೋದುವು. ಶ್ರೀ ಮಹಾವಿಷ್ಣು 'ನಿಂತು, ಕೂತು, ಮಲಗಿ, ಎಂಬಂತೆ ಮೂರು ಅವಸ್ಥಾಭೇದಗಳನ್ನು ಪ್ರದರ್ಶಿಸಿದನು. ಈ ಮೂರು ಅವಸ್ಥಾಭೇದಗಳಿಂದ ಕೂಡಿದ ಶ್ರೀ ವಿಷ್ಣು, ಶಿವಭೂತಗಳನ್ನು ಸೋಲಿಸಿದುದು ಶಿವಾಪಚಾರ ಮಾಡಿದಂತಾಯ್ತೆಂದು ಆ ಅಪರಾಧ ಪರಿಹಾರಕ್ಕಾಗಿ ಶಿವನನ್ನು ಧ್ಯಾನಮಾಡಲು, ಶಿವನ ಕೃಪೆಯಿಂದ 'ಪಂಚತೀರ್ಥ, ನಿರ್ಮಾಣವಾಯ್ತು. ಈ ಪಂಚತೀರ್ಥದ ಮಹಿಮೆಯಿಂದ ವಿಷ್ಣುವಿನ ಅಪರಾಧ ನಿವಾ

ರಣೆಯಾದ ಮೇಲೆ ಆ ಎರಡು ಭೂತಗಳನ್ನು ಆ ತೀರ್ಥಕ್ಕೆ ಕಾವಲುಗಾರರಾಗಿ ನಿಯಮಿಸಿ, ಅವರ ಆಹಾರ ತೃಪ್ತಿಗೆ ವ್ಯವಸ್ಥೆಯನ್ನು ಕಲ್ಪಿಸಿ. ಶ್ರೀ ಮಹಾವಿಷ್ಣುವಿಗೂ ಅಲ್ಲೊಂದು ಕ್ಷೇತ್ರವನ್ನು ನಿರ್ಮಿಸಿದರು. ಈ ವೃತ್ತಾಂತವೆಲ್ಲವೂ ಹದಿಮೂರನೆಯ ಅಧ್ಯಾಯದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ.

## ಹದಿನಾಲ್ಕನೆಯ ಅಧ್ಯಾಯ

ಶ್ರೀ ಏಕಾಂಬರನಾಥನ ಪ್ರಿಯತಮೆಯಾದ ಶ್ರೀಕಾಮಾಕ್ಷೀದೇವಿ ಬ್ರಹ್ಮದೇವನ ಪ್ರಾರ್ಥನೆಯಿಂದ ಸ್ವರ್ಣ ವಿಗ್ರಹರೂಪಿಣಿಯಾಗಿ ಪರಿಣಮಿಸಿದ ವೃತ್ತಾಂತ ಈ ಅಧ್ಯಾಯದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ಈ ಅಂಬಿಕೆಯ ಸೌಂದರ್ಯ, ಕಾಂಚೀಕ್ಷೇತ್ರದಲ್ಲಿ ಶಿವಕ್ಷೇತ್ರದಲ್ಲೆಲ್ಲೂ ದೇವಿ ಇಲ್ಲದಿರಲು ಕಾರಣ, ಶಿವನ ಉರಿಗಣ್ಣಿನಿಂದ ಬೂದಿಯಾಗಿ ಹೋದ ಮನ್ಮಥನು ಕಾಮಾಕ್ಷೀದೇವಿಯವರ ಪ್ರಸಾದದಿಂದ ಕೋಟಿ ಮನ್ಮಥರಾಗಿ ರೂಪಾಂತರ ಹೊಂದಿ ಕೋಟಿರುದ್ರರನ್ನು ಜಯಿಸಿದ ವೃತ್ತಾಂತ, ಕೋಟಿಮನ್ಮಥರ ಅವತಾರ ಕಾಲದಲ್ಲಿ, ಭೂಮಂಡಲದಲ್ಲಿ ಸಮಸ್ತ ಶಿವಕ್ಷೇತ್ರಗಳಲ್ಲೂ ಶಕ್ತಿ ಸ್ವರೂಪಿಣಿಯಾದ ಅಂಬಿಕೆಯ ವಿಗ್ರಹಗಳು ಅಂತರ್ಧಾನವಾದ ಬಗೆ, ಮತ್ತೆ ಬ್ರಹ್ಮದೇವನೇ ಆ ಮೂರ್ತಿಗಳನ್ನು ಪ್ರತಿಷ್ಠೆಮಾಡಿಸಿದುದು, ಮುಂತಾದ ಅ[illegible]ಕ ವಿಷಯಗಳು ಇಲ್ಲಿ ನಿರೂಪಿತವಾಗಿವೆ. ಬ್ರಹ್ಮನನ್ನು ಕುರಿತು, ಸ್ವರ್ಣಕ[illegible] ಮತ್ತು ಏಕಾಂಬರನಾಥರ ವಿವಾಹ ಮಹೋತ್ಸವವನ್ನು ನಡೆಸುವ [illegible]ನವನ್ನು ಉಪದೇಶಿಸಿದರು. ಪರಾಶಕ್ತಿ, ತಪಃ ಕಾಮಾಕ್ಷಿ ಮತ್ತು ಸ್ವರ್ಣ[illegible]ಕ್ಷಿಗೆ ರುದ್ರಯಾಮಳ ತಂತ್ರದಲ್ಲಿ ಉಕ್ತವಾಗಿರುವಂತೆ ಪೂಜೆಮಾಡುವ [illegible]ವನ್ನೂ ಇಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ. ಬ್ರಹ್ಮ ಶ್ರೀಚಕ್ರಸ್ಥಾನವನ್ನು ತುಳಿದ ಪಾಪದಿಂದ ತನಗೆ ಪ್ರಾಪ್ತವಾದ ಅಂಧತ್ವವನ್ನು ಹೋಗಲಾಡಿಸಿಕೊಂಡ ಬಗೆ ಮತ್ತು ಪರಾಶಕ್ತಿಯನ್ನು ಪೂಜಿಸಿದ ಕ್ರಮ ಇಲ್ಲಿ ವಿವರಿಸಲ್ಪಟ್ಟಿದೆ.

---

श्रीमहात्रिपुरसुन्दर्यै नमः ।

श्रीगुरुकामाक्षीदेव्यै नमः ॥

# श्री काञ्चीमहिमा

## प्रथम अध्याय

ऐसे अनेक क्षेत्र हैं जिनमें पराशक्ति ने बिलरूप में, यंत्ररूप में, बिंब रूप में तथा अन्य विविध रूपों में रहकर अपने आधिक्य को प्रकट किया है। परन्तु, पराशक्ति के यंत्र, बिंब रूपों की महिमा, उसके शिव स्वरूप के अद्भुत दृश्य और विष्णुस्वरूप के मोहक दृश्य के दर्शन करानेवाला काञ्ची नगर है। इसलिए इस अध्याय में कहा गया है कि काञ्ची की विशेष महिमा है। इस अध्याय में यह भी कहा गया है कि पराशक्ति 'शिवकामेश्वराङ्कस्था' और 'शिवस्वाधीनवल्लभा' इन नामों से युक्त होने के कारण 'ज्योतिर्लिंगशक्तिस्वरूपिणी' तथा 'विष्णुरूपिणी' 'विष्णु मायाविलासिनी' इन नामों से युक्त होने के कारण वरदराजमूर्ति के रूप में भी रहती है। ज्योतिर्लिंगशक्तिस्वरूप में रहने के कारण मुक्ति का आश्रय करनेवालों को सर्वमंगल सर्वज्ञान की सिद्धि होती है, और वरदराज मूर्ति के रूप में रहने के कारण भक्ति के आश्रय करनेवालों को माया विलासरूपी इष्टकाम्यभोगसिद्धि की प्राप्ति होती है,—यह भी इस अध्याय में बताया गया है।

इनके अतिरिक्त इस अध्याय में यह भी कहा गया है कि काञ्ची के प्रथमावरण की सीमा के रूप में, पूर्व में समुद्र, दक्षिण में दक्षिणपिनाकिनी, पश्चिम में शिलाह्रद, उत्तर में स्वामिपुष्करिणी स्थित हैं, तथा द्वितीय आवरण की सीमा के रूप पूर्व में मामल्लपुर, दक्षिण में देवकीपुर, पश्चिम में

## आठवाँ अध्याय

सातवें अध्याय में कहे गये आम्रवृक्ष के तले स्थित ज्योतिर्लिंगस्वामी का स्वरूप, उस ज्योतिर्लिंगस्वामी को पाने के लिए श्रीउमादेवी के कैलास छोड़कर आने के कारण–ये इस अध्याय में बताये गये हैं। कैलास से निकली उमा का बद्रीकाश्रम पहुँचना, उस आश्रम के कात्यायन महर्षि का उमा को योगदंड आदि देना इत्यादि वृत्तान्तों का विवरण भी इस में हैं। योगदण्ड को प्राप्त करके अंबिका काशी पहुँचकर वहाँ सब को पीडित करने वाले बारह वर्ष के दुर्भिक्ष को मिटाती है। काञ्ची पहुँचने के बाद योग दण्ड आदि शिवपूजा के योग्य शिवलिंगमूर्ति के रूप में परिवर्तित हुए। उसके बाद चूंकि अंबिका काञ्ची में घोर तपस्या करने लगी, शिव ने गंगा को कम्पानदी के रूप में प्रवाहित कराया। इस प्रवाह को उमादेवी ने प्रलयबंधिनी को लेकर रोका। फिर एक बार शिव ने प्रलयबंधिनी के कपाल में समाहित धारा को प्रवाहित किया। इस प्रवाह से भयभीत होकर श्री कामाक्षीदेवी ने एकांबरनाथ का आलिंगन किया। शिव प्रत्यक्ष होकर कामाक्षीदेवी से परिणय करके सब का अनुग्रह किया। यही कथा इस अध्याय में विस्तार से कही गई है।

## नवम अध्याय

इस अध्याय में सर्वतीर्थ की महिमा बतायी गई है। श्रीएकांबर नाथस्वामी ने इस सर्वतीर्थ की सृष्टि अपने पादांगुष्ट से की। दो बार प्रवाहित कम्पानदी का जल इसी तीर्थ में गिरा है। श्री कामाक्षी ने ही इस तीर्थ को बनाया है। उसके बाद देवी ने अपने द्वारा किये गये बत्तीस धर्मों को ठीक से चलाने के लिए गणपति को नियुक्त किया। किसी ब्राह्मण के पितृ-गण इस सर्वतीर्थ की महिमा से नरक से कैलास पहुँच गये। ये ही विवरण इस नवम अध्याय में मिलते हैं।



## दसवाँ अध्याय

श्रीकामाक्षीदेवी की सीमा क्षेत्रांगी नामक दुर्गामंदिर से प्रारंभ होकर श्वेतस्वामी के मंदिर तक फैली है तथा उस सीमा के अन्तर्गत मुख्य दुर्गामंदिर छः, विष्णु के चार मंदिर, पाँच शिवालय, तथा चार तीर्थ स्थित हैं। श्री कामाक्षीदेवी के मंदिर में अन्नपूरणी का मंदिर, शास्ता का मंदिर, अञ्जनकामाक्षी की सन्निधि, सन्तान स्तंभ ये सब हैं। इन्हीं के इतिहास इस अध्याय में वर्णित हैं।

## ग्यारहवाँ अध्याय

श्रीकामाक्षीदेवी के मंदिर में जहाँ पराशक्ति आसीन है वही 'गायत्री मंडप' है। 'महाबिल' उसका आधार है। इस अध्याय में उस महाबिल महिमा से उत्पन्न नामों का वर्णन किया गया है। यह अध्याय 'कामकोटि' और 'कामकोष्टम्' इन दो नामों की विशेषताओं का भी विवरण देता है। बन्धकासुर के उपद्रव, उसके उपद्रव से भीत होकर वहाँ आये देवों को महाबिल के प्रभाव को किस विधि से वर्णित कि यागया, बिल प्रदक्षिण महिमा, तथा अनेक विषयों का वर्णन इस अध्याय में मिलता है।

## बारहवाँ अध्याय

इस अध्याय में 'कामकोटिपीठ' में स्थित श्रीत्रिपुरसुन्दरी की महिमा कही गई है। देवों के दुख निवारणार्थ बिल से बाहर आकर देवी लोक को भस्मीभूत करके फिर अदृश्य हो गयी। फिर बन्धकासुर के प्रेत के साथ बाहर आकर देवों से यह कहकर कि, "इस बन्धकासुर को दफनाकर, मेरे लिए मंदिर बनवाकर, मेरी प्रतिष्ठा करके पूजा कीजिए", देवी ने उनको पूजाविधि का भी उपदेश दिया। देवी के दर्शन करने के

# श्रीकामाक्षीविलास विषयसूचिका


| विषय संख्या | विषयाः | पुट संख्या |
|---|---|---|
| 1 | सुरथमार्कण्डेय संवादः | १ |
| 2 | कामराजादिपीठत्रय विवरणम् । | २ |
| 3 | सुरथमहाराजं प्रति मार्कण्डेयकथितकाञ्चीक्षेत्र प्रमाण विवरणारम्भः। | २ |
| 4 | दक्षिणपिनाकिन्युत्पत्तिकथनम् । | ३ |
| 5 | शिलाह्रद प्रभावः | ३ |
| 6 | स्वामिपुष्करिणी प्रभावः । | ४ |
| 7 | ब्रह्मशालान्तर्गत महाबलिपुर देवकीपुरयोर्महिमा । | ४ |
| 8 | विरिञ्चीपुर नागह्लपुरयोः प्रभावः । | ५ |
| 9 | त्रिवेणीसङ्गमपुर व्याघ्रवनयोर्महिमा । | ६ |
| 10 | क्षीराब्धि नगरीकथा । | ६ |
| 11 | नन्दिगङ्गापुरीविभवः । | ६ |
| 12 | पाञ्चालिका कन्यकेशयोर्महिमा । | ७ |
| 13 | श्वेतविष्णुकथा । | ७ |
| 14 | क्षेत्राङ्गिदुर्गामहिमा । | ७ |
| 15 | क्षीरनदी प्रभावारम्भः । | ९ |
| 16 | मधुकैटभवधारम्भः । | ११ |
| 17 | कामाक्ष्यम्बायास्त्रिविधशक्तिस्वरूपनिरूपणम् । | १२ |
| 18 | काञ्च्यां वरदराज क्षेत्र निरूपणम् । | १५ |

19 पुण्यकोटिक्षेत्रनिलयविघ्नेश्वरस्कन्ददुर्गादीनां स्थाननिरूपणम् । १६
20 यथोक्तकारि प्रभृतिविष्णुमूर्तीनां स्थाननिरूपणम् । १७
21 तत्त्वसोपान महादेवी पुण्यकोट्यनन्त सरस्तीर्थादीनां स्थानविवरणम १८
22 हरिक्षेत्रनिवासिनां प्रभावकथनम । १९
23 हरिक्षेत्रस्थगार्ग्याख्य ब्राह्मणोपाख्यानम् । २०
24 हस्तिशैलप्रभावः । २३
25 वरदराजदेवालयस्थ फलियुग्मकथारम्भः । २६
26 गणुब्राह्मणोपाख्यानम । २७
27 वरदराजमहिमारम्भः । २९
28 सरस्वती लक्ष्मी विवादकथारम्भः । ३०
29 सृष्टिदण्डप्राप्त्यै विष्णुं प्रति ब्रह्मकृत तपश्चर्याघट्टः । ३१
30 चतुर्मुखकृताश्वमेधप्रारम्भः । ३२
31 अश्वमेधविघ्नार्थं कुपित सरस्वतीकलितमायाऽनलोत्पत्तिः । ३३
32 दीपप्रकाशकाष्टभुजाख्यविष्णवतारघट्टः । ३३
33 सरस्वत्याः वेगवतीनदीरूपताविर्भावकथा । ३४
34 श्रीवरदराजमूर्तेरवतारघट्टः । ३५
35 घृताद्यभिषेकपूर्वकं श्रीवरदराजावतारोत्सवघट्टः । ३६
36 भानुवर्णाख्यविप्रोपाख्यानम् । ३८
37 वेगवत्युत्पत्त्यादिकथाप्रारम्भघट्टः । ३९
38 धौम्यनाथोपाख्यानम् । ४२
39 हरिक्षेत्रदर्शनादिप्रभावकथनम् । ४३
40 रुद्रशालान्तर्गत रुद्रकोटिप्रभावकथनम् । ४५
41 विकटचक्रविनायक रसालस्कन्दादीनां स्थाननिरूपणम् । ४६
42 प्रळयबन्धिन्यादिदुर्गाचतुष्टयस्थाननिरूपणम् । ४६





43 कायाविरोहणाद्यष्टमहेश्वराणां स्थाननिरूपणम् । ४७
44 पाण्डवदूतादि विष्णुमूर्तीनां स्थाननिर्णयः । ४७
45 चोरैकाम्रेश्वरादीनां स्थाननिरूपणम् । ४८
46 शिवगङ्गादितीर्थचतुष्टयानां प्रभावः । ४८
47 त्वक्कौशिकोपाख्यानम् । ५०
48 एकाम्रवृक्षमहिमा । ५३
49 शक्तिमहेश्वर संवादः । ५४
50 स्कन्दमार्कण्डेय संवादः । ५६
51 क्रौञ्चविप्रोपाख्यानम् । ५८
52 एकाम्रेश्वरप्रभावः । ६०
53 उमामहेश्वरसंवादः । ६१
54 तपःकामाक्षीप्रभावकथनम् । ६५
55 प्रळयबन्धिन्याख्यदुर्गाप्रभावः । ६६
56 चन्द्रकण्ठाख्यविष्णुप्रभावः । ६७
57 तपःकामाक्षीकृतशङ्करसाक्षात्कारः । ६८
58 कामाक्ष्येकाम्रनाथयोरुद्वाहारम्भघट्टः । ६९
59 कल्याणमण्टपवर्णनम् । ७०
60 विवाहवेषालंकृतकामाक्षीवर्णनम् । ७१
61 कामाक्ष्येकाम्रनाथयोर्विवाहघट्टः । ७२
62 विवाहसमये महेशाय विश्वकर्मादिसमर्पित क्रीडारथादिकथनम् । ७५
63 शम्भुनामद्विजोपाख्यानम् । ७६
64 सर्वतीर्थाख्यपुष्करणीप्रभावकथनम् । ७८
65 सोमाख्यद्विजोपाख्यानम् । ८१
66 कामकोटिपीठस्थलनिर्णयघट्टः । ८५
67 महादुर्गादि दुर्गाषट्कस्थाननिर्णयः । ८६

| | | |
|---|---|---|
| 68 | दूर्वावर्णादिविष्णुचतुष्टयस्थाननिर्णयः । | ८७ |
| 69 | महाकाळादिरुद्रपञ्चकस्थाननिर्णयः । | ८७ |
| 70 | अन्नपूर्णेश्वरी प्रभावः । | ८८ |
| 71 | अञ्जनकामाक्षी सन्तानस्तम्भयोः प्रभावः । | ८८ |
| 72 | पञ्चतीर्थादितीर्थचतुष्टयकथनम् । | ८९ |
| 73 | जगन्नाथाख्यद्विजोपाख्यानम् । | ९१ |
| 74 | कामकोटिबिलमहिमानुवर्णनम् । | ९४ |
| 75 | मुनिशापान्नष्टलिङ्गस्य शिवस्य कामकोटिबिलप्रवेशेन पुनर्लिङ्गोत्पत्तिः बन्धकासुरकथा च | ९५ |
| 76 | कामकोटिबिलप्रदक्षिणफलकथनम् । | ९८ |
| 77 | बलभद्राख्यद्विजोपाख्यानम् । | ९८ |
| 78 | महात्रिपुरसुन्दरीवर्णनम् । | १०० |
| 79 | बन्धकासुरवधारम्भः । | १०२ |
| 80 | देवेभ्यः कन्यारूपकामाक्षीप्रेरित स्वालयादिनिर्माणकथनम् । | १०५ |
| 81 | कामकोटिबिले महात्रिपुरसुन्दर्याविर्भावघट्टः | १०७ |
| 82 | जयदेवोपाख्यानम् । | १११ |
| 83 | भूतबन्धजनार्दनप्रभावः । | ११३ |
| 84 | पञ्चतीर्थप्रभावः । | ११७ |
| 85 | गिरीन्द्राख्य द्विजोपाख्यानम् । | ११९ |
| 86 | हेमकामाक्षीवर्णनम् ब्रह्मकृतबिम्बप्रविष्टहेमकामाक्षीकथारम्भश्च । | १२२ |
| 87 | अनङ्गस्य देवकटाक्षाद्वपुःप्राप्तिः । | १२३ |
| 88 | कामरुद्रयोर्युद्धम् । | १२४ |
| 89 | कामाक्षीरुद्रसंवादः । | १२६ |
| 90 | कामाक्षीकटाक्षसृष्ट कामानां शम्भुसृष्टरुद्राणां च युद्धारम्भः | १२७ |
| 91 | हेमकामाक्ष्यवतारघट्टः । | १३१ |





| | | |
|---|---|---|
| 92 | अन्धकत्वविमोचनाय ब्रह्मणे सरस्वतीकथितोपायघट्टः | १३३ |
| 93 | कामाक्ष्यादीनां नामपञ्चकविवरणम् । | १३४ |
| 94 | शिवशक्त्यैक्यपूजाविधिकथनम् । | १३५ |
| 95 | श्रीचक्रपूजाविधिः । | १३७ |
| 96 | श्रीविद्योपास्तिसम्पन्नफल श्रीहयग्रीवादीनां प्रभावः । | १३८ |
| 97 | आकाशराजतनय नामकरणदिने स्वर्णवर्षकथनम् । | १४० |
| 98 | पित्रे आकाशराजाय बालोक्त हेमवृष्टिकारणम् । | १४२ |
| 99 | चोळराजचरित्रम् । | १४३ |
| 100 | पुराणफलकथनघट्टः । | १५५ |


## श्रीमहालक्ष्मीतन्त्रविषयसूचिका


| | | |
|---|---|---|
| 1 | हयग्रीवागस्त्यसंवादः । | १४७ |
| 2 | श्रीकामाक्षीदेव्या पादमस्तकवर्णनम् । | १५४ |
| 3 | श्रीदेवीसृष्ट गौरीशिवादिमिथुनत्रय कथारम्भः । | २४९ |
| 4 | पार्वत्यनुजिघृक्षया कामाक्षीप्रादुर्भावः । | १६१ |
| 5 | भैरवकृत ब्रह्मशिरच्छेदोत्पन्न पापापनोदनाय काञ्च्यां कामाक्षींप्रति तत्कृततपश्चर्यादिकथनम् । | १६५ |
| 6 | श्रीकामाक्ष्यनुग्रहेण दशरथस्य सन्तानप्राप्तिः । | १६८ |

|| श्रीरस्तु ||

|| श्री महात्रिपुरसुन्दर्यै नमः ||

|| श्रीगुरु कामाक्ष्यै नमः ||

# ❀ श्री कामाक्षीविलासः ❀

## प्रथमोऽध्यायः

### सुरथ मार्कण्डेय संवादः

सुरथ उवाच--

मुनीश करुणासिन्धो वेदवेदान्तवित्तम ।
त्वया प्रोक्तं महापुण्यं चण्डिकाख्यानमुत्तमम् ॥ १ ॥

इदानीं श्रोतुमिच्छामि पीठत्रयरहस्यकम् ।
वद मे तन्महातेजाः कृपया करुणानिधे ॥ २ ॥ तेजः

मार्कण्डेय उवाच--

श्रुणु वक्ष्ये नृपश्रेष्ठ यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ३ ॥

पञ्चाशत्कोटिविस्तीर्णे वर्तन्ते पृथिवीतले ।
कामकोटि महापीठान्युत्तमानि हि तेष्वपि ॥ ४ ॥

चतुष्षष्टिसहस्राणि तेषु चाष्टाष्टकानि हि ।
मातृका संख्यया तेषु तेषु तत्त्वानुसंख्यया ॥ ५ ॥

### कामराजादि पीठत्रय विवरणम्

तेषु चाष्टादश श्रेष्ठान्येषु पीठत्रयं वरम् ।
तत्त्रये कामराजाख्यं प्रथमं हि प्रशस्यते ॥ ६ ॥

तत्पीठे वाग्भवं कूटं हयग्रीवेण पूजितम् ।
जालन्धराख्यं द्वितीयं तु मध्यकूटं मनोभवम् ॥ ७ ॥

भृगुणाऽभ्यर्चितं पीठं ज्वालामुख्यं तु तद्विदुः ।
ओड्याणाख्यं तृतीयं तु पराबीजस्वरूपकम् ॥ ८ ॥

तत्पीठं कामरूपेऽस्ति व्यासेनोपासितं सदा ।
एवं पीठत्रयं श्रेष्ठं सर्वपीठोत्तमोत्तमम् ॥ ९ ॥

### सुरथमहाराजं प्रति मार्कण्डेय कथित—
### काञ्चीक्षेत्र प्रमाण विवरणारम्भः

प्रागुक्तं कामराजाख्यं काञ्चीक्षेत्रे हि वर्तते ।
काञ्चीक्षेत्रप्रमाणन्तु प्रोच्यते भूपतेऽधुना ॥ १० ॥

गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पूर्वसिन्धुर्महापुण्यः काञ्चीक्षेत्राश्रयो नृप ॥ ११ ॥

तत्तोयं तत्समुद्रस्य पापघ्नं सर्वदा नृणाम् ।
स्नातॄणां सागरे तत्र न कालनियमः किल ॥ १२ ॥

पुरा स्वदोष शान्त्यर्थं सरिद्रूपा सरस्वती ।
तत्सिन्धुं प्राप्य मुक्ताऽभूत्पतिं ब्रह्माणमाश्रिता ॥ १३ ॥

सा पूर्वाम्बुधये तुष्टा ब्रह्मपत्नी वरं ददौ ।
काञ्चीदेशान्तिके सिन्धौ न कालनियमो भवेत् ॥ १४ ॥



सर्वदा वा सकृद्वापि स्नानाद्विष्णुपदं लभेत् ।
एवं वरेण संयुक्तोऽभवत्तत्सागरो नृप ॥ १५ ॥

### दक्षिणपिनाकिन्युत्पत्तिकथनम्

नैरृत्यां तस्य जलधेस्सपादऋतुयोजने ।
दक्षिणाख्या सरिच्छ्रेष्ठा पिनाकिन्यत्र वर्तते ॥१६॥

सा नदी सर्वपापघ्नी शिवकार्मुकसन्निभा ।
पुरा हरप्रसादेन भृगुर्दैत्यगुरुर्महान् ॥१७॥

पिनाकं सन्दधौ हस्ते भूगतं हरकार्मुकम् ।
तदुद्धरणमात्रेण तावद्भूमिस्सरिद्बभौ ॥ १८ ॥

ततो दृष्ट्वा जलाढ्यां तां नदीं सिन्धुप्रगामिनीम् ।
पिनाकिनीति तामुक्त्वा भृगुस्तस्यै वरं ददौ ॥१९॥

पिनाकिनीनदीतोये यो जनस्स्नानमाचरेत् ।
विमुक्तस्सर्वपापेभ्यो विष्णुलोकं स गच्छतु ॥ २० ॥

इत्येवं वरसंयुक्ता सा नदी तत्र वर्तते

### शिलाह्रदप्रभावः

तस्या मारुतदिग्भागे सप्तयोजनमात्रतः ॥ २१ ॥
शिलाह्रदो महापुण्यश्चामृतत्वप्रदायकः ।

पुरा वातात्मजो वीरस्सुधासञ्जीवनौषधिम् ॥ २२ ॥

आदाय तज्जले क्षाल्य ददौ तां लक्ष्मणाय च ।
हनूमानथ तं दृष्ट्वा तत्तीर्थाय वरं ददौ ॥ २३ ॥

शिलाह्रदे तु यस्स्नायात्स सिद्धो दीर्घजीवनात् ।
देवत्वमहितो भूत्वा चान्ते विष्णुपदं व्रजेत् ॥ २४ ॥
एवं वरेण संयुक्तो वर्तते स शिलाह्रदः ।

### स्वामिपुष्करिणी प्रभावः

ऐशान्यां तस्य तीर्थस्य वसुयोजनमात्रतः ॥ २५ ॥

स्वामिपुष्करणी पुण्या साक्षात्तद्विरजानदी ।
पुरा नारायणश्श्रीमान् परिणेतुं तु पद्मजाम् ॥ २६ ॥

शिष्यैस्सार्धं सिद्धवेषात्स्थित्वा शेषाचलोपरि ।
पृथक्त्वेन च शिष्याणां पृथक् तीर्थमकारयत् ॥ २७ ॥

तथा स्वस्वपृथक्त्वेन स्वामित्वाद्विरजानदीम् ।
स्वस्य
आनाय्यात्र महातीर्थे स्नानपानाय चाकरोत् ॥ २८ ॥

स्वविवाहावसाने तु स्वतीर्थाय वरं ददौ ।
योऽत्र भक्त्या नरस्स्नायात्स्वामिपुष्करिणीजले ॥ २९ ॥

सर्वान् कामानसौ भुङ्क्त्वा विष्णुलोकं स गच्छति ।
एवं वरेण सम्पन्नं तीर्थं तत्र प्रकाशते ॥ ३० ॥

### ब्रह्मशालान्तर्गत महाबलिपुर
### देवकी पुरयोर्महिमा

तत्तीर्थस्याग्निदिग्भागे पूर्ववत्तत्प्रमाणतः ।
प्रागुक्तपूर्वजलधिः पुण्यदस्तत्र वर्तते ॥ ३१ ॥

एतच्चतुर्दिङ्मध्यस्थः पुरा तुण्डीरभूभुजा ।
धर्मेण पालितो देशस्तस्मात्तुण्डीरमण्डलम् ॥ ३२ ॥



प्रागुक्तपूर्वजलधेः पश्चिमेऽस्त्येकयोजनात् ।
महाबलिपुरं तत्र बलिना परिकल्पितम् ॥ ३३ ॥

बलिस्तत्र पुरा शम्भुं समाराध्य श्रियाऽन्वितः ।
तस्य क्षेत्रस्य नैरृत्यां पञ्चयोजनमात्रतः ॥ ३४ ॥

देवकीपत्तनं त्वास्ते पुरा तत्रोग्रसेनकः ।
समाराध्य हरं तत्र कुमारीरत्नमाप सः ॥ ३५ ॥

तस्मात्तद्देवकीजन्मभूतलं देवकीपुरम् ।

### विरिञ्चीपुर नागहलपुरयोः प्रभावः

तस्य वायव्यदिग्भागे पूर्ववत्तत्प्रमाणतः ॥ ३६ ॥

विरिञ्ची नाम नगरी रम्भार्थं ब्रह्मणा कृता ।
पुरा रम्भा हरं पूज्य शक्रस्यातिप्रिया ह्यभूत् ॥ ३७ ॥

तस्य चैशान्यदिग्भागे पूर्ववत्तत्प्रमाणतः ।
पुरी नागहलाभिख्या विषपानास्पदायिता ॥ ३८ ॥

पुरा तत्र महादेवं समाराध्याखिलैस्सुरैः ।
जगत्संहारगरळं महेशायार्पणं कृतम् ॥ ३९ ॥

तदाग्नेयदिशाकोणे पूर्ववत्तत्प्रमाणतः ।
महाबलिपुरं तत्र प्रागुक्तक्षेत्रमुत्तमम् ॥ ४० ॥

एतच्चतुर्दिङ्मध्यस्थं पूर्वं शैलतनूभुवः ।
तपसा शोभितमभूद्वनं यच्च तपोवनम् ॥ ४१ ॥

### त्रिवेणीसङ्गमपुर व्याघ्रवनयोर्महिमा

पश्चिमे तु बलीशस्य योजनत्रयमात्रतः ।
त्रिवेणी सङ्गनगरी राजते तत्र वै पुरा ॥ ४२ ॥
ददौ हरिस्स्वभक्ताय त्रिवेणीस्नानजं फलम् ।
तस्य नैरृतिदिग्भागे सपादे चैकयोजने ॥ ४३ ॥
क्षेत्रं व्याघ्रवनाभिख्यं व्याघ्रपादाय वै पुरा ।
महेशस्ताण्डवं कृत्वा वर्तते तत्सभापतिः ॥ ४४ ॥

### क्षीराब्धि नगरीकथा

तस्य वायव्यदिग्भागे पूर्ववत्तत्प्रमाणतः ।
क्षीराब्धिनगरी तत्र स्वभक्ताय पुरा हरिः ॥ ४५ ॥
यथा दुग्धार्णवे विष्णुस्तथा सान्निध्यमातनोत् ।

### नन्दिगङ्गापुरीविभवः ॥

तस्य शंकरदिग्भागे पूर्ववत्तत्प्रमाणतः ॥ ४६ ॥
नन्दिगङ्गापुरी तत्र चण्डालाय पुरा हरः ।
कृषिमुख्यवृषस्यास्ये गङ्गां कृत्वाऽथ पश्चमम् ॥ ४७ ॥
स्नापयित्वा स्वभवनं दत्तवांस्तत्र शङ्करः ।
तस्य चाग्नेयदिग्भागे पूर्ववत्तत्प्रमाणतः ॥ ४८ ॥
त्रिवेणी सङ्गनगरी प्रागुक्ता तत्र वर्तते ।
एतच्चतुर्दिङ्मध्यस्था पुरा पद्मासनेन भूः ॥ ४९ ॥



कृता शालाऽश्वमेधार्थं ब्रह्मशालेति विश्रुता ।

### पाञ्चालिका कन्यकेशयोर्महिमा

प्रागुक्तत्रिवेण्यास्तु पश्चिमे चैकयोजने ॥ ५० ॥
आस्ते पाञ्चालिका दुर्गा हरिक्षेत्रनिवासिनी ।
योजनं पण्डितैः प्रोक्तं षष्ट्युत्तरशतांशकम् ॥ ५१ ॥
तस्यास्तु पश्चिमे भागे एकाशीत्यंशमात्रतः ।
कन्यकेश इति ख्यातो वर्तते तत्र शङ्करः ॥ ५२ ॥

### श्वेतविष्णु कथा

तस्य चोत्तरदिग्भागे एकपञ्चाशदंशतः ।
तत्र श्वेताख्यको विष्णुस्सूर्यपुष्करिणीतटे ॥ ५३ ॥

### क्षेत्राङ्गीदुर्गामहिमा

तस्य वासवदिग्भागे भाति सप्तदशांशतः ।
क्षेत्राङ्गीति महादुर्गा चन्द्रपुष्करिणीतटे ॥ ५४ ॥
तस्याग्निगोचरे राजन्नेकपञ्चाशदंशतः ।
महापाञ्चालिका दुर्गा प्रागुक्ता तत्र वर्तते ॥ ५५ ॥
एतच्चतुर्दिङ्मध्यस्थं काञ्चीक्षेत्रं नृपोत्तम ।
पृथिव्या गोस्वरूपाया यत्काञ्चीस्थानतां गतम् ॥ ५६ ॥
तस्मात्क्षेत्रमिदं पुण्यं काञ्चीक्षेत्रं प्रचक्षते ।
विष्णुनाऽधिष्ठितं क्षेत्रं शिवसान्निध्यकारकम् ॥ ५७ ॥

महाशक्तिप्रभावाढ्यं शक्तिप्राधान्यवैभवात् ।
विनाशरहितं क्षेत्रं तस्मात्सत्यव्रताह्वयम् ॥ ५८ ॥

सरिच्छैलालयाङ्कैश्च क्षेत्रं भास्करसंज्ञिकम् ।
बिल वृक्ष विमानाङ्कैः क्षेत्रं तैजसमुच्यते ॥ ५९ ॥

शिवशक्त्यात्मकं क्षेत्रं तथा हरि हरात्मकम् ।
याऽऽत्मशक्तिर्महामाया सा माया स्वगुणैर्द्विधा ॥ ६० ॥

विष्णुशक्तीति भावाभ्यां निर्गुणा ह्येकधा च सा ।
तत्र प्रवर्तते देवी सगुणा त्रिविधात्मिका ॥ ६१ ॥

तस्मात्सा च महाक्षेत्रे शून्यस्त्रीपुंसभेदतः ।
त्रिविधात्मकरूपाढ्यं क्षेत्रं शाक्ताह्वयं वरम्॥ ६२ ॥

अच्युतं निर्मलं स्थानं सदा साधुजनावृतम् ।
कैलासोपि च वैकुण्ठमादिश्रीपुरमन्दिरम् ॥ ६३ ॥

भूमौ तत्रैव लक्ष्यन्ते नान्यक्षेत्रे कदाचन ।
सुरद्रुमाश्च तरवो गङ्गातीर्थं पयोखिलम् ॥ ६४ ॥

सुरास्ते मानवास्सर्वे पाषाणाश्च हरीश्वरौ ।
रजः पावनकृत्तत्र वातः पापहराङ्कुशः ॥ ६५ ॥

यत्र यत्र सुरास्सिद्धाः ऋषयो मोक्षकांक्षिणः ।
काञ्च्यामचापि ते सर्वे ह्यासते दिव्यतेजसा ॥ ६६ ॥

तस्माद्दिव्यजनस्थानं तत्काञ्चीनगरं नृप ।
महापुण्यप्रदं क्षेत्रं क्षेत्रस्यास्य प्रभावतः ॥ ६७ ॥

यावत्तुण्डीरभूवृत्तं तावत्काञ्चीतलं स्मृतम् ।

2]



क्षीर नदी प्रभावारम्भः

तन्मध्यगामिनी क्षीरसरिच्छ्रेष्ठा महानदी ॥ ६८ ॥

सर्वपापप्रशमनी मुक्तिदा स्नानतो नृणाम् ।
श्रीविद्यापरमेशान्यास्स्तनकुम्भ समुद्भवा ॥ ६९ ॥

सा सुधा ज्ञानदा देवी त्वमृतत्वप्रदायिनी ।
जरामरणदुःखघ्नी सुधाक्षीरघृताम्भसा ॥ ७० ॥

एवं चतुर्विधेनैव युगभेदात्कृतादिषु ।
वर्तते तत्र क्षीरोष्णी तत्तद्भावा युगे युगे ॥ ७१ ॥

पुरा पराज्ञया सा च ब्रह्मणे ज्ञानदायिनी ।
तत्कथां सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ॥ ७२ ॥

तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ।
पुरा ब्रह्मा जगद्धाता सुब्रह्मण्यं शिवात्मजम् ॥ ७३ ॥

प्रणवार्थप्रशंसायामजित्वा ज्ञानविद्यया ।
भग्नो भूत्वा कुमारेण पराक्षीरप्रभावतः ॥ ७४ ॥

पानेन स गुहो विद्वान् सर्वज्ञः पण्डितोत्तमः ।
इत्येवं चिन्तयन्ब्रह्मा पराक्षीराशया ततः ॥ ७५ ॥

नन्दिशैलं समारुह्य स्थित्वा देवीसरित्तटे ।
श्रीविद्या परमेशान्या महामन्त्रवरं विधिः ॥ ७६ ॥

स लब्ध्वा शङ्कराद्ब्रह्मा शतसंवत्सरावधि ।
कृतवांस्तप अत्युग्रं श्रीदेवीध्यानपूर्वकम् ॥ ७७ ॥

ततो माया भगवती श्रीविद्यापरमेश्वरी ।
ललिता राजराजेशी महात्रिपुरसुन्दरी ॥ ७८ ॥

श्रीचक्रपुरसम्राज्ञी महाकैलासवासिनी ।
प्रीता सा ब्रह्मतपसा स्वस्तनस्थामृतेश्वरीम् ॥ ७९ ॥

क्षीराह्वयां ज्ञानदात्रीं जरामृत्युविघातिनीम् ।
ब्रह्मणे ज्ञानदानाय मोचयामास सुन्दरी ॥ ८० ॥

ततस्सुधात्मिका क्षीरा धृत्वा देव्यास्तु शासनम् ।
ब्रह्ममूर्ध्नि समालोक्य पपातामृतधारया ॥ ८१ ॥

ततः पीत्वा महादुग्धं मूर्ध्नि पाताभिषेकजम् ।
तृप्त्यातिदुग्धधाराभिर्ब्रह्मान्तः क्षीरनिर्भरात् ॥८२॥

यच्छेषं तन्मुखाम्भोजैर्भारतीपतिरत्यजत् ।
ततो दुग्धात्मिका देवी पर्वतादिव निर्गता ॥ ८३ ॥

सरिद्रूपा ततो भूत्वा दक्षिणोत्तरयोस्तटे ।
समागमनवृत्ताख्यां बाहुकुण्डलिनीङ्गदाम् ॥ ८४ ॥

समाकृष्य चतसृभिस्सरिद्भिस्संयुता तदा ।
काञ्चीदेशं ततः प्राप्य पूर्वसिन्धुं परा गता ॥८५॥

ततोऽथ भगवान्ब्रह्मा सर्वविद्यासु पण्डितः ।
क्षीरनद्याः प्रभावेन सर्वज्ञोऽभूत्पितामहः ॥ ८६ ॥

दृष्ट्वा तु तां नदीं क्षीरां मुदा तस्यै वरं ददौ ।
यः पयोष्ण्यां नरस्स्नायात्पूर्वज्ञानोदयेन च ॥८७॥

सत्यज्ञानतनुर्भूत्वा कैवल्यं पदमाप्नुयात् ।
एवं वरेण संयुक्ता तत्र क्षीराह्वया नदी ॥ ८८ ॥

वर्तते तत्र साऽद्यापि मध्ये तुण्डीरमण्डलम् ।
पुरा तस्मिन् सरित्तोये बहवस्स्नानमात्रतः ॥८९॥



सद्ज्ञानतनवो भूत्वा गताः कैवल्यसद्गतिम् ।
तेषु कश्चित्पुरा विप्रः पापकृत्ये सदा रतः ॥ ९० ॥
देहान्ते नरकं प्राप्य पापशेषादसौ पुनः ।
कुण्डलिन्याख्यनद्यास्तु तोये मण्डूकतां गतः ॥९१॥
ततः क्षीरनदीसङ्गाद् द्विजो मण्डूकरूपभृत् ।
तन्नदीडुण्डुभग्रस्तः पूर्वज्ञानतनूरभूत् ॥ ९२ ॥
तद्राजिलज्ञानयोगाद्द्विजे कैवल्यसद्गतिम् ।
तस्मात्क्षीराह्वया श्रेष्ठा नदीनां ज्ञानदायिनी ॥९३॥

मधुकैटभवधारम्भघट्टः

तन्नद्याश्चोत्तरे पार्श्वे पादयोजनमात्रतः ।
काञ्चीक्षेत्रं तपस्थानं प्रागुक्तं तत्र वर्तते ॥ ९४ ॥
तस्मिन् क्षेत्रे महाशक्तिस्त्रिधा रूपेण वर्तते ।
सा देवी ब्रह्मदेवस्य तपोविघ्नाय वै पुरा ॥ ९५ ॥
त्रिधा रूपं समाश्रित्य तत्तपोविघ्नमातनोत् ।
तत्कथां सम्प्रवक्ष्यामि सर्वपापप्रणाशिनीम् ॥ ९६ ॥
सुरथक्ष्मापते भक्त्या सावधानमनाश्शृणु ।
पुरा ब्रह्मा जगद्धाता लोकनाथः पितामहः ॥ ९७ ॥
स्ववंशजानां दैत्यानां मृतानां प्राणकांक्षया ।
तेषां वरार्जनार्थाय अमृतत्वप्रदाय च ॥ ९८ ॥
आसाद्य नगरीं काञ्चीं कामाक्षीसन्निधिं मुदा ।
सम्प्रविश्य महाशक्तिं कामाक्षीं तां समर्च्य च ॥ ९९ ॥
स्थित्वा तत्रैव स ब्रह्मा कर्णजौ मधुकैटभौ ।
तपोविघ्नविनाशार्थमनन्यागमनाय च ॥ १०० ॥

बहिर्द्वारे तु तौ स्थाप्य बिलस्थो रक्षणाय च ।
तपश्चकार भगवान् राक्षसानां समृद्धये ॥ १०१ ॥

कामाक्ष्यम्बायास्त्रिविधशक्तिस्वरूपनिरूपणम्

ततः कदाचित्कामाक्षी सर्वदैत्यनिकृन्तनी ।
दैत्येषु क्रोधमास्थाय तपोविघ्नाय वाक्पतेः ॥१०२॥
पृष्ठे तद्ब्रह्मदेवस्य मधुकैटभयोर्गता ।
स्वस्वस्थाने स्वरूपेण स्थित्वा साश्चर्यमायया ॥१०३॥
विष्णुरूपेण बाह्येऽस्मिन् स्थित्वा चक्रायुधेन च ।
ग्रीवाच्छेदं ततः कृत्वा हत्वा तु मधुकैटभौ ॥ १०४ ॥
स्वरूपस्याग्निदिग्भागे स्वरूपं वीक्ष्य संस्थिता ।
ततो ब्रह्मा तपोनिष्ठो मधुकैटभनिस्वनम् ॥१०५॥
यमबाधासुजनितं ध्वनिं दुःखेन नादितम् ।
आकर्ण्य धिगिति ब्रह्मा क्षणादुत्थाय तीव्रतः ॥१०६॥
द्वारदेशं समागत्य दृष्ट्वा तौ हतकन्धरौ ।
महान्तं कोपमाश्रित्य हन्तारं विचिकाय सः ॥१०७॥
गतं तीव्रेण भयतः शंखचक्रगदाधरम् ।
दूरतोऽनलदिग्भागे गत्वा तत्रोपसंस्थितम् ॥१०८॥
दृष्ट्वा हन्ता स एवेति परं निश्चित्य पद्मभूः ।
गत्वा तस्य समीपे तु तं हन्तुं स पितामहः ॥१०९॥
कोपेन सहितो ब्रह्मा करे ब्रह्मास्त्रमानयत् ।
ततः पितामहं विष्णुश्शत्रुसंहारितेजसम् ॥११०॥
युद्धायोद्युक्तकोपाढ्यं करे ब्रह्मास्त्रसंयुतम् ।
दृष्ट्वा प्रणम्य शिरसा पुनरुत्थाय केशवः ॥१११॥



नाहं हन्ता तयोर्ब्रह्मन्नियन्ता भगवान्हरः ।
मधुकैटभसंहारं कृत्वाद्यैव विनिर्ययौ ॥ ११२ ॥

अवलोकय ते पृष्ठे रुद्रं तं तीव्रतो गतम् ।
इत्युक्त्वाथ स्वहस्ताभ्यां सूचयन् तमुमापतिम् ॥११३॥

स्थित एवात्मनः स्थाने ब्रह्मपृष्ठे हरात्मकः ।
भूत्वा जगाम त्वरया तस्य वायव्यभागतः ॥ ११४ ॥

ततो ब्रह्मा हरेर्वाक्यं श्रुत्वा वायव्यभागके ।
वीक्षमाणो महादेवं कालकालमघोरकम् ॥ ११५ ॥

कपालशूलहस्ताढ्यं भीमं भैरवरूपकम् ।
तदा कोपेन स ब्रह्मा रुद्रान्तिकमुपाययौ ॥ ११६ ॥

ततो ब्रह्माणमायान्तं कोपसंरक्तलोचनम् ।
सम्प्रेक्ष्य भगवान् रुद्रो धृतपाशुपतास्त्रकः ॥ ११७ ॥

अव्यक्ततेजसा तत्र बभौ तत्र क्षणेन वै ।
व्योम्नि लीनं महादेवं दृष्ट्वा किं चित्रमित्यपि ॥ ११८ ॥

स विचिन्त्य ततो ब्रह्मा नैव पश्यन्महेश्वरम् ।
विष्णोस्स्थानं पुनर्ब्रह्मा समागच्छत्ततो हरिः ॥ ११९ ॥

अव्यक्ततेजसा तत्र बभौ सोऽपि जनार्दनः ।
तत्र व्योम्नि गतं दृष्ट्वा किं चित्रमिति तत्र तु ॥ १२० ॥

विचिन्त्य भीत्या स ब्रह्मा स्वप्राणत्राण उद्यतः ।
तत्परित्यज्य सहसा भेजे स्वभवनं भयात् ॥ १२१ ॥

पश्चात्काञ्चीमहाक्षेत्रे त्वव्यक्तज्योतिरात्मकः ।
स शिवश्शंकरश्शंभुर्महाप्रळयके विभुः ॥ १२२ ॥

चूतबीजाकृतिर्भूत्वा बभावेकाम्रसंज्ञया ।
तथैव भगवान्विष्णुस्तेजसा व्यक्तविग्रहः ॥१२३॥

ब्रह्माश्वमेधयागाग्नौ बभौ वरद इत्यपि ।
तस्माद्विष्णुमहादेवौ तावुभौ शक्तिरेव हि ॥१२४॥

सा शक्तिस्तत्र कामाक्षी त्रिविधा तत्र सा परा ।
तस्या विलासस्त्रिविधः हरिशक्तीशभेदतः ॥१२५॥

तस्मादयं पुराणे तु मार्कण्डेयाभिधे शुभे ।
श्री विद्याभिख्यखण्डे च त्रिपीठस्य प्रभावके ॥१२६॥

तेषु प्रथमपीठस्य प्रभावोऽयं नृपोत्तम ।
कामाक्ष्यास्तु विलासोयं काञ्ची महात्म्यमुत्तमम् ॥ १२७ ॥

अयं ग्रन्थः पुराणेषु रहस्यं मुनिभिस्स्मृतम् ।
षट्छताधिकसाहस्रग्रन्थैश्च परिपूरितम् ॥१२८॥
तव स्नेहान्मया प्रोक्तं रहस्यं त्विष्टकामदम् ।
तत्पुराणेन चाद्यापि काञ्च्यां सर्वं प्रतिष्ठितम् ॥१२९॥

तस्मात्क्षेत्रे तु यो दद्यान्मुष्टिमात्रं धनं द्विजे । मत्रौवर्न
कुरुक्षेत्रे तुलादानाद्यत्फलं तत्फलं लभेत् ॥१३०॥

एतद्रहस्यमाख्यातं काञ्चीक्षेत्रप्रकाशकम् ।
यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ॥ १३१ ॥

काञ्च्यामन्नप्रदानेन यत्फलं तत्फलं लभेत् ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
कामाक्षीविलासे काञ्चीक्षेत्रप्रकाशको नाम प्रथमोऽध्यायः ॥

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

## द्वितीयाऽध्यायप्रारम्भः

वपापरिमळोल्लास वासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥ १ ॥

इति स्तुत्वा नमस्कृत्य वरदस्य मुखश्रियम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच–

काञ्च्यां
काञ्च्यां वरदराजक्षेत्र निरूपणम्

अथ तत्र नृपश्रेष्ठ काञ्चीनगरभूतले ।
क्षेत्राङ्गिकाख्यदुर्गायास्त्वाग्नेये पञ्चविंशतः ॥ ३ ॥

पौरन्दरेशस्तत्रास्ते तद्दक्षे पञ्चविंशके ।
आस्ते पाञ्चालिनी तस्याः प्रत्यग्द्वात्रिंशदंशतः ॥४॥

अस्ति सिंहालयस्तस्योदीच्यां द्वात्रिंशदंशके ।
तत्र क्षेत्राङ्गिका दुर्गा प्रागुक्ता सा च वर्तते ॥ ५ ॥

एतच्चतुर्दिङ्मध्यस्थं वासस्थानं सदा हरेः ।
तस्माद्यत्तद्धरिक्षेत्रं काञ्च्यामाग्नेय भूतलम् ॥ ६ ॥

योे ददाति हरिक्षेत्रे दानं याथार्थ्यभावतः ।
कोटिदानफलो भूत्वा विष्णुलोकं स गच्छति ॥ ७ ॥

पुण्यकोटिक्षेत्रनिलयविघ्नेश्वरस्कन्ददुर्गादीनां स्थाननिरूपणम् ॥

दानानां पुण्यतात्पर्यात्तत्कोटिगुण संख्यया ।
पुण्यकोटीति विख्यातं हरिक्षेत्रधरातलम् ॥ ८ ॥

तत्र क्षेत्राङ्गिदुर्गाया वह्नौ द्वात्रिंशदंशके ।
दक्षिणावर्तविघ्नेशो वर्तते सर्वकामदः ॥ ९ ॥

अविघ्नाय पुरा ब्रह्मा वाजिमेधे तमर्चयत् ।
तत्पूर्वभागे त्वेकांशे कुमारः कृत्तिकात्मजः ॥ १० ॥

साधनाय साधकाय पुरा धात्रा वाजिमेधे समर्चितः ।
तस्य दक्षे द्वितीयांशे दुर्गा पाञ्चालिका स्मृता ॥ ११ ॥

सुवासिन्यर्चनप्रीता स्थिता ब्रह्माऽश्वमेधके ।
तस्याः पञ्चदशांशे तु वाते क्षेत्राङ्गिकाभिधा ॥ १२ ॥

पुरा हयासुरं हत्वा गतयज्ञाश्वदा विधेः ।
तस्य याम्ये दशांशेतु चण्डिका कम्बुधारिणी ॥ १३ ॥

हरिं तत्र समाराध्य विष्णुना शंखधारिणी ।
तस्या आग्नेयकोणेऽष्टचत्वारिंशांशमात्रतः ॥ १४ ॥

बाणाम्बिकेति विख्याता तद्ग्रामपरिरक्षिणी ।
तस्या याम्ये तु वेदांशे पुण्यकोटीश्वरश्शिवः ॥ १५ ॥

ब्रह्मणाऽऽराधितः पूर्वं स्वयम्भूः परमेश्वरः ।
तस्य वायव्यदिग्भागे मणिकण्ठेश्वरश्शिवः ॥ १६ ॥



पुरा विध्यश्वमेधाय औद्गाता वाग्धरो हरः ।
तस्य सौम्ये दशांशेतु सत्यनाथेश्वरश्शिवः ॥१७॥

शक्रेणाराधितः पूर्वमिन्द्रस्याक्षिसहस्रदः ।
तस्योत्तरे द्वादशांशे हरिस्तत्र दिगम्बरः ॥ १८ ॥

यथोक्तकारि प्रभृतिविष्णुमूर्तीनां स्थान निरूपणम्

पुरा वाणीदर्पहरो मूलवच्छयनाकृतिः ।
तस्य वह्नौ तु पञ्चांशे गुहासिंहो जनार्दनः ॥ १९ ॥

महेन्द्रह्रन्मध्यगतो महेन्द्रेणैव पूजितः ।
तन्नैरृते तु पञ्चांशे विष्णुरष्टभुजाह्वयः ॥ २० ॥

मायाकाळीं क्षितौ क्षिप्य तस्या मूर्ध्नि निषण्णकः ।
तस्य वाते तु पञ्चांशे विद्याकुण्ड इति श्रुतः ॥२१॥

सरस्वत्यर्चिताकारस्तस्या मानप्रदायकः ।
तस्य दक्षे तु पञ्चांशे तत्र सिंहो जनार्दनः ॥ २२ ॥

पुरा कापालिकं हत्वा जीर्यदस्त्रोदरान्वितः ।
तस्योत्तरे तु सप्तांशे दीपाधारजनार्दनः ॥ २३ ॥

पुरा मायानलं हत्वा दीपवत्तत्करोद्धृतः ।
तस्यैकविंशे सौम्ये तु वैकुण्ठनिलयो हरिः ॥ २४ ॥

पुरा तुण्डीरभूपाय कृतवैकुण्ठदर्शनः ।
तस्य सौम्ये तु पञ्चांशे विद्रुमाभो जनार्दनः ॥२५॥

पुरा दैत्योदराद्रक्तपानाद्रक्तप्रभान्वितः ।
तस्य चाग्नेय दिग्भागे षट्चत्वारिंशदंशके ॥ २६ ॥

पुष्प शुश्रूषया भूमिः पतिं प्राप्ता चतुर्भुजम् ।
तस्य पूर्वे तु चैकांशे रुक्मराजतविग्रहौ ॥ २७ ॥

पुरा शक्रेण विन्यस्तौ तौ द्विजौ फल्लियुग्मकौ ।

### तत्त्वसोपान महादेवी पुण्यकोट्यनन्तर सरस्तीर्थादीनां स्थान विवरणम्

तयोर्याम्ये तु चैकांशे सोपानं तत्त्वसंख्यकम् ॥२८॥
पुरा मार्गाय तच्छैले रचितं देवशिल्पिना ।
तस्य प्रतीच्यामेकांशे महादेवीति पद्मजा ॥ २९ ॥

विवाहार्थं हरिं प्राप्य विष्णोरर्धासनं गता ।
तस्याश्चैशानभागेऽस्ति पुण्यकोटिविमानकम् ॥३०॥
तच्च विष्णुनिवासार्थं महेन्द्रेण प्रतिष्ठितम् ।
तस्य वाते द्वितीयांशे अनन्ताख्यं महासरः ॥३१॥

पुरा तत्त्वादिशेषस्य विश्वधारणसत्वदम् ।
दर्शनात्सर्वपापघ्नं स्पर्शनाद्वैष्णवप्रदम् ॥ ३२ ॥
मन्दवारे त्वनन्तस्य फलकृत्तत्पुरा नृप ।
अस्मिन्वारे तु यस्स्नायात्कावेरीफलभाग्भवेत्॥३३॥
इति तीर्थाय शेषेण वरो दत्तो नृपोत्तम ।
तस्य वाते द्वादशांशे तीर्थं भक्तोदयाभिधम् ॥३४॥
आस्ते तद्विष्णुभक्तानां विष्णोर्दर्शनदायकम् ।
दर्शनात्सर्वपापघ्नं स्पर्शनाद्विष्णुलोकदम् ॥ ३५ ॥
एकादश्यां तु तत्तोये यस्स्नायान्नृपशेखर ।
तस्मै देयाद्देवराजः क्षीराब्धिस्नानजं फलम् ॥३६॥



पुरा तीर्थाय भक्तैस्तु वरो दत्तो महीपते ।
तस्य सौम्ये तु चाष्टांशे तीर्थं पौरन्दराभिधम्॥३७॥

पुरा तद्देवराजस्य सहस्रनयनप्रदम् ।
दर्शनात्सर्वपापघ्नं स्पर्शनाद्वैष्णवप्रदम् ॥ ३८ ॥

बुधवारे महेन्द्रस्य फलकृत्तत्पुरा नृप ।
तस्मिन्वारे तु यस्स्नायाद्यमुनाफलभाग्भवेत् ॥३९॥

पुरा तीर्थाय देवेन्द्रो लब्धकामो वरं ददौ ।
पञ्चविंशांशतस्तस्य वह्नौ पाञ्चालिकाह्वयम् ॥४०॥

तत्र तीर्थे कालिकायै विष्णुदत्तं सुदर्शनम् ।
दुर्गायाश्श्रवणे ऋक्षे फलकृत्तत्पुरा नृप ॥ ४१ ॥

श्रविष्ठायां तु यस्स्नायाद्विरजास्नानपुण्यभाक् ।
पुरा तया च तीर्थाय इति दत्तो वरो नृप ॥ ४२ ॥

एवं क्रमाद्धरिक्षेत्रे एको विघ्नेश्वरस्तथा ।
स्कन्दस्तत्र चतुर्दुर्गास्त्रयो रुद्रा जनार्दनाः ॥ ४३ ॥

अष्टौ मुद्रास्तु तत्पञ्च चतुस्तीर्थाण्यनुक्रमात् ।
अद्यापि शासनाद्विष्णोर्वर्तन्ते तद्धरातले ॥ ४४ ॥

### हरिक्षेत्रनिवासिनां प्रभावकथनम्

ये वसन्ति हि तत्क्षेत्रे सर्वे वैकुण्ठवासिनः ।
तस्माद्भूलोकवैकुण्ठं काञ्च्यामाग्नेयभूतलम्॥४५॥

तस्य क्षेत्रस्य सुरथ पञ्चनामानि भूतले ।
हरिक्षेत्रं पुण्यकोटिर्वैकुण्ठं हस्तिशैलकम् ॥ ४६ ॥

त्रिस्रोत इति पञ्चैतन्नामानि विदितानि च ।
यो वसेत्तद्धरिक्षेत्रे क्षणार्धं वा तदर्धकम् ॥ ४७ ॥

मुच्यते सर्वपापेभ्यस्साक्षाद्विष्णुर्नराकृतिः ।
पुरा तत्क्षेत्रनिलया बहवोप्युपकारतः ॥ ४८ ॥

निर्जन्मनरकाश्चान्ते गतास्ते वैष्णवं पदम् ।

हरिक्षेत्रस्थगर्ग्याख्य ब्राह्मणोपाख्यानम्

तेषु कश्चित्पुरा विप्रस्सिन्धुतीरनिवासकः ॥ ४९ ॥

वसिष्ठगोत्रसम्भूतो ऋग्वेदी बाणकुण्डगः ।
नाम्ना गर्गिरिति ख्यातस्स पापी हीनकर्मकः॥५०॥

सन्ध्याहीनो नाग्निहोत्री पितृदेवविवर्जितः ।
परार्थसंग्रहे विद्वान् परदाररतस्सदा ॥ ५१ ॥

परान्नभोक्ता सततं दुराचाररतस्सदा ।
स विप्रश्चैत्रके मासि धात्रीवृक्षे पथि स्थिते ॥५२॥

आरुह्य तत्फलं गृह्णंस्तत्र काञ्चीद्विजोत्तमम् ।
यात्रार्थमागतं दृष्ट्वा पिपासुं ब्राह्मणोत्तमम् ॥ ५३ ॥

दाहोपशमनार्थाय धात्रीफलमनुत्तमम् ।
तस्मै च प्रददौ गर्गिर्दर्शयामास चोदकम् ॥५४॥

ततस्तत्फलमादाय काञ्चीवासी द्विजोत्तमः ।
फलं भुक्त्वा जलं पीत्वा तत्फलेनापि चाम्भसा॥५५॥

क्षुत्पिपासाविरहितो यात्रार्थं स द्विजो गतः ।
अथ गर्गिर्गृहं गत्वा फलभारसमन्वितः ॥५६॥



सुखेन न्यवसत्तत्र बाणकुण्डाख्यपत्तने ।
स कदाचिद् द्विजो गर्गिर्मृतस्तत्राङ्गनान्वयात्॥५७॥

ततो यमभटा एत्य महापापीति वाक्यतः ।
बध्वा विप्रं च तं गर्गिं यमपाशेन तत्क्षणात् ॥ ५८ ॥

मुसलैस्ताडयन्तस्ते यमलोकाय तं भटाः ।
जगृहुस्तत्र तत्काले समागत्य हरेर्गणाः ॥ ५९ ॥

तान् भटांस्ते समुच्चाट्य निष्पापी बहुपुण्यवान् ।
इत्युक्त्वा गर्गिमादाय यमपाशविमोचितम्॥ ६० ॥

समारोप्य विमाने स्वे मोदेनैव हरेर्गणाः ।
विष्णुलोकं समासाद्य पादाब्जेऽयोजयन् हरेः॥६१॥

ततः पितृपतिश्श्रुत्वा विष्णुदूतैर्हृतं च तम् ।
स्वपाशबन्धनान्मुक्तमानेतुं कोपसंयुतः ॥ ६२ ॥

तत्क्षणात्प्राप्य वैकुण्ठं विप्रं विष्णुपदाश्रितम् ।
दृष्ट्वा दण्डधरः प्राह विष्णुं तद्रक्षणे रतम् ॥ ६३ ॥

यम उवाच--

एष पापी द्विजो मत्तस्सदा सत्कर्मवर्जितः ।
न कदाचित्पुण्ययुक्तः कर्महीनो द्विजाधमः॥ ६४ ॥

तस्माद्विमुच्यतां विप्रो नरकाय त्वया हरे ।

भगवानुवाच--

भूमण्डले हरिक्षेत्रे ये वसन्ति नरोत्तमाः॥ ६५ ॥ द्विजोत्तमाः

अहमेव हि ते सर्वे तस्मात्तत्क्षेत्रवासिने ।
धात्रीफलमदादेकं पानीयं च द्विजन्मने ॥ ६६ ॥

ततस्तत्फलमादाय भुंत्त्वा तद् द्विजपुङ्गवः ।
पीत्वा पीत्वाः तीर्थं दाहशान्त्यै यात्रार्थं स द्विजो गतः ॥ ६७ ॥

तत्फलं चापि मत्कुक्षौ दाहशान्त्या प्रशस्यते ।
तस्य पुण्यप्रभावेन निष्पापस्समभूदयम् ॥ ६८ ॥

मम भक्तो द्विजश्रेष्ठस्सदा सत्कर्मसंयुतः ।
तस्मात्तस्य तु धर्मेश नरको नास्ति कश्चन ॥ ६९ ॥

तस्मात्त्वं गच्छ शीघ्रेण भवनं धर्मराज ते ।
इत्याकर्ण्य यमस्तत्र प्रणनाम हरिं तदा ॥ ७० ॥

विप्रं चापि प्रणम्याथ यमस्स्वभवनं ययौ ।
तस्मात्तत्र हरिक्षेत्रे यो वसेत्स नरो हरिः ॥ ७१ ॥

तस्माद् भूलोकवैकुण्ठं हरिक्षेत्रधरातलम् ।
एतद्रहस्यमाख्यातं हरिक्षेत्रप्रकाशकम् ॥ ७२ ॥

यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ।
हरिक्षेत्रनिवासेन यत्फलं तत्फलं लभेत् ॥ ७३ ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
कामाक्षीविलासे हरिक्षेत्रमहात्म्यकथनं नाम द्वितीयोऽध्यायः ॥

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

## तृतीयाध्यायप्रारम्भः

पुण्यकोटिविमानाङ्कं तत्वसोपानभूषितम् ।
नारसिंहाधिष्ठितगुहं हस्तिशैलं नमाम्यहम् ॥ १ ॥

इति स्तुत्वा नमस्कृत्य चाथ वारणशैलकम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

हस्तिशैलप्रभावः ॥

अथ तत्र नृपश्रेष्ठ हरिक्षेत्रधरातले ।
पाश्चालिकातीर्थराजवार्ते चांशद्वयात्मके ॥ ३ ॥

हस्तिशैलो महापुण्यो वर्तते पर्वतोत्तमः ।
गजाभिधेयकश्शैलो हरिक्षेत्रस्य भूषणम् ॥ ४ ॥

पुण्यकोट्यां निवासेन पुण्यकोटिरिति श्रुतः ।
पुरा महेन्द्रशापेन पर्वतोऽभूद्गजोत्तमः ॥ ५ ॥

तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ।
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ६ ॥

पुरा सरस्वती लोके विद्यानां मूलकारणात् ।
स्वयं लोके वरा चेति हृदि कृत्वा वरोन्मदात् ॥ ७ ॥

तथा लक्ष्मीर्हरेः पत्नी लोकानां भाग्यकारणात् ।
स्वयं लोके वरा चेति हृदि कृत्वा वरोन्मदात् ॥८॥

परस्परविवादात्ते स्वस्वोत्कर्षनिमित्ततः ।
स्वर्गलोकं तदा गत्वा चावयोः का वरा त्विति॥९॥

यथार्थं ब्रूयतां शक्र निष्पक्षादावयोरपि ।
इति पप्रच्छतुश्शक्रं ततश्श्रीर्भारती च ते ॥ १० ॥

तदा सुराधिपो वज्री तयोर्लक्ष्मीर्विशिष्यते ।
वरा लक्ष्मीर्भाग्यमूला लोकानां च तथा विधेः॥११॥

जननी विष्णुपत्नीत्वात्तव श्वश्रूस्सरस्वती ।
लक्ष्मीर्वरेति तत्त्वेन भारती तेन चोदिता॥१२॥

ततस्तयोस्तु वाणी तमशपत्पक्षपाततः ।
स्वश्रियस्स्थापनार्थाय परां मत्वा तु पद्मजाम् ॥१३॥

अन्यायेनोक्तवान् यस्मात्तस्मान्न्यायविवर्जितः ।
अहंकारी श्रियोन्मत्तो दुष्टात्मा मूढधीर्वृषा ॥ १४ ॥

इति संचिन्त्य सा वाणी शशापेन्द्रं गजाकृतिम् ।
ततो लक्ष्मीर्महेन्द्राय कृपया शापमुक्तये ॥ १५ ॥

दृष्ट्वा न्यायाधिपं शक्रमिदं वचनमब्रवीत् ।

लक्ष्मीरुवाच--

देवेन्द्र शृणु मद्वाक्यं तव शापविमुक्तये ॥ १६ ॥



भूलोके दण्डकारण्यं गत्वा सिंहाचलोत्तमे ।
तत्र प्रह्लादको नाम बालो भागवतोत्तमः ॥ १७ ॥

अस्ति तत्र तु तं प्राप्य तस्य वक्त्रारविन्दतः ।
शीघ्रसिद्धिप्रदं मन्त्रं द्वात्रिंशद्वर्णसंयुतम् ॥ १८ ॥

संगृह्य मन्त्रराजानं नारसिंहमहामनुम् ।
तदेकध्यानतश्शक्र दिव्यज्ञानं प्रजायते ॥ १९ ॥

तद्ज्ञानकुशलत्वं हि हरिक्षेत्रप्रवेशदम् ।
अवशाच्च भवेत्तत्र मन्नामध्यानमुत्तमम् ॥ २० ॥

तेनैव मत्प्रियस्सिंहस्तव शापं विमोक्ष्यति ।
तस्मात्कारुण्यतः प्रोक्तमविळम्बेन तत्कुरु ॥ २१ ॥

इत्येवमुक्त्वा शक्राय रमा मङ्गळदेवता ।
सह वाण्या महालक्ष्मीर्वादाद्ब्रह्मपुरीं गता ॥ २२ ॥

ततश्चेन्द्रो गजो भूत्वा महालक्ष्मीवचोनुगः ।
तदा प्रह्लादकं प्राप्य तस्य वक्त्रारविन्दतः ॥ २३ ॥

संगृह्य मन्त्रराजानं तदेकध्यानपूर्वकम् ।
काञ्चीपुर्यां हरिक्षेत्रं प्रविवेश गजाकृतिः ॥ २४ ॥

महेन्द्रहृद्गतो विष्णुर्ध्यानरूपो नृसिंहकः ।
गजदेहगतं शक्रं बध्वा हस्ताम्बुजैर्हरिः ॥ २५ ॥

तन्नागहृदयं भित्वा बहिरेत्य सुराधिपम् ।
तद्गजं वीक्ष्य शैलाभं कृत्वा तत्पुण्यभूतले ॥ २६ ॥

निवासकाम्यया सिंहः पुनश्शैलोदरं विशन् ।
बिम्बाकृतिस्ततो भूत्वा प्रबभौ योगवेषतः ॥ २७ ॥

ततश्चेन्द्रस्सुरपतिस्समभ्यर्च्य मृगेश्वरम् ।
स्वलोकाय ततश्शक्रो गन्तु निश्चित्य संस्थितः ॥२८॥

ततश्शैलोत्तमे विप्रौ बालकौ दिव्यसुन्दरौ ।
दृष्ट्वा विस्मयतश्शक्रो वचनं चेदमब्रवीत्॥ २९ ॥

वरदराजदेवालयस्थ फल्लियुग्मकथारम्भः

इन्द्र उवाच--

वदतां मे युवां विप्रबालकौ वेदनिर्भरौ ।
यत्राश्रमस्तु वामत्र किमर्थं चागतौ युवाम् ॥ ३० ॥

कदा शैलसमारूढौ तन्मे ब्रूतं द्विजोत्तमौ ।

विप्रावूचतुः--

शृङ्गिबेरसुतौ विप्रौ हेमशुक्लाभिधानकौ ॥ ३१ ॥
शाण्डिल्यगोत्रसंजातौ सूत्रे वैखानसाह्वयौ ।
तत्सूत्रशास्त्रे निपुणौ बालकौ ब्रह्मचारिणौ ॥ ३२ ॥

गौतमस्य तु सच्छिष्यौ नौ गुरुर्विष्णुभक्तिमान् ।
नौ गुरुर्विष्णुपूजार्थमावां भद्राचलं समम् ॥ ३३ ॥

आपूर्य कुम्भमादाय कोङ्कणस्याश्रमे शुभे ।
अनाच्छादनतस्स्थाप्य समिदर्थं द्विजद्रुमम् ॥ ३४ ॥

आरुह्य समिदं तत्र गृहीत्वा समुपागतौ ।
तत्कुम्भतीर्थे त्ववशात्पतत्कुशफल्लिकः ॥ ३५ ॥

तं दृष्ट्वा पाददकोपादनाच्छादनतश्च नौ ।
अशपत्फल्लिरूपेण तेनावां फल्लिरूपकौ ॥ ३६ ॥



तद्वृक्षसंस्थितौ पश्चात्तव तुण्डप्रचेष्टया ।
छिन्नवृक्षान्निपतितौ तव पृष्ठे गजात्मनः ॥ ३७ ॥

आवान्तु धृत्वा देवास्त्वं हरिक्षेत्रमवीविशः ।
नौ शापमुक्तिरभवदस्य क्षेत्रस्य वैभवात् ॥ ३८ ॥

इत्येवमुक्त्वा विप्रेन्द्रौ प्रणम्य शिरसा हरिम् ।
विहाय फल्लिरूपं तौ यथा स्वभवनं गतौ ॥ ३९ ॥

एवमाकर्ण्य देवेन्द्रो हस्ताभ्यां फल्लियुग्मकम् ।
धृत्वा दृष्ट्वा तु तच्चैलं विप्रयोरुपकारकम्॥ ४० ॥
मुदा शैलाय देवेन्द्रो दत्तवान्वरमुत्तमम् ।
एकादश्यामहोरात्रं विष्णोस्संकीर्तनेन च ॥ ४१ ॥

यत्फलं तत्फलं नृणां हस्तिशैलस्य दर्शनात् ।
इति दत्वा वरं शक्रो गतस्स्वभवनं मुदा ॥ ४२ ॥

स्वदेवतायास्सदने कृत्वा तत्फल्लिलांछनम् ।
स्वपीठे तु यथा पूर्वं तदा देवपतिर्बभौ ॥ ४३ ॥

काञ्च्यां हस्तिगिरिस्तत्र हरिक्षेत्रे तदादितः ।
आस्ते तत्पर्वतं दृष्ट्वा बहवो मोक्षकांक्षिणः ॥ ४४ ॥

महिम्ना तस्य शैलस्य गतास्ते वैष्णवं पदम् ।

गणुब्राह्मणोपाख्यानम्

तेषु कश्चित्पुरा विप्रस्सरयूतीरमन्दिरः ॥ ४५ ॥
भारद्वाजकुलोद्भूतश्शुक्लवेदी महीसुरः ।
विप्रो गणुरितिख्यातः पापी कर्मविवर्जितः ॥ ४६ ॥

जीवितश्चोरकृत्येन शुद्धवेषधरो बहिः ।
ऊर्ध्वपुण्ड्रवनाक्षाढ्यो वेदविद्याविशारदः ॥४७॥
धनुर्विद्यासु निरतः प्रत्यहं स नरो द्विजः ।
यात्रापदे सदा स्थित्वा स्वयं यात्रार्थवेषतः॥ ४८ ॥
यात्रार्थं ये समायान्ति स तैर्युक्तश्शठाग्रणिः ।
शैलं वनं दुर्गमं वा वीक्ष्य कार्मुकविद्यया ॥ ४९ ॥
हत्वा तान् सर्ववस्तूनि हृत्वा दस्युपथेन च ।
गृहं गत्वा जीवतीत्थं प्रत्यहं स नरः क्रमात् ॥५०॥
कदाचित्स नरस्तत्र निकृत्या नैमिशे वने ।
वीरेण बद्धः केनापि छिन्नयज्ञोपवीतकः ॥ ५१ ॥
क्षुरप्रेणालूनशिखो नष्टमानोन्नतिर्द्विजः ।
याम्यां दिशं प्रयाहीति तेनाबध्य विसर्जितः॥५२॥
यात्राकाले स वै विप्रस्तत्कोलाख्ये पुरे शुभे ।
समागतो हस्तिशैलं दृष्ट्वा सद्यो मृतिं गतः ॥५३॥
ततो वारणशैलस्य दर्शनात्पापवर्जितः ।
विष्णुदूतैर्विमानेन नीतो विष्णुपदं गतः ॥५४॥
तस्माद्वारणशैलोऽसौ पुण्यराशिर्नृपोत्तम ।
वर्तते च हरिक्षेत्रे दर्शनान्मुक्तिदायकः ॥ ५५ ॥
एतद्रहस्यमाख्यातं हस्तिशैलप्रभावयुक् ।
यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ॥ ५६ ॥
दर्शनाद्धस्तिशैलस्य यत्फलं तत्फल लभेत् ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
कामाक्षीविलासे हस्तिगिरिप्रभावो नाम तृतीयोऽध्यायः ॥

॥ श्रीरस्तु ॥

# ❀ श्री कामाक्षीविलासः ❀

## चतुर्थाध्यायप्रारम्भः

ब्रह्मयागसमुद्भूतं दिव्यमाणिक्यसुन्दरम् ।
जगत्सृष्टिकरं देवं तमहं वरदं भजे ॥ १ ॥

इति स्तुत्वा नमस्कृत्य चाथ श्रीवरदप्रभुम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

वरदराजमहिमारम्भः

अथ तत्र नृपश्रेष्ठ हरिक्षेत्रधरातले ।
तस्य वारणशैलस्य शृङ्गे देवाधिराजकः ॥ ३ ॥

वर्तते वरदस्तत्र जगन्मोहनविग्रहः ।
शङ्खचक्रगदाभीतीर्दधानश्श्यामलाकृतिः ॥ ४ ॥

सर्वभूषाभूषिताङ्गो नीलमाणिक्यसुन्दरः ।
दिव्यपद्मदलोद्भासिनयनद्वयशोभितः ॥ ५ ॥

श्रीवत्सश्रीधरश्श्रीमान् शृंगाररसशेवधिः ।
सचामररमाभूम्यां सव्यदक्षिणयोर्युतः ॥ ६ ॥

पद्मनाभो रत्नगर्भः किरीटी कुण्डलोज्वलः ।
पुण्यकोटयां निवासेन पुण्यकोटि पदान्वितः ॥ ७ ॥

अभीष्टवरदो विष्णुः पुरा पद्मासनाय च ।
सृष्टिदण्डप्रदाता च विश्वसर्जनहेतवे ॥ ८ ॥

तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ।
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ९ ॥

सरस्वती लक्ष्मी विवादकथारम्भः

पुरा श्रीभारतीदेव्यौ स्वस्वोत्कर्षविवादतः ।
गत्वा महेन्द्रं विशयं पप्रच्छतुरिमे तदा ॥ १० ॥

ततस्सुराधिपश्शक्रस्तयोर्लक्ष्मीर्विशिष्यते ।
इत्युक्तमात्रात्सा वाणी दत्वा शापं शचीपतेः॥११॥

त्यक्त्वेन्द्रस्य वचस्तत्र परिगृह्य हरिप्रियाम् ।
गत्वा पद्मासनं पश्चात्पप्रच्छोत्कर्षतां स्वयोः ॥१२॥ उत्कृष्टतां

ततो ब्रह्मा जगद्धाता तयोर्लक्ष्मीं विशिष्य हि ।
यथा शक्रोऽवदत्पूर्वं तथा ब्रह्माप्युदीरयत् ॥१३॥

ततः कोपेन महता तस्य पत्नी सरस्वती ।
तस्य हस्तधृतं दण्डं स्वांशजं सृष्टिनामकम् ॥ १४ ॥

प्रदत्तं विष्णुना पूर्वं सृष्टिकार्यादिमं गुरुम् ।
गृहीत्वा तस्य वपुषश्चकार स्वांशके लयम् ॥ १५ ॥

ततो ब्रह्मा जगद्धाता सृष्टिदण्ड विवर्जितः ।
अज्ञो भूत्वा सृष्टिकर्मण्यसृष्टेस्सर्वयोनिषु ॥ १६ ॥



अनुत्पन्नप्रजान् लोकान् दृष्ट्वा सृष्टचै पुनर्विधिः ।
अनालोक्य मुखं वाण्याः भारत्यै क्रोधमूर्छितः॥१७॥

सृष्टिदण्ड प्राप्त्यै विष्णुं प्रति ब्रह्मकृत तपश्चर्याघट्टः

हिमालयं ततो गत्वा स्थित्वा ध्यात्वा हरिं मुदा ।
तपः कृत्वा हरिं दृष्ट्वा त्यक्त्वा वृण्यंशदण्डकम्॥१८॥ वाण्यंश

विष्णोरंशेन यद्दण्डं विधिर्दण्डमयाचत ।
ततो विष्णुर्जगन्नाथो दृष्ट्वा पद्मासनं विधिम् ॥१९॥

तपसा ब्रह्मणे प्रीत इदं वचनमब्रवीत् ।

भगवानुवाच--

गतवेळावृतखण्डं त्वं हयमेधशतं कुरु ॥ २० ॥

नचेत्काञ्च्यां हस्तिशैलं शैलानामुत्तमोत्तमम् ।
सम्प्राप्य तस्य शैलाग्रे कुरु चैकाश्वमेधकम् ॥ २१ ॥

कृतेनैकाश्वमेधेन हयमेधशतेन तु ।
या प्रीतिस्सा भवेन्मह्यं विधे तत्र न संशयः॥ २२ ॥

निजभावेन तत्राहं यागाग्नौ सम्भवंश्च ते ।
दण्डं दास्यामि सर्गाख्यं ममांशेनैव निर्मितम्॥२३॥

तस्मात्त्वं शतमेधं वा एकं ते रोचते यथा ।
कुरुष्व च मदीयोक्त्या तव दण्डं(ण्डो) भविष्यति॥२४॥

इत्येवमुक्त्वा भगवान् गतवानत्र मायया ।
ततो ब्रह्मा त्वशक्त्या तु अश्वमेधशताय च॥ २५ ॥

चतुर्मुखकृताश्वमेध प्रारम्भः

एकाश्वमेधमुद्दिश्य हरिक्षेत्रं प्रविश्य च ।
शालाकुण्डानि विधिवत्कारयन्देवशिल्पिना ॥२६॥

शैलस्य पश्चिमे भागे नारसिंहाग्रसन्निधौ ।
प्राधान्यकुण्डमाश्रित्य यागार्थन्तु ततो विधिः॥२७॥

स्वपत्नीं भारतीं त्यक्त्वा कुपितां दिव्यसुन्दरीम् ।
देवान् देवर्षिमुख्यांश्च गन्धर्वान् यक्षकिन्नरान्॥२८॥

अप्सरस्सिद्धसाध्यांश्च समाहूय गणैस्सह ।
समाकृष्य तु तांस्तत्र मुनिदेवगणैर्युतः ॥ २९ ॥

ग्रामदेवीं गणाध्यक्षं क्षेत्रेशं योगसिंहकम् ।
निर्विघ्नाय समभ्यर्च्य प्रार्थनापूर्वकं विधिः॥ ३० ॥

संवत्सरव्रतोद्देशाद्ध्यांघ्रियजनोदितान् ।
जित्वा शत्रूनश्वमेधे यक्षगन्धर्वराक्षसान् ॥ ३१ ॥

अश्वरत्नं समादाय सर्वाभरणभूषितम् ।
नीलपिङ्गांशुकं दिव्यं बद्धार्णस्वर्णपट्टकम् ॥ ३२ ॥

शालायां मुख्यकुण्डाग्रे बध्वा यूपे प्रधानके ।
विमोच्य लोचनं तस्य तच्चक्षुरिति मन्त्रतः ॥३३॥

षड्भिर्यवांशकैः पश्चात् षड्भिश्चैव गवांशकैः ।
हुत्वा यागांगदेवेभ्यस्सपत्नीं बुद्धिविश्रुताम् ॥३४॥

स्वधर्मपत्नीं पीठाय साधकाय गुहं तथा ।
उद्घावारं हरं कृत्वा सोमाय वरुणं तथा ॥ ३५ ॥



शक्राय धर्मराजं च शताह्वीकं पुरोहिते ।
संगृह्य वाजिमेधायाऽकरोद्यत्नं पितामहः ॥ ३६ ॥

ततस्सरस्वतीदेवी नाहूता ब्रह्मणा तदा ।

अश्वमेधविघ्नार्थं कुपित सरस्वतीकलितमायानलोत्पत्तिः

दीपप्रकाशकाष्टभुजाख्यविष्णववतारघट्टः

सपत्नीशक्तियुक्ताय ब्रह्मणे क्रोधमूर्छिता ॥ ३७ ॥

अश्वमेधविनाशाय साग्निं कृत्वा स्वमायया ।
पयोष्णीतीरमाश्रित्य मुमोचाग्निं सरस्वती ॥३८॥

ततो मायानले तत्र ब्रह्मयागजिघांसया ।
कालाग्निवत्समायाते हरिक्षेत्रधरातले ॥ ३९ ॥

ब्रह्मणे दयया विष्णुः यज्ञसंरक्षको हरिः ।
तद्यज्ञरक्षणार्थाय कराभ्यां तं हुताशनम् ॥ ४० ॥

बध्वा तं दीपवत्कृत्वा कराग्रे धृतवान् हरिः ।
ततः कापालिकं चास्त्रं सिंहरूपेण भक्षितम् ॥ ४१ ॥

पश्चात्पीत्वा दैत्यरक्तं विद्रुमप्रभया बभौ ।
पश्चात्स कालिकां बध्वा हस्तैरष्टभिरच्युतः ॥४२ ॥

क्षितौ प्रक्षिप्य तां काळीं तस्या मूर्धोपरि स्थितः ।
एवं कृतं समालोक्य विष्णुना सा सरस्वती ॥४३॥
कोपेन महता देवी गत्वा विद्यापुरीं शुभाम् ।

सरस्वत्याः वेगवतीनदीरूपताऽविर्भाव कथा

नदीप्रवाहरूपेण समागत्यातिवेगतः ॥ ४४ ॥

नन्दिशैलं प्रविश्याथ श्रीपयोम्बुधिमाश्रिता ।
पश्चाद्भिन्ना सरिद्रूपा महाप्रळयभावतः ॥ ४५ ॥

ब्रह्माश्वमेधनाशाय स्वयमेव समागता ।
ततो विष्णुर्जगन्नाथो दृष्ट्वा तत्प्रळयोदकम् ॥४६॥

सरस्वतीति तद्ज्ञात्वा ज्ञानदृष्ट्या ततो हरिः ।
स तस्या मानभङ्गाय हरिक्षेत्रं समाययौ ॥ ४७ ॥

स्वयं दिगम्बरो भूत्वा सरिन्मार्गे गतो हरिः ।
मूलवच्छयनं कृत्वा कृतकूलसरिद्वरः ॥ ४८ ॥

ततो भग्नातिदुःखाढ्या विष्णुना सावमानिता।
अनालोक्य सुखं विष्णोस्तदा प्राप्य बिलं क्षितौ॥४९॥

ततो पालाशिकाख्ये तु व्रते सांवत्सरान्तिके ।
तत्तद्यागाङ्गसत्वैश्च निर्वर्त्याङ्गस्य याजनम् ॥ ५० ॥

वपामादायचाश्वस्य यवांशैश्च गवांशकैः ।
घृतप्लाव्यं सुमैस्सार्धं चरुं च प्रणितास्पृशम्॥ ५१ ॥

प्रोक्षणीपूततोयाढ्यं स्रुवं संस्थाप्य स्रुग्वरैः ।
परिधिं चाष्टधा स्पृष्ट्वा मार्जनं वारिणापि च ॥५२॥

आच्छाद्याश्वलिबन्धेन यन्महेन्द्रदिशागतम् ।
तत्रज्योतिस्वरूपाढ्यं केशवं कमलेक्षणम् ॥ ५३ ॥

ध्यात्वा पितामहस्तत्राकरोत्पूर्णाहुतिं विधिः ।

श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः

**श्रीकाञ्ची - वरदराजः**

### श्रीवरदराजमूर्तेरवतारघट्टः

ततस्तस्मिंस्तु समये कल्पे श्वेतवराहके ॥ ५४ ॥

वैवस्वते मनौ वीततामसे पञ्चमे शुभे ।
युगे कृताख्ये भगवन्नारसिंहात्मके शुभे ॥ ५५ ॥

युवाब्दे मासि वैशाखे मेषस्थे भास्करे शुभे ।
शुक्लपक्षचतुर्दश्यां हस्तर्क्षे भास्करोदये ॥ ५६ ॥

तस्मिन् यागानले विष्णुः प्रसन्नः कमलापतिः ।
विधेः प्रीतिं समाश्रित्य स्वांशकं सृष्टिनायकम्॥५७॥

दण्डमादाय भगवान् ददौ तस्य विधेर्हरिः ।
ततो ब्रह्मा जगन्नाथं प्रणम्य शिरसा हरिम् ॥५८॥

केशवं मोहनाकारं यागानलसमुद्भवम् ।
दण्डं तद्विष्णुना दत्तं गृहीत्वाऽञ्जलिमुद्रया॥ ५९ ॥

निधाय हृदये तत्तु विस्मयानन्दनिर्भरः ।
आनन्दबाष्पनयनः पुलकांकितविग्रहः ॥ ६० ॥

तदेकध्यानयोगेन मुहूर्तं ध्यानमाविशत् ।
तदा देवाधिपश्शक्रः विमानं दिव्यतेजसम् ॥६१॥

निवासार्थं हरेस्तत्र समादाय सुरालयात् ।
हस्तिशैले प्रतिष्ठाप्य फल्लिलांछनलांछिते ॥ ६२ ॥

पुण्यकोटिविमानस्य शिल्पिना विश्वकर्मणा ।
सोपानं तत्त्वसंख्याकं रचयित्वा हरेः कृते॥ ६३ ॥

ततो ब्रह्मा जगन्नाथं हृदयस्थं जनार्दनम् ।
तद्विमाने समारोप्य दिव्यसिंहासने शुभे ॥ ६४ ॥

भगवत्पादयुगळे स्वशिरांस्यर्पयं स्थितः । स्यर्पयन्
ततो देवाश्च ऋषयो वह्नेस्संजातवर्ष्मणः ॥ ६५ ॥

घृताद्यभिषेकपूर्वकं श्रीवरदराजावतारोत्सवघट्टः

तस्य तापोपशान्त्यर्थं घृतधारासहस्रकैः।
मुहूर्तमभिषिच्याथ सम्पूज्य विधिवद्धरिम् ॥६६ ॥
स्थितं द्विजानां हृदये ध्यात्वा विष्णुं जनार्दनम् ।
षड्रसान्नैश्च भक्ष्यैश्च फलपायसराशिभिः ॥ ६७ ॥
भोजयित्वा द्विजश्रेष्ठान् वस्त्राभरणैश्शुभैः ।
सुगन्धिपुष्पमालाभिस्ताम्बूलैर्हरिचन्दनैः ॥ ६८ ॥
तोषयित्वा द्विजवरानर्चयित्वा हरेः पदे ।
ऽप्यस्तुवंस्ते स्तोत्रजालैश्च ते सर्वे स्तुवन्तस्ते जनार्दनम्॥ ६९ ॥
यः पुरा वरदान्मुक्तिमाप तत्प्रतिरूपकम् ।
गजरत्नं विश्वकर्मा उत्सवाय हरेर्ददौ ॥ ७० ॥
तदा शक्रो मौक्तिकं च छत्रं ब्रह्मा पितामहः ।
भासुरं मकुटं दिव्यं नवरत्नविभूषितम् ॥ ७१ ॥
ततो ब्रह्मादयो देवा भक्ता भागवतोत्तमाः ।
ततस्सायन्तने काले प्रशामकुटभूषितम् ॥ ७२ ॥
केशवं तं रमानाथं गजेन्द्रे वाहनोत्तमे ।
मुक्तातपत्रसंवीते समारोप्य महोत्सवम् ॥ ७३ ॥
कारयित्वा पुनः पीठे समारोप्य जनार्दनम् ।
ते सर्वे प्रार्थयामासुः काञ्च्यां सान्निध्यकांक्षया॥७४॥



भगवानुवाच --

यथाहं विरजातीरे मम वैकुण्ठपट्टणे ।
जगद्व्यापनशीलत्वाद्विष्णुरित्यभिधायुतः ॥ ७५ ॥
प्रसिद्धो निवसाम्यत्र तथा कांचीपुरोत्तमे ।
हरिक्षेत्रं समाश्रित्य सर्वाभीष्टप्रदानतः ॥ ७६ ॥
वरदाभिधया ख्यातो निवसामि निरन्तरम् ।
सर्वे भवन्तो मद्भक्तास्सदा मद्दर्शने रताः ॥ ७७ ॥
सर्वदात्रैव तिष्ठन्तु वैकुण्ठादतिपावने ।
वर्षे वर्षे मेषमासि मम जन्मदिने शुभे ॥ ७८ ॥
घृतधारासहस्राभिषेचनं मम पूजनम् ।
उत्सवं च प्रकुरुत विप्रभोजनपूर्वकम् ॥ ७९ ॥
इत्युक्त्वा भगवांस्तेभ्यो निवासमकरोत्तदा ।
ततो ब्रह्मा जगद्धाता नत्वा स्तुत्वा जनार्दनम् ॥८०॥
दृष्ट्वा सभाजनान् विष्णुभक्तानुग्रहकांक्षया ।
प्रीतिमाश्रित्य भक्तेभ्यस्तेभ्यो ब्रह्मा वरं ददौ॥८१॥
हरिजन्मदिने काञ्च्यां घृतधारासहस्रकैः ।
वरदं येऽभिषिञ्चन्ति ते लभेयुर्महत्फलम् ॥ ८२ ॥
इति दत्वा वरं ब्रह्मा भगवन्नाभिमण्डले ।
माणिक्यत्वं ततः प्राप्य तत्रैवाद्यापि तिष्ठति॥ ८३ ॥
तदादि वरदस्तत्र वर्तते तद्धरातले ।
पुरा हि दर्शनाद्विष्णोर्बहवो मोक्षकांक्षिणः॥ ८४ ॥ द्विष्णो
अनुग्रहेण पूर्णेन गतास्ते वैष्णवं पदम् ।

भानुवर्णाख्यविप्रोपाख्यानम्

तेषु कश्चित्पुरा विप्रो यमुनातीरसंस्थितः ॥ ८५ ॥
बादरायणगोत्रोत्थो यजुर्वेदी द्विजोत्तमः ।
भानुवर्ण इति ख्यातो गोकुलक्षेत्रमध्यगः॥ ८६ ॥
स विप्रो यात्रया काञ्च्यां हरिक्षेत्रधरातले ।
घृताभिषिक्तमालोक्य विष्णोर्जन्मदिने हरिम्॥८७॥
पुनस्स्वदेशमागत्य देहान्ते देवतागणैः ।
स्वर्गपट्टाभिषेकाय नीयमानस्ततो हरेः ॥ ८८ ॥
गणैराकृष्यमाणस्सन् गतस्तद्वैष्णवं पदम् ।
तस्मादभीष्टवरदस्साक्षान्मुक्तिप्रदायकः ॥ ८९ ॥
वर्तते तद्धरिक्षेत्रे पुण्यकोटिविमानके ।
कोटिब्रह्मप्रतिष्ठायां यत्फलं स्थापको लभेत्॥ ९० ॥
तत्फलं लभते मर्त्यस्सकृद्वरदसेवया ।
एतद्रहस्यमाख्यातं वरदस्य प्रभावयुक् ॥ ९१ ॥
यः पठेच्छृणुयान्नित्यमिमध्यायमादरात् ।
दर्शनाद्वरदस्यास्य यत्फलं तत्फलं लभेत् ॥ ९२ ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे वरदराज प्रभावकथनं नाम चतुर्थोऽध्यायः ॥

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

पञ्चमाध्यायप्रारम्भः

नमस्ते ब्रह्मपत्नि त्वां सरिद्रूपां सरस्वतीम् ।
सर्वपापप्रशमनीं वेगवत्यभिधान्विताम् ॥ १ ॥
इति स्तुत्वा नमस्कृत्य नदीं वेगवतीमथ ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

वेगवत्युत्पत्त्यादिकथाप्रारम्भघट्टः

अथ तत्र नृपश्रेष्ठ हरिक्षेत्रधरातले ।
श्रीमद्वरदराजस्य दक्षिणे त्र्यंशमात्रतः ॥ ३ ॥
नाम्ना वेगवती ख्याता सरिच्छ्रेष्ठा प्रवर्तते ।
ब्रह्मलोकात्समागात्य नन्दिशैलसमुद्भवा ॥ ४ ॥
पयोष्ण्यन्तर्गता याति या त्रिपंचकयोजनात् ।
सार्धैकयोजनात्पश्चात्पृथग्रूपेण सा नदी ॥ ५ ॥
पश्चात्पयोष्ण्यास्सङ्गेन चान्तरा पंचयोजनम् ।
नन्दिशैलाद्विनिर्गत्य योजने चोपविंशके ॥ ६ ॥

सम्प्राप्य पूर्वजलधिं वर्तते सा सरस्वती ।
वेगवत्यभिधाना च नदी पापौघनाशिनी ॥ ७ ॥

पुण्यकोट्यां प्रवेशेन पुण्यकोटीति विश्रुता ।
सा पुरा भारती देवी हरिक्षेत्रधरातले ॥ ८ ॥

विष्णुना परिभूता सा बिलं तत्र प्रविश्य च ।
पुनर्विष्णुप्रसादेन बभौ सन्मानिताधिकम् ॥ ९ ॥

तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ।
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ १० ॥

पुरा सरस्वती देवी हरिक्षेत्रधरातले ।
ब्रह्माश्वमेधनाशाय सरिद्रूपा समागता ॥ ११ ॥

मूलवच्छयनाकारं केशवं तं दिगम्बरम् ।
आलोक्य भग्नमाना च परलिङ्गस्य दर्शनात् ॥१२॥

बिलं कृत्वा धरादेशे भूत्वा पाताळगामिनी ।
तपः कृत्वा हरिं दृष्ट्वा वचनं चेदमब्रवीत् ॥ १३ ॥

सरस्वत्युवाच--

यल्लिङ्ग दर्शनान्मानं पातिव्रत्यं च खण्डितम् ।
मानं देहि दयासिन्धो तस्मान्मां पावनां कुरु॥१४॥

न चेन्मे मानभङ्गेन जीवो लयति ते पदे ।
मन्नाथस्य मयि प्रीतिं कारयस्व दयानिधे ॥ १५ ॥

पत्युस्सन्दर्शनादद्य देहिमेऽ र्धासनं विधेः ।
एवं देहि वरं मह्यं कमलानाथ केशव ॥ १६ ॥



भगवानुवाच--

ममांशजाता त्वं वाणी तवांशो मम मायया ।
सृष्टिदण्डस्तु विधये दत्तोऽभूद्ब्रह्मसुन्दरि ॥ १७ ॥

इदानीं दुर्मतिं त्यक्त्वा वक्ष्यमाणक्रमं कुरु ।
नदीरूपं पुनः प्राप्य यन्मार्गेण पुरागता ॥ १८ ॥

तन्मार्गात्सहसागत्य पयोष्ण्या सङ्गमेन च ।
पूर्वसिन्धुं प्राप्तवत्यां त्वयि तत्र चतुर्मुखः ॥ १९ ॥

करिष्यत्येव सान्निध्यं तस्य दर्शनमात्रतः ।
पातिव्रत्यं भवेदेव तव देवि वरानने ॥ २० ॥

परलिङ्गावलोकोत्थदोषान्मुक्ता सरस्वति ।
शुद्धा भवसि तेनैव विधेरर्धासनं भवेत् ॥ २१ ॥

त्वमेव सर्वलोकानां नारीणामुत्तमा भव ।
तस्मात्तत्कुरु वाग्देवि मयि भक्त्या प्रयत्नतः ॥२२॥

इत्येवमुक्ता सा वाणी शिरसा तत्पदाम्बुजम् ।
धृत्वा पुनश्च संस्थाप्य सम्पूज्य विधिवद्धरिम्॥२३॥

सरिद्रूपेण सा वाणी वेगवत्यभिधा रयात् ।
क्षीरोष्ण्यां सम्प्रवेशेन गत्वा तत्पूर्ववारिधेः ॥२४॥

सङ्गात्तत्र विधिं दृष्ट्वा निष्पापाऽभूत्सरस्वती ।
ब्रह्मार्धासनमारुह्य बभौ कल्याणवेषतः ॥ २५ ॥

ततो ब्रह्मा जगद्धाता दृष्ट्वा तां च सरस्वतीम् ।
नदीरूपस्वशक्त्यै तु स ब्रह्मा दत्तवान् वरम् ॥२६॥

वेगवत्याः पुण्यतोये यस्स्नायाद्भक्तिसंयुतः ।
नारी वा स्नानमात्रेण महापापैः प्रमुच्यते ॥ २७ ॥

इति दत्वा वरं ब्रह्मा सरस्वत्या समन्वितः ।
ब्रह्मलोकं पुनः प्राप्य बभौ सृष्ट्या मुदान्वितः॥२८॥

तदादि वर्तते तत्र हरिक्षेत्रधरातले ।
ब्रह्मपत्नी सरिद्रूपा नाम्ना वेगवती स्मृता॥ २९ ॥

पुरा वेगवतीतोये बहवो मोक्षकांक्षिणः ।
वेगवत्यां स्नानमात्राद्गतास्ते वैष्णवं पदम् ॥ ३० ॥

## धौम्यनाथोपाख्यानम्

तेषु कश्चित्पुरा विप्रो जाह्नवीतीरसंस्थितः ।
गङ्गापुरनिवासी च सामवेदी सुसुन्दरः ॥ ३१ ॥

बृहत्काश्यपगोत्रोत्थो धौम्यनाथ इति श्रुतः ।
भाग्यवान् धनिको विद्वान् परदाररतस्सदा॥ ३२ ॥

तेन पापेन महता पश्चाद्व्याधिसमन्वितः
बृहद्रोगी कुष्टदेही पश्चात्सङ्गविवर्जितः॥ ३३ ॥

समाधिवचनाच्छ्रुत्वा वेगवत्याः प्रभावकम् ।
समागत्य हरिक्षेत्रं तत्र वेगवतीजले ॥ ३४ ॥

त्रिकालस्नानमात्रेण क्षीणपापश्च स द्विजः ।
तद्व्याधिरहितो विप्रश्शुध्दो भूत्वाऽतिसुन्दरः॥३५॥

धनधान्याभिवृध्या च संयुतो दृढगात्रवान् ।
स्वदेशं प्राप्य हृष्टात्मा तत्रैव निवसन् चिरात्॥३६॥

देहान्ते विष्णुदूतैश्च प्रापितो वैष्णवं पदम् ।
ब्रह्महत्यादिपापघ्नी नदी वेगवती स्मृता ॥ ३७ ॥



तत्रैव वर्तते देवी सरिद्रूपा सरस्वती ।

## हरिक्षेत्रदर्शनादिप्रभावकथनम् ॥

तथा वारणशैलेन्द्रो वरदस्सद्गतिप्रदः ॥ ३८ ॥

एवं क्रमेण वर्तन्ते हरिक्षेत्रधरातले ।
न पश्येद्यो हरिक्षेत्रं व्यर्थात्मा नरकाश्रयः॥ ३९ ॥

करोति भूमौ यो मर्त्यो हरिक्षेत्रस्य दर्शनम् ।
स एव धन्यो लोकेऽस्मिन् स विष्णुः किमुतापरे॥४०॥

तस्मादवश्यं कर्तव्यं हरिक्षेत्रस्य दर्शनम् ।
न चेन्नित्यं स्नानकाले श्लोकानेतान् पठेन्नरः॥४१॥

गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पञ्चयोजनमात्रेण पूर्वाम्भोधेस्तु पश्चिमे ॥ ४२ ॥

वेगवत्युत्तरे तीरे पुण्यकोट्यां हरिस्स्वयम् ।
वरदस्सर्वभूतानामद्यापि परिदृश्यते ॥ ४३ ॥

वपापरिमळोल्लासवासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥ ४४ ॥

यो ददाति हरिक्षेत्रे दानं याथार्थ्यभावतः ।
कोटियज्ञफलं लब्ध्वा विष्णुलोकं स गच्छति॥४५॥

यो वसेत हरिक्षेत्रे क्षणार्धं वा तदर्धकम् ।
मुक्तस्स सर्वपापेभ्यस्साक्षाद्विष्णुर्नराकृतिः ॥ ४६ ॥

पुण्यकोटिविमानाङ्कं तत्त्वसोपानभूषितम् ।
नृसिंहाधिष्ठितगुहं हस्तिशैलं नमाम्यहम् ॥४७॥

एकादश्यामहोरात्रं विष्णोस्सङ्कीर्तनेन च ।
यत्फलं तद्भवेन्नृणां हस्तिशैलस्य दर्शनात् ॥४८॥

ब्रह्मयज्ञसमुद्भूतं दिव्यमाणिक्यसुन्दरम् ।
जगदादिगुरुं देवं वरदं तमहं भजे ॥ ४९ ॥

हरिजन्मदिने काञ्च्यां घृतधारासहस्रकैः ।
वरदं योऽभिषिञ्चेत कोटियज्ञफलं लभेत् ॥ ५० ॥

कोटिब्रह्मप्रतिष्ठायां यत्फलं लभते नरः ।
तत्फलं समवाप्नोति सकृद्वरदसेवया ॥ ५१ ॥

नमस्ते ब्रह्मपत्नि त्वां सरिद्रूपां सरस्वतीम् ।
सर्वपापप्रशमनीं वेगवत्यभिधाङ्किताम् ॥ ५२ ॥

यः पुमान् प्रातरुत्थाय स्नानकाले पठेच्छुचिः ।
श्लोकद्वादशपाठेन तदुक्तफलमाप्नुयात् ॥ ५३ ॥

एतद्रहस्यमाख्यातं वेगवत्याः प्रभावयुक् ।
यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ॥ ५४ ॥

स्नानाद्वेगवतीतोये यत्फलं तदवाप्नुयात् ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे वेगवतीप्रभावकथनं नाम पञ्चमोऽध्यायः ॥

॥ श्रीरस्तु ॥

# ❁ श्री कामाक्षीविलासः ❁

## षष्ठाध्यायप्रारम्भः

उमालिङ्गनसंक्रान्तकुचकंकणमुद्रितम् ।
लिङ्गमेकाम्रनाथस्य सैकतं समुपास्महे ॥ १ ॥

इति स्तुत्वा नमस्कृत्य लिङ्गमेकाम्रसंज्ञिकम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

**मार्कण्डेय उवाच--**

रुद्रशालान्तर्गत रुद्रकोटिप्रभावकथनम्

अथ तत्र नृपश्रेष्ठ काञ्चीनगरभूतले ।
विष्णोश्श्वेतप्रभाख्यस्य याम्ये पंचाशदंशके ॥ ३ ॥

वर्तते दूव्यूनके शम्भुः कायारोहणसंज्ञिकः ।
द्वात्रिंशदं पश्चिमे कन्यकेश्वरः ॥ ४ ॥

उत्तरे पंचविंशेऽस्य शिवः कैलासनायकः ।
पञ्चविंशांशतस्तस्य प्रागुक्तश्वेतनामकः ॥ ५ ॥

एतच्चतुर्दिङ्मध्यस्था रुद्राणां परमालयाः ।
तस्माच्चद्रुद्रशालाख्यं काञ्च्यां वायव्यभूतलम् ॥ ६ ॥

योऽर्चयेद्रुद्रशालायां लिङ्गमेकं प्रयत्नतः ।
कोटिलिङ्गार्चनफलं शिवलोकं च गच्छति ॥ ७ ॥
कोट्याश्रयतो
लिङ्गार्थबोधको रुद्रस्तत्कोठ्याशयतो नृप ।
रुद्रकोट्यभिधायुक्तं तत्क्षेत्रमतिपावनम् ॥ ८ ॥

### विकटचक्रविनायक रसालस्कन्दादीनां स्थान निरूपणम्

तत्र कायाधिरोहस्य सौम्ये पञ्चदशांशके ।
षडंशहीनके तस्मिन् विकटाख्यो गणाधिपः ॥९॥
पुरा तु विष्वक्सेनाय विष्णुचक्रप्रदायकः ।
तदुदीच्यामथैकांशे रसालस्तत्र षण्मुखः ॥ १० ॥
पुराऽहमस्मि राजेन्द्र चूतोत्पन्नप्रबोधवान् ।
तस्य पूर्वेऽस्ति चैकांशे दुर्गा प्रळयबन्धिनी ॥ ११ ॥

### प्रळयबन्धिन्यादिदुर्गाचतुष्टयस्थाननिरूपणम्

देव्याज्ञया निरुन्धन्ती कम्पापूरानसौ स्थिता ।
तस्या याम्ये दशांशे तु दुर्गासंपत्करीश्वरी ॥ १२ ॥
पुरा गजासुरं हत्वा ऋषीणां हितकारिणी ।
तद्दशांशे पश्चिमे तु रेणुकाम्बुजवल्लिका ॥ १३ ॥
पुरा जम्बुकविप्राय नष्टनेत्रप्रदायिनी ।
पञ्चविंशांशतस्तस्या याम्ये वीरवरेश्वरी ॥ १४ ॥
पुरा श्रीवीरभद्रस्य कोपप्रशमनी तदा ।
तस्याः पूर्वे दशांशे तु शिवः कायाधिरोहणः ॥१५॥



### कायाधिरोहणाद्यष्टमहेश्वराणां स्थाननिरूपणम्

पुरा ययातिभूपस्य सशरीरविमुक्तिदः ।
अंशात्षट्त्रिंशतस्तस्य सौम्येज्वरहरेश्वरः ॥ १६ ॥
पुरा देवऋषीणां च माहेशज्वरमुक्तिदः ।
तस्य नैऋतिदिग्भागे दशांशेऽनेकपेश्वरः ॥ १७ ॥
पुरा वृत्रवधार्थाय शक्राय शतकोटिदः ।
तस्य वायौ तु चैकांशे शिवःकैलासनामकः ॥१८॥
पुरा तुण्डीरभूपाय दत्तकैलासमन्दिरः ।
तस्य याम्ये षडंशे तु तत्र श्रीपश्चिमेश्वरः ॥ १९ ॥
पुरा स वालखिल्यानां रक्षोजातभयापहः ।
चतुर्विंशांशके तस्य शैवे विश्वेश्वरो हरः ॥ २० ॥
गङ्गापापहरश्शम्भुस्स्वतीर्थस्य प्रभावतः ।
पञ्चांशे तस्य सौम्ये तु औणकान्तेश्वरश्शिवः॥२१॥
पुरा तदौणकान्ताभ्यां खड्गशूलप्रदायकः ।
दशांशे तस्य पूर्वे तु श्मशानेशो महेश्वरः ॥ २२ ॥
पुरा भण्डवधार्थं तु स्वशक्त्या विश्वभक्षकः ।
तस्य नैऋतिदिग्भागे हरिः पाण्डवनामकः ॥२३॥

### पाण्डवदूतादि विष्णुमूर्तीनां स्थाननिर्णयः

पाण्डवानां जयार्थी स दूतकृत्यं पुराऽकरोत् ।
तस्य चैशान्यभागे तु चन्द्रग्रीवो जनार्दनः ॥२४॥
पुरा चन्द्रद्युतिं कण्ठे धृत्वा तत्रैव संस्थितः ।
तस्य चैशान्यदिग्भागे श्वेतवर्णो जनार्दनः ॥ २५ ॥

पुरान्धकारे दैत्येन चन्द्रवर्णेन भासितः ।

### चोरैकाम्रेश्वरादीनां स्थाननिरूपणम्

तस्य चैशान्यदिग्भागे चोरैकाम्रपतिश्शिवः ॥ २६ ॥
रुद्रश्चोरतनुर्भूत्वा पश्चाल्लिङ्गात्मकोऽभवत् ।
तत्पश्चिमे द्वितीयांशे निवसाम्यहमाज्ञया ॥ २७ ॥
ममोत्तरेऽपि चैकांशे गङ्गाचैलालकास्थिता ।
शिवार्धासनमारूढा निर्मिता देवशिल्पिना ॥ २८ ॥
तस्य चाग्नेयदिग्भागे धवळैकाम्रनायकः ।
गङ्गाजले समुद्भूतश्शिवफालेक्षणे क्षणात् ॥ २९ ॥
स एव ईश्वरश्शम्भुः पश्चाल्लिङ्गात्मकोऽभवत् ।
तस्य पूर्वे समीपे तु वर्तते वीरभैरवः ॥ ३० ॥
श्मशानपालको दण्डी तत्र शम्भोरनुज्ञया ।

### शिवगङ्गादितीर्थचतुष्टयानां प्रभावः

तस्य मारुतदिग्भागे तीर्थं गङ्गाभिधं वरम् ॥ ३१ ॥
ब्रह्माण्डजनितं पूर्वं परापापविमुक्तिदम् ।
दर्शनात्सर्वपापघ्नं स्पर्शनाच्छाम्भवप्रदम् ॥ ३२ ॥
सोमवारे महादेव्याः फलदं तत्पुरा नृप ।
तद्वारि लभते स्नानाज्जाह्नवीस्नानजं फलम् ॥ ३३ ॥
एवं तीर्थाय पार्वत्या वरो दत्तो महीतले ।
तस्य तीर्थस्य चाग्नेये तीर्थं मङ्गळनामकम् ॥३४॥



पुरा तद्भूमिपुत्रस्य वह्निरूपविमोचकम् ।
भौमवारे तु यस्स्नायाद्भारतीं स्नानजं फलम् ॥३५॥
पुरा तीर्थाय भौमोपि ददौ वरमनुत्तमम् ।
तस्य तीर्थस्य नैऋत्यां तीर्थं ज्वरहराभिधम् ॥३६॥
पुरा देवाश्च ऋषयो स्नानान्मुक्तज्वराभवन् ।
तस्मिन् तीर्थे तु यस्स्नायात्कपिलास्नानजं फलम्॥३७॥
पुरा देवैश्च तीर्थाय वरो दत्तो महीयसे ।
तस्य वायव्यदिग्भागे षडंशे पाण्डवाख्यकम्॥३८॥
पुरा तत्पाण्डुपुत्राणां विष्णोस्सख्यप्रदायकम् ।
दर्शनात्सर्वपापघ्नं स्पर्शनाच्छाम्भवप्रदम् ॥ ३९ ॥
तत्तोये रौद्रनक्षत्रे फलकृत्तत्पुरा नृप ।
तस्मिन् ऋक्षे तु यस्स्नायात्कृष्णास्नानफलं लभेत्॥४०॥
पाण्डवैश्च पुरा तस्मै वरो दत्तो महीपते ।
एवं तद्रुद्रशालायामेको विघ्नेश्वरस्तथा ॥ ४१ ॥
स्कन्दस्तत्र चतुर्दुर्गाश्शम्भवोष्टौ जनार्दनाः ।
त्रयो मुद्रास्तु तत्पंचचतुस्तीर्थाण्यनुक्रमात् ॥४२॥
अद्यापि शासनाच्छम्भोर्वर्तते तद्धरातले ।
तत्क्षेत्रवासिनस्सर्वे महाकैलासवासिनः ॥ ४३ ॥
भूकैलास इति प्रोक्तं काञ्च्यां वायव्यभूतलम् ।
तस्य क्षेत्रस्य नामानि पञ्चधा कीर्तितानि च ॥४४॥
रुद्रशाला रुद्रकोटिः कैलासश्चैकचूतकः ।
महाश्मशान इत्येवं प्रथितानि महीतले ॥ ४५ ॥

यो वसेद्रुद्रशालायां क्षणं वापि तदर्धकम् ।
मुच्यते सर्वपापेभ्यस्साक्षाद्भर्गो नराकृतिः ॥ ४६ ॥

तत्क्षेत्रवासिनः पूर्वं बहवोप्युपकारतः ।
अदृष्ट्वा नरकं घोरं गतास्ते शाम्भवं पदम्॥ ४७ ॥

### त्वक्कौशिकोपाख्यानम्

तेषु कश्चित्पुरा विप्रः कृष्णातीरे मनोहरे ।
एलापुरे तु निवसन् ऋग्वेदी ब्राह्मणोत्तमः ॥४८॥

गौतमान्वयसम्भूतो नाम्ना त्वक्कौशिकस्स्मृतः ।
सत्कर्महीनो दुष्टात्मा दुराचाररतस्सदा ॥ ४९ ॥

वसुन्धरायां विचरन् निक्षेपार्थी रहस्थले ।
धनाशयातिभ्रान्त्या तु द्विजस्सम्मोहितस्तदा ॥५०॥

यो याति तत्र यात्रार्थमत्रशाद्यत्र मार्गतः ।
यानहीनं साह्यहीनं विप्रं वेदविशारदम् ॥ ५१ ॥

कर्मठं ज्ञानिनं बालं दृष्ट्वा सर्वोपचारतः ।
गृहमानीय दत्वा च धनं च युवतीं तथा ॥ ५२ ॥

वासोभिर्भोजनैरिष्टैस्सुखयित्वा तु तं द्विजम् ।
पञ्चषट्सप्तमासैर्वा यद्वा संवत्सरावधि ॥ ५३ ॥

संरक्षितं विप्रवरं निक्षेपाय बलिं ददौ ।
एवमेव धनार्थी स भूतस्ववशतो द्विजः ॥ ५४ ॥

यत्र यत्र निधिं पश्येदञ्जनैस्तत्र तत्र तु ।
गत्वा तु मन्त्रवादीति ब्रह्महत्याधनान्वितः॥ ५५ ॥



एतत्कृत्येन विप्रोसौ सुखेनार्जित वित्तवान् ।
ततः कदाचिद्विप्रेन्द्रं रुद्रशालानिवासिनम् ॥ ५६॥

समागतं समालोक्य तत्र त्वक्कौशिकाख्यकः ।
सद्विजाय च तक्रोदं ददौ तद्दाहशान्तये ॥ ५७ ॥

ततः पीत्वा तु विप्रोयं तक्रोदं विगतश्रमः ।
स्वकीययात्रामुद्दिश्य निर्ययौ भूसुरस्तदा ॥ ५८ ॥

ततः कदाचिद्विज्ञाय त्वक्कौशिकहतं द्विजम् ।
राजा दण्डधरो बध्वा निगळैः प्राणहारिभिः॥५९॥

पातयामास कारायां तत्रैव स ममार हि ।
तदा यमभटा एत्य पाशैस्सम्बध्य कौशिकम्॥६०॥

अग्नितुल्य शलाकाभिर्विदार्य प्रतिरोमकम् ।
प्रहृत्य मुसलैः कुन्तैर्यमलोकमनीनयन् ॥ ६१ ॥

ततो रुद्रगणास्तत्र समागत्यातिशीघ्रतः ।
यमदूतान् समुच्चाट्य विप्रमादाय मोदतः ॥ ६२ ॥

विमानेऽस्मिन् समारोप्य शिवपादेत्वयोजयन् । ऽमुं
ततो यमस्स्वदूतेभ्यश्श्रुत्वा रौद्रभटैः कृतम् ॥६३॥

कोपेन महता कालः कौशिकाकर्षणेच्छया ।
कैलासं तु ततः प्राप्य दृष्ट्वा शङ्करमव्ययम्॥ ६४ ॥

यम उवाच--

मुञ्च विप्रं महापापं सदाब्राह्मणघातुकम् ।
सत्कर्मरहितं दुष्टं नरकानुभवोचितम् ॥ ६५ ॥

इतीरयन्तं शमनं प्रत्युवाच महेश्वरः ।

शिव उवाच--

भूमण्डलेस्ति सुक्षेत्रं रुद्रशालेति विश्रुतम् ॥ ६६ ॥
तत्क्षेत्रवासिने पूर्वं विप्रोयं पापसत्तमः ।
ददौ विप्राय तक्रोदं मत्कुक्षौ तत्प्रशस्यति ॥ ६७ ॥
तस्मात्तद्दानमात्रेण मम भक्तोऽतिपुण्यवान् ।
एष सत्कर्मसंयुक्तो निष्पापी मत्पदोचितः॥ ६८ ॥
किमर्थं तस्य नरकस्साम्प्रतं गच्छ दूरतः ।
इत्येवं शङ्करेणोक्तं तदा श्रुत्वातिभक्तितः ॥ ६९ ॥
तं नत्वा पितृलोकेशः पुनस्स्वभवनं ययौ ।
तस्मात्तद्रुद्रशालायां यो वसेत्स सदाशिवः ॥ ७० ॥
तस्माद्भूलोककैलासो रुद्रशालाधरातलम् ।
एतद्रहस्यमाख्यातं रुद्रशालाधरातलम् ॥ ७१ ॥
यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ।
रुद्रशालानिवासेन यत्फलं तत्फलं लभेत् ॥ ७२॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे रुद्रशालामहिमानुवर्णनं नाम षष्ठोऽध्यायः ॥

॥ श्रीरस्तु ॥

# ❀ श्री कामाक्षीविलासः ❀

## सप्तमाध्यायप्रारम्भः

शिवबीजसमुद्भूतं वेदशाखाभिरुज्वलम् ।
मृकण्डुतनयाधारं रसालं तं नमाम्यहम् ॥ १ ॥
इति स्तुत्वा नमस्कृत्य श्रीमदेकाम्रभूरुहम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

### एकाम्रवृक्षमहिमा

अथ तत्र नृपश्रेष्ठ रुद्रशालाधरातले ।
तत्र पाण्डवतीर्थस्य पूर्वे मन्वंशमात्रतः ॥ ३ ॥
एकाम्रभूरुहश्रेष्ठो वर्तते श्रुतिसन्निभः ।
नानावृक्षान्वितारण्ये पुण्ये मुनिगणान्विते ॥ ४ ॥
गौर्या प्रदत्त एकाम्रदिव्यनाम्ना विभूषितः । प्रदत्तेनैकाम्र
रसालवृक्षः पुण्यात्मा वेदशाखाभिरुज्वलः ॥ ५ ॥
तद्रुद्रशालावासित्वाद्रुद्रकोटिरिति श्रुतः ।
शिवबीजसमुद्भूतः पुरा मद्रक्षको नृप ॥ ६ ॥

### शक्तिमहेश्वर संवादः

तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ।
पुरा कैलासशिखरे रहस्यन्तःपुरे शुभे ॥ ७ ॥

यावत्तत्राङ्गनाश्शम्भो रतिलीलाप्रियानुगाः ।
चतुष्षष्टिकलाभेदात्कोटयस्तत्र शक्तयः ॥ ८ ॥

महेशस्य प्रियास्सर्वा महाहंकृतिसंयुताः ।
ताश्शम्भुं प्रार्थयामासुर्गौरीवच्चासनं शुभम् ॥ ९ ॥

ततो महेश्वरश्शम्भुरुमयाधिष्ठितासनः ।
शम्भुर्दृष्ट्वा च ताश्शक्तीरिदं वचनमब्रवीत् ॥ १० ॥

शिव उवाच---

ममांशजाताः कैलासे पुंरूपेण समन्विताः ।
तथा गौर्यंश सम्भूता मम कान्ता हि सर्वशः॥११॥

पुंरूपाणां तु सर्वेषां वरोहं पुरुषेश्वरः ।
तथा स्त्रीणां वरा गौरी मम कान्तास्सुशक्तयः॥१२॥

तस्माद्यूयं महागौर्याः किंचिन्न्यूनतयान्विताः ।
सर्वासां चैव शक्तीनामेषोत्कृष्टा हि पार्वती ॥१३॥

समासने समासीना वसत्यन्तःपुरे सदा ।
तदासनं न दातव्यं युष्मभ्यमुमया समम् ॥ १४ ॥

शक्तय ऊचुः ---

किं ब्रवीषि महादेव पक्षपातं समाश्रितः ।
गौर्यंशजाता न वयं सास्मदंशसमुद्भवा ॥ १५ ॥



तस्माद्देयं च पार्वत्याश्शक्तीनां नस्समासनम् ।
अथवा भावतश्श्रेष्ठा लीलया वा रतिपतेः ॥ १६ ॥ रती

शास्त्राद्वा रूपतो वापि सौशील्यगुणतोपि वा ।
किं विशेषसमायुक्ता सा गौरी परमेश्वर ॥ १७ ॥

प्रदर्शय महादेव तन्माहात्म्यमिह प्रभो ।
इत्याकर्ण्य वचस्स्त्रीणां दृष्ट्वा तान् वनिताजनान्॥१८॥

जहास लीलया शम्भुस्तासां गर्वापनुत्तये ।
तदाम्बराणि शक्तीनां नितम्बाद्गळितान्यहो॥ १९ ॥

मर्मदेशादर्शनाय दण्डवत्प्रणता भुवि ।
ततोभवद्भगवती गौरी मानाम्बरान्विता ॥ २० ॥

दिगम्बराणां शक्तीनां तासां मानरिरक्षया ।
पुनर्वस्त्र धृतिर्यावत्तावत्स्वीयकराम्बुजैः ॥ २१ ॥

नेत्रत्रयं महेशस्य प्रच्छन्नमकरोत्तदा ।
ततस्समस्तलोकेषु देवमानमुहूर्ततः ॥ २२ ॥

सूर्याचन्द्रमसौ नष्टौ नष्टोग्निर्बाडबस्तथा ।
प्रच्छन्ननेत्र माहात्म्याच्चन्द्रसूर्याग्न्यदर्शनात् ॥२३॥

गाढान्धकारसंवीते जगत्येकार्णवीकृते ।
सम्भूते प्रळये घोरे वरेणाहं महेशितुः ॥ २४ ॥

विनाशरहितो भूत्वा सर्वभूतमृतावपि ।
निमज्योन्मज्य विचरन् महाप्रळयसागरे ॥ २५ ॥

आधारकांक्षया तस्मिन् कालेहं परमेश्वरम् ।
सदाशिवेशानरुद्रहरिब्रह्मादि कारणम् ॥ २६ ॥

देवी दिव्यतनौ लीनचित्तं कामेशमव्ययम् ।
महा त्रिपुरसुन्दर्या नायकं निर्गुणं स्मरन् ॥ २७ ॥

आधारमत्र देवेश देहि मे त्वं कटाक्षतः।
इति सम्प्रार्थ्य देवेशं जलगर्भेविशं श्रमात् ॥ २८ ॥

ततःकृपानिधिश्शम्भुस्तत्र मद्रक्षणेच्छया ।
चिद्रूपो रुद्रशालायां वसन्नव्यक्ततेजसा ॥ २९ ॥

चूतबीजाकृतिर्भूत्वा चतुराम्नायशाखिनम् ।
वृक्षमुत्पादयामास स्वबीजात्तत्र शङ्करः॥ ३० ॥

भित्वा जलनिधिं तत्र तज्जलाद्बहिराययौ ।
अथ तच्चूतवृक्षोपि क्षणेन ववृधे क्रमात् ॥ ३१ ॥

ततश्शाखाविभूषाढ्यं प्रळयातीतमुन्नतम् ।
अथाहं तं तरुं दृष्ट्वा तदुपर्येव संस्थितः ॥ ३२ ॥

प्रळयार्णवमालोक्य विस्मयान्निश्चलाकृतिः ।
तं चूतं शिवरूपेण ध्यात्वा साक्षात्परश्शिवः ॥३३॥

इति निश्चित्य मनसा वृक्षमूलमवीविशम् ।
अव्यक्तज्योतिराकीर्णे तन्मूले देवमन्दिरात् ॥३४॥ मन्दिरम्

दृष्ट्वा तु किमिदं चित्रं लयकालेप्यनश्वरम् ।
निर्जलं जलगर्भस्थं ज्योतिर्द्वारसमन्वितम् ॥ ३५ ॥

नगरं बहुविस्तीर्णमपश्यं वृक्षमध्यतः ।

स्कन्दमार्कण्डेय संवादः

अवरुह्य च तन्मूले स्वामिनं शिखिवाहनम् ॥ ३६ ॥



तद्रसालफलं स्वादु भक्षयन्तं दिने दिने ।
बालं षडाननं दृष्ट्वा महदाश्चर्यसंयुतः ॥ ३७ ॥

प्रणम्य शिरसा तं च कुमारं शिवनन्दनम् ।
अस्य क्षेत्रस्य किं नाम यद्रूपोयं रसालकः॥ ३८ ॥

किमर्थं तिष्ठसि त्वं हि चूतमूले षडानन ।
महिम्ना कस्य देवेदं निर्जलं प्रळयाम्भसि ॥ ३९ ॥

तत्सर्वं वद मे बाल मयि कारुण्यतो गुह ।
इत्यपृच्छमहं तत्र सुब्रह्मण्यं नृपोत्तम ॥ ४० ॥

अथालोक्य तु मां स्कन्द इदं वचनमब्रवीत् ।

स्कन्द उवाच--

काञ्चीनामान्वितं क्षेत्रं महाप्रळयजित्पुरम् ॥ ४१ ॥

यदा यदा समायान्ति प्रळयाश्च मुहुर्मुहुः ।
तदा तदा महादेवीतेजसा रक्षिता पुरी ॥ ४२ ॥

तस्मान्नाम्ना प्रळयजित्काञ्चीक्षेत्रमिदं मुने ।
एतद्रसालवृक्षं च विद्धि त्वं शङ्करात्मकम् ॥ ४३ ॥

महात्रिपुरसुन्दर्या नाथः कामेश्वराह्वयः ।
स्वयं बीजाकृतिर्भूत्वा चूतरूपेण शोभते ॥ ४४ ॥

तत्राधारस्समभवन्महेशकरुणाबलात् ।
यो भुंक्ते तत्फलं भक्त्या वेदविद्यागुरुर्भवेत् ॥४५॥

तदालोच्याहमप्यस्य फलं भुंजामि नित्यशः ।
इति तस्य वचश्श्रुत्वा समभ्यर्च्य च तं गुहम् ॥४६॥

श्रीनदेकाम्रवृक्षस्य मूले स्थित्वा च तत्फलम् ।
यो भुंक्ते स नरः कोटिलिङ्गार्चनफलं लभेत् ॥४७॥

इति दत्वा वरं तस्मै तत्रैव निवसाम्यहम् ।
पुरा तन्मूलके स्थित्वा बहवो मोक्षकांक्षिणः ॥४८॥
फलेन तस्य वृक्षस्य गतास्ते शाम्भवं पदम् ।

## क्रौञ्चविप्रोपाख्यानम्

तेषु कश्चित्पुरा विप्रस्तुङ्गभद्रातटे स्थितः ॥ ४९ ॥
शृङ्गिशैलनिवासस्थः नाम्ना क्रौञ्च इति स्मृतः ।
हिरण्मयं लिङ्गमेकं शिवभक्ताद्द्विजोत्तमात् ॥५०॥
हृत्वा चौर्येण तल्लिङ्गं रुक्मं च परिगृह्य सः ।
तद्विक्रयधनेनैव जीवति स्म दिने दिने ॥ ५१ ॥
तस्मात्क्रौञ्चात्समुत्पन्नाः पुत्राष्षोडशसंख्यकाः ।
ते तु तेनैव पापेन लिङ्गहीनास्तदाऽभवन् ॥ ५२ ॥
तान् सर्वान् लिङ्गहीनांश्च पुत्रानालोक्य दुःखितः ।
यात्रार्थं रुद्रशालाख्यं क्षेत्राणामुत्तमोत्तमम् ॥ ५३ ॥
प्रविश्य क्षणमात्रं तु चूतमूल निवासतः ।
दीर्घलिङ्गसमायुक्तान् पुत्रानालोक्य हृष्टधीः ॥ ५४ ॥
अस्माकं कुलवृद्धिश्च भवेदिति मुदान्वितः ।
चिरकालमुवासात्र काञ्च्यां क्रौञ्चससपुत्रकः ॥ ५५॥
अथ देशं पुनः प्राप्य देहान्ते मुक्तनारकः ।
दूतैः पाशुपतैर्नीतः कैलासं शिवशोभितम् ॥ ५६ ॥
तस्माच्चूततरोर्मूले निवासो मुक्तिदायकः ।
एतद्रहस्यमाख्यातं चूतवृक्षप्रभावयुक् ॥ ५७ ॥



यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ।
एकाम्रमूलवासेन यत्फलं तत्फलं लभेत् ॥ ५८ ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे चूतवृक्षप्रभावकथनं नाम सप्तमोऽध्यायः ॥

॥ श्रीरस्तु ॥

# ❀ श्री कामाक्षीविलासः ❀

## अष्टमाध्यायप्रारम्भः

सुप्रसन्नं महादेव्या नित्यकल्याणसुन्दरम् ।
महाप्रळयपापघ्नं रसालेशमहं भजे ॥ १ ॥

इति स्तुत्वा नमस्कृत्य श्रीमदेकाम्रनायकम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

एकाम्रेश्वरप्रभावः

अथ तत्र नृपश्रेष्ठ रुद्रशालाधरातले ।
तस्य चैकाम्रवृक्षस्य पूर्वे तन्मूलभूतले ॥ ३ ॥

वर्तते शंकरस्साक्षाच्छ्रीमदेकाम्रनायकः ।
उमया सैकतैर्दिव्यैर्लिङ्गरूपेण निर्मितः ॥ ४ ॥

हस्तप्रमाणमामूलात्कदळीकुसुमाकृतिः ।
उमालिङ्गनसंक्रान्तकुचकंकणमुद्रितः ॥ ५ ॥

क्षितिलिङ्गस्वरूपश्च चूतलिङ्गाकृतिस्स्वयम् ।
सदाशिवानुग्रहात्मा स चतुर्मूर्तिमध्यगः ॥ ६ ॥



आम्रवृक्षः

शिवांशश्शिवजश्शूली कैलासात्समुपागतः ।
मृगाङ्कुशवराभीतिविराजितचतुर्भुजः ॥ ७ ॥

कुन्देन्दुधवळाकारो नित्यकल्याणसुन्दरः ।
व्याघ्रचर्मपरीधानो गजचर्मोत्तरीयकः ॥ ८ ॥

भस्मोद्धूळितसर्वाङ्गस्त्रिणेत्रश्शशिशेखरः ।
सचामराम्बिकागङ्गासव्यदक्षिणसेवितः ॥ ९ ॥

गङ्गाभुजङ्गविलसज्जटामकुटमण्डितः ।
रुद्रकोट्यां निवासेन रुद्रकोटिरिति श्रुतः ॥ १० ॥

एकाम्रनिलयश्शम्भुः पुरा देव्या स्तुतो हरः ।
महाप्रळयपापघ्नः पुनः कल्याणहेतवे ॥ ११ ॥

तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ।
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ १२ ॥

उमामहेश्वरसंवादः

पुरा श्रीपार्वतीदेव्या स्त्रीणां मानरिरक्षया ।
नेत्रत्रयं महेशस्य मुहूर्तं पिहितं त्वभूत् ॥ १३ ॥

तदाऽभूत्प्रळयो घोरस्सर्वसंहारकारणम् ।
प्रळयेन जगन्नष्टं जङ्गमस्थावरात्मकम् ॥ १४ ॥

सर्वभूतक्षयोत्पन्नपातकैरतिदुस्तरैः ।
कृष्णवर्णमभूद्गौर्या विग्रहं नित्यसुन्दरम् ॥ १५ ॥

मुहूर्तानन्तरं नेत्रत्रितयं परमेशितुः ।
विमुच्य गौरी स्वतनुं कृष्णाभां वीक्ष्यदुःखिता ॥ १६ ॥

किमेतदिति संचिन्त्य विस्मिता च पुनः पुनः ।
प्रणम्य शिरसा देवी पप्रच्छ परमेश्वरम् ॥ १७ ॥

देव्युवाच--
देव देव महादेव करुणाकर शङ्कर ।
केन पापेन मे कान्तं वपुः काञ्चनसन्निभम् ॥ १८ ॥
कृष्णवर्णमभूद्घोरं कृपया वद मे प्रभो ।

ईश्वर उवाच--
श्रुणु देवि महाभागे तव नैल्यस्य कारणम् ॥ १९ ॥
शक्तीनां मानरक्षार्थं त्वया पूर्वं वरानने ।
तेजस्त्रयात्मकं चक्षुस्त्रितयं पिहितं मम ॥ २० ॥
सूर्यादीनामभावेन नष्टमासीज्जगत्त्रयम् ।
तेन पापेन महता कृष्णच्छायमभूद्वपुः ॥ २१ ॥
इत्युदीरितमाकर्ण्य भयकम्पितविग्रहा ।
व्यजिज्ञिपन्महादेवसन्निधौ शैलनन्दिनी ॥ २२ ॥

पार्वत्युवाच--
देव देव जगन्नाथ शरणागतवत्सल ।
सर्वापराधान् कृपया क्षमस्व करुणानिधे ॥ २३ ॥
केनोपायेन निर्मुक्ता भवेयं पापकर्दमात् ।
तदुपायं वदस्वेति पृष्टः प्रोवाच शङ्करः ॥ २४ ॥

ईश्वर उवाच--
गच्छ शीघ्रं महागौरि भूमौ बदरिकाश्रमम् ।
गत्वाऽऽश्रमं महापुण्यं भव त्वं शिशुरूपिणी॥ २५ ॥



अकस्माद्ब्रह्मवित्तत्र कात्यायनमहामुनिः ।
आगमिष्यत्यपुत्रस्त्वां दृष्ट्वा तत्र मुदान्वितः ॥ २६ ॥

ज्ञात्वा ज्ञानेन दिव्येन त्वां गौरीं शिशुरूपिणीम् ।
संगृह्य त्वां मुनिस्तुष्ट्या यास्यति स्वाश्रमं प्रति ॥२७॥

अष्टवर्षावधि प्रीत्या भवतीं पूजयिष्यति ।
पश्चान्ममाज्ञया तत्र ऋषेः कात्यायनस्य च ॥ २८ ॥

योगदण्डं चाक्षमालां दीपाधारं घटद्वयम् ।
व्यजनं चामरद्वन्द्वं विद्याधारं च पुस्तकम् ॥ २९ ॥

व्याघ्रासनं तप्तमुद्रं गङ्गासैकतमेव च ।
गङ्गातीर्थं च छत्रं च गृहीत्वा च मनोन्मनि ॥३०॥

दुर्भिक्षं भविता काश्यां तत्काले त्वं शुचिव्रता ।
गत्वा तामन्नदानेन सद्भ्यस्तत्र मनोन्मनि ॥३१॥

अन्नपूर्णेति विख्याता स्थित्वा द्वादशवत्सरम् ।
कात्यायनि ततः पश्चात्प्राप्स्यसे दक्षिणां दिशम् ॥३२॥

यत्र व्याघ्रासनं सोमवृत्तं तत्सूत्रकं घटम् ।
सैकतं लिङ्गरूपं च जपाक्षो बिल्वमालिका ॥ ३३ ॥

नागभूषणकं छत्रं त्रिशूलं योगदण्डकम् ।
चामरं युवतीयुग्मं व्यजनं शुकरूपकम् ॥ ३४ ॥

घटदीपद्वयं वह्निरूपं धेनुश्च पुस्तकम् ।
विद्याधारं सूचिकां च तप्तमुद्रं च साङ्कुरम् ॥ ३५ ॥

गङ्गातीर्थं पयोरूपं भवेद्यत्र मनोन्मनि ।
तत्काञ्चीनगरं विद्धि तत्र सोमसुवृत्तके ॥ ३६ ॥

सूत्रे तत्सैकतं लिङ्गं बिल्वमालासमन्वितम् ।
नागभूषणसंयुक्तं नित्यं क्षीराभिषेचितम् ॥ ३७ ॥

मुद्राङ्कुरं च नैवेद्यं कृत्वा ध्यात्वा तु शाम्भवि ।
पार्श्वयोर्वनिते स्थाप्य गोक्षीरैस्समयासनैः ॥ ३८ ॥

करे धृत्वा शुकश्रेष्ठं पंचाग्नौ सूचिकोपरि ।
स्थित्वा मां ध्यायती भक्त्या तपः कुरु सुदुश्चरम् ॥३९॥

तत्राहं सन्निधिं कृत्वा त्वद्विवाहं करोम्यहम् ।
तेनैव नश्येत्पापोपि तव रूपं शुभं भवेत् ॥ ४० ॥

तस्मादेवं प्रकर्तव्यं मम चोक्त्यातिभक्तितः ।
इति तस्य वचश्श्रुत्वा तमेव करुणानिधिम् ॥४१ ॥

प्रणम्य शिरसा नाथं स्तुत्वा नत्वा मुहुर्मुहुः ।
बदरीकवनं प्राप्य शिशुरूपं समाश्रिता ॥ ४२ ॥

कात्यायनेन पृष्टा च तस्मै कैलासवृत्तिम् ।
दत्वाष्टवार्षिकी कन्या समादायासनादिकान् ॥४३॥

काश्यामन्नप्रदानेन सान्नपूर्णेति विश्रुता ।
काशीराजाय भक्ताय दत्वा मुक्तिं सुदुर्लभाम् ॥४४॥

प्रयाता दक्षिणामाशामुद्दिश्य परमेश्वरी ।
यथा प्रचोदिता पूर्वं तथा दृष्ट्वा घटादिकान् ॥४५॥

काञ्चीक्षेत्रमिति ज्ञात्वा तद्दूरादेशमम्बिका ।
तत्र तत्र वने चूतं नानावृक्षसमन्विते ॥ ४६ ॥

विचिन्वत्याऽथ पार्वत्या दृष्टश्चैकाम्रवृक्षकः ।
आश्चर्ययुक्ता सा गौरी तद्वृक्षाय मनोहराम् ॥४७॥



तापसी श्रीकामाक्षी



एकाम्राख्यां महापुण्यां दत्वा तन्मूलभूतले ।
यथा नाथोदिता पूर्वं तथा शम्भुमपूपुजत् ॥ ४८ ॥
स्वनायकं समुद्दिश्य चकारोग्रं तपोऽम्बिका ।
ततः कतिपये काले भगवद्ध्यानतत्परः ॥ ४९ ॥
नारदो नाम देवर्षिस्त्रिकालज्ञानतत्ववित् ।
तीर्थयात्रापदेशेन चचार निखिलां भुवम् ॥ ५० ॥
अथ काञ्चीं समासाद्य गौरीं तत्र तपस्विनीम् ।
ददर्श परमप्रीत्या तपोनैष्ठिककन्यकाम् ॥ ५१ ॥
ततोष्टवर्षिणी बाला तदा सर्वांगसुन्दरी ।
दृष्ट्वा समागतं तत्र समाराध्य मुनीश्वरम् ॥ ५२ ॥
चन्द्रचूडस्य जायात्वमिच्छन्ती गिरिनन्दिनी ।
उपायं मुनिशार्दूलमपृच्छद्विनयान्विता ॥ ५३ ॥
अथ तत्र मुनिश्रेष्ठस्सन्तुष्टः कन्यकार्चनैः ।
शिवप्राप्त्यै सुखोपायं पञ्चबाणमनुं मुनिः ॥ ५४ ॥
उपदिश्य तदा गौर्यै गतवान् दक्षिणां दिशम् ।

### तपःकामाक्षीप्रभावकथनम्

ततो बाला महागौरी पञ्चबाणस्य विद्यया ॥ ५५ ॥
स्वजन्मऋक्षमारभ्य षण्मासान्तं महेश्वरी ।
सम्पूज्य परमं लिङ्गं चकारोग्रं तपोऽम्बिका ॥ ५६ ॥
ततः कैलासशिखरे निर्दग्धेऽनङ्गवह्निना ।
गौरी प्रयोगजनितं काममन्त्रेण कल्पितम् ॥ ५७ ॥

कामानलं दुर्निवारं समालोच्य महेश्वरः ।
योगिनीभिर्विहृत्यापि न मुक्तो मदनाग्निना ॥५८॥
उमाकृतं विचिन्त्याथ मूर्ध्नि कान्तस्य जाह्नवी ।
तरङ्गैरुज्वलांभोभिर्महाप्रळयरूपतः ॥ ५९ ॥
चकारैकास्यतो गङ्गां महातापनिवृत्तये ।
तन्निमग्नतनुर्भूत्वा सुखेनोवास शङ्करः ॥ ६० ॥
उमास्थानं भजस्वेति गङ्गामादिशदीश्वरः ।
ततश्शिवाज्ञया गङ्गा महाप्रळयरूपिणी ॥ ६१ ॥
सार्धत्रिकोटितीर्थानि हररोमस्थितानि च ।
समाकृष्यैकयतो गङ्गा सर्वव्यापकमीश्वरम् ॥ ६२ ॥
धृत्वा हृदयतश्शम्भुं प्रच्छन्ननिजविग्रहम् ।
अत्यन्तशीतलाकारा महाप्रलयवेगतः ॥ ६३ ॥
तरङ्गैरुज्वलाम्भोभिर्नन्दिशैलसमुद्गता ।
उमादेशं समालोक्य ययौ त्रिपथगेश्वरी ॥ ६४ ॥
ततस्तत्प्रळयं दृष्ट्वा गौरी काञ्चीनिवासिनी ।
वदन्ती कम्पकम्पेति प्रळयोदेन कम्पिता ॥ ६५ ॥
सा तत्प्रळयबन्धार्थं स्वदूतीं परिचारिकाम् ।
ततश्चाज्ञापयामास तपोनिर्विघ्नहेतवे ॥ ६६ ॥

### प्रळयबन्धिन्याख्यदुर्गाप्रभावः

अथ दुर्गा महाकाळी दूतिका परिचारिका ।
प्रळयोदविनाशाय प्रळयाभिमुखी तदा ॥ ६७ ॥



कपालं निजपाणिस्थं विश्वभक्षणसंज्ञितम् ।
निक्षिप्य तूष्णीमभवच्छोषणाय महाम्भसः॥ ६८ ॥
ततः प्रळयवद्धोरं जलौघं हरसंयुतम् ।
कपालेनैव महता शोषयामास तत्क्षणात् ॥ ६९ ॥
निराकृत तपोविघ्ना सा गौरी काळिकाप्रिया ।
काळिकायै ददावाख्यां महाप्रळयबन्धिनीम् ॥७०॥
तत्काळिकाकपालस्थो भग्नो भूत्वा महेश्वरः ।
कोपेन महता देवो सहस्रमुखसंयुताम् ॥ ७१ ॥
जटाभारान्महागङ्गां मुमोच परमेश्वरः ।
शिवाज्ञया महागौरीतपोविघ्नसमुद्यताम् ॥ ७२ ॥
तां सहस्रमुखीं गङ्गां महाप्रळयसन्निभाम् ।
कपालोत्पतितां दृष्ट्वा भयार्ताभूत्तपस्विनी ॥ ७३ ॥
पुनस्तद्बन्धने दक्षा नाभूत्प्रळयबन्धिनी ।
इति सम्यग्विचिन्त्याम्बा सहजं पुरुषोत्तमम् ॥७४॥

### चन्द्रकण्ठाख्यविष्णुप्रभावः

पुनः प्रळयबन्धार्थं चिन्तयामास केशवम् ।
ततो हरिः प्रसन्नात्मा दयया करुणानिधिः॥ ७५ ॥
उमाप्रीत्यै महाविष्णुस्तस्या भीतिनिवृत्तये ।
भुवि निक्षिप्तचरणं कोटीरोल्लिखिताम्बरम् ॥ ७६ ॥
चन्द्रकण्ठं महारूपं समाश्रित्य तदा बभौ ।
तथा विधुं भ्राजमानं तोये किरणसंचयान्॥ ७७ ॥

दृष्ट्वा जले महारूपं निश्चित्य शशिशेखरम् ।
भीतभीतां हरिर्गौरीमिदं वचनमब्रवीत् ॥ ७८ ॥

भगवानुवाच—

मुञ्च मुञ्च महाभीतिं चन्द्रकण्ठोऽहमीश्वरि ।
चन्द्रदर्शनमात्रेण वञ्चिताऽसि वरानने ॥ ७९ ॥
आगमिष्यति तोयात्मा हरस्त्वामद्य शोधितुम् ।
शिव एव गतिस्साक्षादिति ध्यात्वाऽतिभक्तितः ॥८०॥
इदं तत्सैकतं लिङ्गमालिंग्य शरणं व्रज ।
निरस्य प्रळयं घोरं प्रसन्नः परमेश्वरः ॥ ८१ ॥
परिणेष्यति कल्याणि भवतीं दृढनिश्चयाम् ।
इत्युक्त्वा चन्द्रकण्ठाख्यदेवः कमललोचनः ॥ ८२ ॥
तदादि वर्तते तत्र काञ्च्यां तत्सन्निधौ हरिः ।
तथैवाथ महागौरी प्रळयोदे समागते ॥ ८३ ॥
शिव एव गतिर्मेऽद्य तस्मिन्नेकाग्रमानसा ।
प्रळयाम्बुविशोषाय लिङ्गमालिंग्य संस्थिता ॥ ८४ ॥

तपःकामाक्षीकृतशङ्करसाक्षात्कारः

ततस्तस्मिंस्तु समये कल्पे ताण्डवसंज्ञिके ।
मन्वन्तरे तु भौत्याख्ये तृतीये तामसे शुभे ॥ ८५ ॥
युगे कृताख्ये भगवत्कमठावसरान्विते ।
भवाब्दे चैत्रके मासे मीनस्थे च प्रभाकरे ॥ ८६ ॥
शुक्ले चोत्तर फल्गुन्यां पूर्णिमायां महेश्वरः ।
तारातृतीयभागादाविरासीद्द्रुमान्तिके ॥ ८७ ॥



ततस्स भगवानीशस्स्वकीयार्धासने शुभे ।
गौरीमुद्धृत्य हस्ताभ्यां स्थापयामास वामतः ॥८८॥
ततो विमुक्तपापा च तप्तकाञ्चनसन्निभा ।
प्रणम्य शिरसा नाथं सुप्रसन्नं महेश्वरम् ॥ ८९ ॥
शिवार्धासनमारुह्य बभौ शृङ्गारवेषतः ।
ततो व्योमगता रौद्रा नन्दिमुख्याखिला गणाः॥९०॥
दृष्ट्वा च शांकरीं लीलां गौरीवशगतं हरम् ।
नन्द्याद्या मुनयो देवाश्शिवकल्याणकांक्षया ॥ ९१ ॥
आगत्य रुद्रशालायां प्रार्थयामासुरीश्वरम् ।
समीपस्थं हरिं दृष्ट्वा प्रोवाच परमेश्वरः ॥ ९२ ॥
श्रुणु विष्णो महाभाग गौरीकल्याणमत्र वै ।
प्रत्यब्दं करवाणीति घटजाय प्रतिश्रुतम् ॥ ९३ ॥
गौरी च प्रार्थयत्यद्य भगिनी तव मां हरे ।
तस्मादत्र विवाहार्थमुत्सवः क्रियतां त्वया ॥ ९४ ॥
इति शम्भुवचश्श्रुत्वा विष्णुर्नत्वा महेश्वरम् ।
समस्तदेवानाहूय चतुर्मुखपुरोगमान् ॥ ९५ ॥
उवाच परया भक्त्या हरिरानन्दतुन्दिलः ।

कामाक्ष्येकाम्रनाथयोरुद्वाहारम्भघट्टः

श्रुणुध्वमखिला देवाः कामाक्षीचूतनाथयोः॥ ९६ ॥
कल्याणमत्र कर्तव्यं युष्माभिस्त्वरयाधुना ।
दिग्भ्यस्स्वर्गाच्च सम्भाराश्चानेतव्याः क्षणादिति॥९७॥

ते श्रुत्वा वचनं विष्णो रत्नानन्दसमन्विताः । रत्या
अहंपूर्विकया देवास्स्वर्गं प्राप्य मुदान्विताः ॥ ९८ ॥
पृथक्पृथक्च ते सर्वसम्भारान्समुपाहरन् ।
ततो देवसमानीतसम्भारैस्सुमनोहरैः ॥ ९९ ॥
अलंचकार मधुहा काञ्च्यां वीथीश्च सर्वशः ।
मण्टपान्मण्डनैस्सर्वैश्शालाहर्म्यादिकानपि ॥ १०० ॥
रम्भास्तम्भेक्षुनारङ्गनारिकेळाम्रसत्फलैः ।
कुन्दारविन्दमन्दारपाटलीपारिजातकैः ॥ १०१ ॥
मल्लिकाचम्पकाशोककेतकीवकुळान्वितैः ।

कल्याणमण्टपवर्णन घट्टः

पुष्पैश्चित्रवितानैश्च कायमानैश्च शोभिते ॥ १०२ ॥
गन्धवत्तैलसंसिक्तस्निग्धेन्दुमणिकुट्टिमैः ।
शातकुम्भकनत्कुम्भैर्माणिक्यमणितोरणैः ॥ १०३ ॥
देदीप्यमानहेमाढ्यदिव्यवस्त्रैर्विराजिते ।
सुवर्णपूर्णकुम्भाग्रलसद्दीपोपशोभिते ॥ १०४ ॥
धगद्धगितहेमाढ्यदर्पणव्रजमण्डिते ।
स्वर्णपाञ्चालिकाकोटिकरदीपविराजिते ॥ १०५ ॥
हेममर्दळनिस्साणमुरळीकाहळीरवैः ।
मुखरीकृतदिग्भागे वीणावेणुरवैरपि ॥ १०६ ॥
ऊर्वशीमेनकारम्भानाट्यव्यंजकरंजितैः ।
क्वचित्किन्नरगन्धर्वगीतवाणीमनोहरे ॥ २०७ ॥



क्वचित्सेवासमायातसुरस्त्रीगणभूषिते ।
क्वचिच्च शृङ्गारस्त्रीगीतमङ्गळगीतके ॥ १०८ ॥
क्वचिन्मुनिद्विजानीकस्वस्तिवाचनघोषिते ।
क्वचिद्देवासुरैः क्लप्तसेवाकलहशब्दिते ॥ १०९ ॥
नानादेशसमायातकुलस्त्रीगणभूषिते ।
नानादेशसमायातराजमण्डलमण्डिते ॥ ११० ॥
कलधौत कलाबद्धरम्भास्तम्भाळिमेदुरे ।
स्फटिकोपलसोपानजालकाङ्कितमार्गके ॥ १११ ॥
सुवर्णचित्रितोल्लोचपताकासमलंकृते ।
चारुचामीकराभासकल्याणमणिमण्टपे ॥ ११२ ॥
सुसाररत्नवैडूर्यहेमसिंहासनोत्तमे ।
वज्रमाणिक्यसंकीर्णकल्याणमणिपीठके ॥ ११३ ॥
किरीटहारकेयूरमणिकुण्डलभूषणैः ।
भूषितं स्वर्णचित्राढ्यपट्टाम्बरपरिष्कृतम् ॥ ११४ ॥
निवेश्य शङ्करं विष्णुः प्रियां लक्ष्मीमथाब्रवीत् ।

विवाहवेषालंकृतकामाक्षीवर्णनम्

अलङ्कृत्य प्रिये गौरीमाकल्पैरानयेति वै ॥ ११५ ॥
पत्युक्तं कमला श्रुत्वा कामाक्षीं प्राप्य तत्क्षणात् ।
भूषणैर्भूषयामास भुवनत्रयसुन्दरीम् ॥ ११६ ॥
शिञ्जत्काञ्चनमञ्जीररञ्जितांघ्रिसरोरुहाम् ।
कनत्काञ्चनदेदीप्यत्काञ्चीबद्धकटीतटाम् ॥ ११७ ॥

मुक्ताकञ्चुकसंवीतस्तनपङ्कजकुड्मलाम् ।
रत्नाङ्गुळीयसन्दोहरमणीयकराङ्गुलिम् ॥ ११८॥
कुरुविन्ददळाबद्धकटकात्तकराम्बुजाम् ।
नागमाणिक्यसम्प्रोतमुक्तादामलसद्गळाम्॥ ११९ ॥
मार्ताण्डमण्डलाकाररत्नकुण्डलमण्डिताम् ।
नासामुक्तामणीव्याजतारकात्ताब्जवक्त्रकाम् ॥१२०॥
निजसीमन्तसीमान्तश्यामवज्रललन्तिकाम् ।
फालान्तविलसद्रत्नमल्लिकामणिशोभिताम् ॥१२१॥
वाळीरत्नप्रभापाळीपरीतश्रवणद्वयाम् ।
मुक्तारत्नस्फुरच्चूलीरमणीयशिरोरुहाम् ॥ १२२ ॥
नितम्बबिम्बसंलम्बमणिरञ्जितवेणिकाम् ।
तटित्प्रतिभटाकारस्वर्णपीताम्बरावृताम् ॥ १२३ ॥
कस्तूरीघनसाराढ्यदिव्यचन्दनचर्चिताम् ।
मल्लीचम्पकपुष्पादि मालाजालसमन्विताम्॥१२४॥
मन्दस्मितोदरोत्पुष्प शोणबिम्बाधरोज्वलाम् ।
नवयौवनसम्भूतसौन्दर्यातिथिदेवताम् ॥ १२५ ॥
कामाक्षीमुत्पलाभाक्षीं देवीमक्षीणवैभवाम् ।
श्रीनदेकाम्रनाथस्य पार्श्वे सव्ये निवेश्यताम्॥१२६॥

कामाक्ष्यैकाम्रनाथयोर्विवाहघट्टः

नत्वा शिवौ रमा भक्त्या गृहीतसितचामरा ।
वीजयामास संयत्ता वाण्या सह मुदा तदा ॥१२७॥



श्री चोरविष्णुः

श्री सौन्दर्यलक्ष्मी

अथाज्ञप्तो महेशेन हरिर्नत्वा शिवौ स्वयम् ।
महोत्सवे महेशस्य दशमे दिवसे शुभे ॥१२८॥

श्रीकरोत्तरफल्गुन्यां सुमुहूर्ते सुलग्नके ।
ब्रह्मोक्तशैवमन्त्रेण संकल्प्य च यथाविधि ॥१२९॥

क्षीराद्यै रमयामुक्तैस्सुवर्णकरकाग्रतः
पादौ प्रक्षाळ्य देवस्य भक्त्या परमया हरिः ॥१३०॥

स्वीयपीताम्बराग्रेण मृदु सम्मृज्य पाणिना ।
दत्वा शंकरहस्ताब्जे मधुपर्कं समन्त्रक ॥१३१॥

सुवर्णकरकाल्लक्ष्म्या मुक्तधाराम्बुना सह ।
श्रीमदेकाम्रनाथाय कामाक्षीं प्रददौ हरिः ॥१३२॥

देवोपि हरिणा दत्तां पाणौ जग्राह पार्वतीम् ।
अथ धाता स विज्ञाप्य शम्भवे मोहहेतवे ॥१३३॥

माङ्गल्यसूत्रं देवेन धारयित्वा शिवागळे ।
आपादयित्वा हवनं विधिवत्पङ्कजासनः ॥१३४॥

क्रमात्सप्तपदं साधु चारयित्वा समन्त्रकम् ।
लाजहोमादिकं चापि सर्वमङ्गळकर्म च ॥१३५॥

कारयित्वा स्वयं विष्णुर्ब्रह्मणा सह सङ्गतः ।
कामाक्षीवल्लभ ध्यात्वा स्तुत्वा भक्त्या ननाम च ॥१३६॥

ततो देवाश्च मुनयो वदन्तो नैगमीं स्तुतिम् ।
केचिज्जयजयेत्युच्चैरन्ये हरहरेति च ॥१३७॥

तुष्टुवुर्मुनिपत्न्यश्च श्रीमदेकाम्रनायकम् ।
अथ विष्णुस्तु मनसा ध्यात्वा ते शंकराम्बिके ॥१३८॥



पायसान्नैस्सुभक्ष्यैश्च मोचापनसराशिभिः ।
भोजयित्वा तु तान्विप्रान्नानारत्नैश्च भूषणैः ॥१३९॥

गन्धैश्च पुष्पमालाभिस्ताम्बूलैस्स्वर्णपुष्पकैः ।
ब्राह्मणान्तोषयित्वा समर्पयित्वेशपादयोः ॥ १४० ॥

विवाहसमये महेशाय विश्वकर्मादिसमर्पित क्रीडारथादिकथनम्

यथा त्रिपुरसंहारे भूरथो विश्वकर्मणा ।
निर्मितोऽभूत्तथा कृत्वा रथमेकं हिरण्मयम् ॥१४१॥

उत्सवाय महेशस्य विश्वकर्मा ददौ मुदा ।
अर्पयामास मघवान् स्फाटिकं छत्रमुत्तमम् ॥१४२॥

जटामकुटकं दिव्यं नवरत्नविभूषितम् ।
ददौ तत्र महेशाय साम्बाय कमलासनः ॥१४३॥

ततो ब्रह्मादयो देवा भक्ताः पाशुपतोत्तमाः ।
ततस्सायन्तने काले जटामकुटभूषितम् ॥ १४४ ॥

उमासमेतमीशानं दिव्ये भूमिरथे शुभे ।
स्फाटिकछत्रसंवीते समारोप्य महोत्सवम् ॥१४५॥

कारयित्वा पुनः पीठे स्वस्थाने स्थाप्य शङ्करम् ।
ते सर्वे प्रार्थयामासुः काञ्च्यां सान्निध्यमीशितुः ॥१४६॥

ईश्वर उवाच--

अहं मन्दाकिनीतीरे कैलासे पर्वतोत्तमे ।
सदाशिव इति ख्यातो निवसामि यथा तथा ॥१४७॥

एकाम्रनाथनाम्नैव कामाक्ष्या सह सन्ततम् ।
काञ्च्यां रसालमूलेऽत्र निवसाम्याश्रितेष्टदः ॥१४८॥

यूयं भवन्तो मद्भक्तास्सदा मद्दर्शने रताः ।
सर्वदाऽत्रैव तिष्ठन्तु कैलासादधिके पुरे ॥ १४९ ॥

वर्षे वर्षे चैत्रमासे मत्प्रसन्नदिने शुभे ।
मम गौर्याश्च कल्याणमलंकारं च पूजनम् ॥ १५० ॥

उत्सवं च प्रकुर्वन्तु विप्राराधनपूर्वकम् ।
इत्युक्त्वा शङ्करस्तेभ्यस्तत्रैवोवास हृष्टधीः ॥ १५१ ॥

ततोऽष्टवार्षिका गौरी नत्वा स्तुत्वा महेश्वरम् ।
दृष्ट्वा सभाजनांस्तत्र भक्तानुग्रहकांक्षया ॥ १५२ ॥

सुप्रीता सर्वभक्तेभ्यस्तेभ्यो गौरी वरं ददौ ।
शिवाविर्भावदिवसे काञ्च्यामेकाम्रसन्निधौ ॥१५३॥

कल्याणमावयोर्भक्त्या यश्चरेत्पुरुषोत्तमः ।
सम्प्राप्नोतीह तत्कोटिकन्यादानफलं शुभम् ॥१५४॥

इति दत्वा वरं गौरी अक्षिभ्यामखिलात्मनाम् ।
सर्वकामप्रदानेन कामाक्षीत्यभिधान्विता ॥ १५५ ॥

वामभागे महेशस्य वसन्ती सुचिरं सती ।
महाशक्तिस्समभवत्कामाक्षी सा च पार्वती ॥१५६॥

अद्य तत्र महादेवो लिङ्गरूपेण भासते ।
पुरा पाशुपतश्रेष्ठा बहवो मोक्षकांक्षिणः ॥ १५७ ॥

सेवया तस्य देवस्य गतास्ते शाम्भवं पदम् ।

शम्भुनामद्विजोपाख्यानम्

तेषु कश्चित्पुरा विप्रः कावेरीतीरसंस्थितः ॥१५८॥



तत्र तालपुरावासी कृष्णवेदी द्विजोत्तमः ।
नाम्ना शम्भुरिति ख्यातो रुद्रशालाधरातले ॥१५९॥

शिवकल्याणमालोक्य हराविर्भाववासरे ।
पुनस्स्वदेशमास्थायायुतसंवत्सरावधि ॥ १६० ॥

जीवंस्तेनैव देहेन स्ववंशमभिवृद्धिगम् ।
दृष्ट्वा सहस्रपर्यन्तं तत्तत्पुत्रानुमालया ॥ १६१ ॥

कन्यादानफलोद्भूतैः कुटुम्बैः परिवारितः ।
भुक्त्वा भोगान् सुखेनैव देहान्ते शाङ्करैर्गणैः ॥१६२॥

आरोपितो विमानेऽस्मिन् प्रययौ शाम्भवं पदम् ।
तस्मात्कल्याणवरदस्साक्षान्मुक्तिप्रदो हरः ॥१६३॥

वर्तते रुद्रशालायां रसाले गिरिजान्वितः ।
कोटिलिङ्गप्रतिष्ठायां यत्फलं स्थापकस्य तु ॥१६४॥

तत्फलं लभते मर्त्यस्सकृच्चूतेशसेवया ।
एतद्रहस्यमाख्यातं रसालेशप्रकाशकम् ॥ १६५ ॥

यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ।
दर्शनाच्चूतनाथस्य यत्फलं तत्फलं भवेत् ॥ १६६ ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे रसालेशप्रभावकथनं नाम अष्टमोऽध्यायः ॥

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

## नवमाध्यायप्रारम्भः

हररोमसमुद्भूतसर्वतीर्थसमन्वयात् ।
सर्वतीर्थाह्वयं वन्दे कम्पया पूरितं सरः ॥ १ ॥
इति स्तुत्वा नमस्कृत्य पात्रं तत्सर्वतीर्थकम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

सर्वतीर्थाख्यपुष्करणीप्रभावकथनम्

अथ तत्र नृपश्रेष्ठ रुद्रशालाधरातले ।
श्रीमदेकाम्रनाथस्य नैरृतेऽष्टांशतो नृप ॥ ३ ॥
तत्र तीर्थं महापुण्यं सर्वपापहरं नृणाम् ।
सर्वतीर्थमिति ख्यातं सर्वतीर्थसमन्वयात् ॥ ४ ॥
नन्दिशैलः क्षीरसरित्क्षीराब्धिर्गोपुरं तथा ।
वराहाख्यापक्षपुरी चाम्बिकानगरं तथा ॥ ५ ॥
देवमूलं चूतमूलं सूर्यपुष्करिणीतटम् ।
चन्द्रपुष्करिणीतीर्थं क्षेत्रप्रस्थ च कुण्डिकम् ॥ ६ ॥



निषण्णाख्या क्षीरसरित्समुद्रश्चापि तत्क्रमात् ।
सुप्रवाहान्विता कम्पा नदी चाव्यक्तगामिनी ॥ ७ ॥
धरान्तर्वाहिनी भूत्वा सा देवी सर्वतीर्थके ।
पात्रान्तस्तोयरूपेण कम्पा तत्र पपात च ॥ ८ ॥
पुरा कम्पाप्रवाहेण शोषिता तोयरूपिणी ।
तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ॥ ९ ॥
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ।
पुरा शम्भुस्तपस्विन्यास्समालिंगनमात्रतः ॥ १० ॥
कामपाशाद्विमुक्तात्मा त्यक्तकामानलोऽभवत् ।
कुचकंकणमुद्राभ्यां मुद्रितश्चन्द्रशेखरः ॥ ११ ॥
शिवायै प्रीतिमास्थाय तस्या भीतिविक्तये ।
स्वजठाभारजां गङ्गां भूमौ प्रच्छन्नरूपिणीम् ॥ १२ ॥
धरागुप्तां ततः कृत्वा भूमौ पादेन शङ्करः ।
उमाकल्याणमाश्रित्य बभौ कल्याणवेषतः ॥ १३ ॥
ततः प्रळयबन्धिन्या कम्पायाः प्रळयागमे ।
पूर्वं प्रळयनाशाय निक्षिप्तं यत्कपालकम् ॥ १४ ॥
कम्पाम्भसा समायुक्तं यावत्पात्रान्तवारिणा ।
तत्कपालं बभौ तत्र विमुक्तप्रळयोदकम् ॥ १५ ॥
अथ तत्तीर्थमाहात्म्यं श्रुत्वा गौर्यष्टवार्षिका ।
नवयौवनसौन्दर्यं कांक्षन्ती शङ्करेण च ॥ १६ ॥
अनुग्रहीतवाक्योक्तविधिना सा च पार्वती ।
तस्य तीर्थस्य सोपानसम्यगावरणादिकान् ॥ १७ ॥

कारयित्वा महागौरी ततस्सा देवशिल्पिना ।
सार्धत्रिकोठितीर्थैक्यं गतया कंपया सह ॥ १७ ॥

सदा मिळिततीर्थत्वात्सर्वतीर्थमिति श्रुताम् ।
दिव्याभिधां प्रतिष्ठाप्य तस्य तीर्थस्य भूपते॥ १९ ॥

तस्मिन् तीर्थेथ सा स्नात्वा नवयौवनशालिनी ।
सौन्दर्ययुक्ता सा गौरी गत्वा शोभां सुमङ्गळाम्॥२०॥

तप्तकांचनसंकाशां कामाक्षीं कामदायिनीम् ।
ऋग्वेदं च यजुर्वेदं सामवेदमनुक्रमात् ॥ २१ ॥

सर्वेभ्यो ब्राह्मणेभ्यश्च गोभूगृहहिरण्यकान् ।
क्ष्मा चन्द्रार्कपर्यन्तं जीवनं शाश्वतं ददौ ॥ २२ ॥

तद्द्विजेभ्योऽथ देवेशी महादान पुरस्सरम् ।
कामकोष्ठं प्रविश्याथ धर्मशालां विरच्य च॥२३ ॥

तत्रादिशक्तिं कामाक्षीं महात्रिपुरसुन्दरीम् ।
समभ्यर्च्य महाशक्तिं प्रणम्य शिरसाऽथ ताम्॥२४॥

पुनस्स्वयं धर्मशालां प्रविश्याम्बां समीक्ष्य च ।
द्वात्रिंशद्धर्मकृत्यानि कृत्वा लोकोत्तराणि च ॥२५॥

क्षमाचन्द्रार्कपर्यन्तं धर्मपालनकांक्षया ।
धनस्याक्षयपात्रं च कामधेनुं सुरद्रुमम् ॥ २६ ॥

चिन्तामणिं प्रतिष्ठाप्य धर्मशाला गृहोत्तमे ।
धर्मप्रारम्भकाले तु द्वात्रिंशद्धर्ममुत्तमम् ॥ २७ ॥

परिपालयितुं तत्र राजमूलाद्युगे युगे ।
धर्मवन्तं गणाध्यक्षं देवी भक्तं नराधिपम् ॥ २८ ॥



सम्पूज्य तद्वशं कृत्वा धर्मशालां महीपते ।
अथ प्रदक्षिणीकृत्य कामकोष्टेश्वरीं पराम् ॥ २९ ॥

प्रणम्य शिरसा गौरी कामाक्षी कच्छपेश्वरम् ।
सम्पूज्य विधिवच्छम्भुं काञ्चीक्षेत्रेश्वरं शिवम्॥३०॥

प्रदक्षिणनतीः कृत्वा सर्वतीर्थसरः पुनः ।
समागत्य महातीर्थं त्रिः परीत्य महेश्वरी ॥ ३१ ॥

नमस्कृत्याथ तीर्थाय महागौरी वरं ददौ ।
यात्रया सर्वतीर्थेषु स्नानतो यत्फलं नृणाम् ॥ ३२ ॥

दर्शनात्सर्वतीर्थस्य तत्फलं चाश्नुते शिवम् ।
इति दत्वा वरं गौरी पुनर्नाथान्तिकं मुदा ॥ ३३ ॥

समागत्य प्रणम्येशं तस्य वामासनं मुदा ।
गत्वा सा नित्यकल्याणी बभौ शृङ्गारवेषतः ॥३४॥

तदादि वर्तते तत्र सर्वतीर्थं मनोरमम् ।
तस्यां काञ्च्यां यत्र यत्र सन्ति तीर्थानि भूपते॥३५॥

तत्र तत्रोक्तकालेषु स्नानतो यत्फलं लभेत् ।
सर्वतीर्थे सकृत्स्नानात्तत्सर्वफलमश्नुते ॥ ३६ ॥

पुरा तस्मिन् सर्वतीर्थे बहवो मोक्षकांक्षिणः ।
स्नात्वा विमुक्ताः पापैश्च गतास्ते शाम्भवं पदम् ॥३७॥

### सोमाख्यद्विजोपाख्यानम्

तेषु कश्चित्पुरा विप्रस्ताम्रपर्णीतटस्थितः ।
अगस्त्यगोत्रसम्भूतस्सामवेद तपोधनः ॥ ३८ ॥

मुक्तापुरस्थो सोमाख्यस्स कदाचिद्द्विजोत्तमः ।
मतङ्गजां नवोढां तां सुन्दरीं सुमनोरमाम् ॥ ३९ ॥

काममोहयुतां दृष्ट्वा तस्यै सङ्गात्सुतं ददौ ।
ततो जातेन पुत्रेण पितरस्तद्द्विजस्य च ॥ ४० ॥

स्वर्गस्था नरकं प्राप्ता वंशजस्य तु दुष्कृतात् ।
तत्पापाच्छ्राद्धकाले तु दत्तं पिण्डं क्रिमीभवत् ॥४१॥

दृष्ट्वा तद्ब्राह्मणस्सोमो व्याकुलात्तीर्थयात्रया ।
रुद्रशालां ततः प्राप्य सर्वतीर्थे महोदके ॥ ४२ ॥

स्नानमात्रेण विप्रस्य पितरः पुण्यवैभवात् ।
त्यक्त्वा तु नरकक्लेशान् पुनः प्राप्तास्सुरालयम् ॥४३॥

तेन पुण्येन सोमस्य तीर्थश्राद्धविधौ तदा ।
ओदनात्मकपिण्डं तद्दृष्ट्वा साश्चर्यमानसः ॥ ४४ ॥

अथ तत्र द्विजस्सोमो वसन्देहावधौ पुरा ।
सर्वतीर्थप्रभावेन प्रयातश्शाम्भवं पदम् ॥ ४५ ॥

तस्मात्तत्सर्वपापघ्नं पुण्योदं सर्वतीर्थकम् ।
अद्यापि वर्तते तत्र तथा चैकाम्रभूरुहः ॥ ४६ ॥

रसालेशस्सर्वतीर्थं सर्वतीर्थफलप्रदम्
वर्ततेऽद्यापि तत्रैव रुद्रशालाधरातले ॥ ४७ ॥

न पश्येद्यो रुद्रशालां व्यर्थात्मा नरकाश्रयः ।
तस्माद्भूमौ तु यो मर्त्यो रुद्रशालां प्रपश्यति॥४८॥

स एव धन्यो लोकेऽस्मिन् स शिवः किमुतापरे ।
तस्मादवश्यं कर्तव्यं रुद्रशालाप्रदर्शनम् ॥ ४९ ॥



न चेन्नित्यं स्नानकाले श्लोकानेतान् पठेन्नरः ।
श्रीशैलस्याग्निदिग्भागे योजने चैकविंशके ॥ ५० ॥

कावेरीकृष्णयोर्मध्ये तत्र गौरीतपोवने ।
कम्पाया दक्षिणे कूले रुद्रशालाधरातले ॥ ५१ ॥

एकाम्रनायकश्शम्भुस्सदा तत्रैव वर्तते ।
उमालिङ्गनसंक्रान्त कुचकंकणमुद्रितम् ॥ ५२ ॥

लिङ्गमेकाम्रनाथस्य सैकतं समुपास्महे ।
योऽर्चयेद्रुद्रशालायां लिङ्गमेकं प्रयत्नतः ॥ ५३ ॥

कोटिलिङ्गार्चनफलं शिवलोकं स गच्छति ।
यो वसेद्रुद्रशालायां क्षणार्धं वा तदर्धकम् ॥ ५४ ॥

मुच्यते सर्वपापेभ्यस्साक्षाद्भर्गो नराकृतिः ।
शिवबीजसमुद्भूतं वेदशाखाभिरुज्वलम् ॥ ५५ ॥

मृकण्डुतनयाधारं रसालं तं नमाम्यहम् ।
श्रीमदेकाम्रवृक्षस्य यो वसेन्मूलभूतले ॥ ५६ ॥

गुणवृध्या मुहूर्तस्य कोटिलिङ्गार्चनं भवेत् ।
सुप्रसन्नं महादेव्या नित्यकल्याणसुन्दरम् ॥ ५७ ॥

महाप्रळयपापघ्नं रसालेशमहं भजे ।
चूतेशाम्बिकयोः काञ्च्यां शिवाविर्भाववासरे ॥५८॥

कल्याणं कुर्वतः कोटिकन्यादानफलं भवेत् ।
कोटिलिङ्गप्रतिष्ठायां यत्फलं स्थापकस्य तु ॥ ५९ ॥

तत्फलं लभते मर्त्यस्सकृच्चूतेश सेवया ।
हररोमसमुद्भूत सर्वतीर्थ समन्वयात् ॥ ६० ॥

कम्पयापूरितं वन्दे पात्रं तत्सर्वतीर्थकम् ।
यात्रयासर्वतीर्थेषु स्नानतो यत्फलं नृणाम् ॥ ६१ ॥

सर्वतीर्थे सकृत्स्नानात्तत्फलं लभते नरः ।
य इदं प्रातरुत्थाय स्नानकाले पठेन्नरः ॥ ६२ ॥

श्लोकद्वादशमात्रेण श्लोकोक्तफलमाप्नुयात् ।
एतद्रहस्यमाख्यातं सर्वतीर्थप्रकाशकम् ॥ ६३ ॥

यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ।
सर्वतीर्थसरस्स्नानाद्यत्फलं तत्फलं लभेत् ॥ ६४ ॥

इति श्री मार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे सर्वतीर्थप्रकाशनं नाम नवमोऽध्यायः ॥



श्रीकामाक्षीदेव्यालयः

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

दशमाध्यायप्रारम्भः

जगत्कामकळाकारं नाभिस्थानं भुवः परम् ।
पदपद्मस्य कामाक्ष्या महापीठमुपास्महे ॥ १ ॥
इति स्तुत्वा नमस्कृत्य पीठं तत्कामनामकम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

कामकोटिपीठस्थलनिर्णयघट्टः

अथ तत्र नृपश्रेष्ठ काञ्चीनगरभूतले ।
विष्णोश्श्वेतप्रभाख्यस्य पूर्वे सप्तदशांशतः ॥ ३ ॥
तत्र क्षेत्राङ्घ्रिदुर्गाया याम्ये पंचदशांशके ।
अस्ति सिंहालयस्तत्र प्रत्यक्पंचदशांशतः ॥ ४ ॥
कायाधिरोहणं तीर्थं द्विहीनदशपञ्चके ।
तस्य सौम्ये सितो विष्णुः प्रागुक्तः पुरुषोत्तमः ॥५॥
एतच्चतुर्दिङ्मध्यस्थं पञ्चबाणनिकेतनम् ।
तस्मात्तत्कामकोष्ठाख्यं काञ्च्यां मध्यमभूतलम् ॥६॥

यो जपेत्कामकोष्ठेऽस्मिन् मन्त्रमिष्टार्थ दैवतम् ।
कोटिवर्णफलं प्राप्य मुक्तिलोकं च गच्छति ॥ ७ ॥
कामानां वर्णतात्पर्यात्तत्कोटिगुण संख्यया ।
कामकोटीति विख्यातं कामकोष्ठधरातलम् ॥ ८ ॥
तत्र क्षेत्राङ्घ्रिदुर्गायास्त्रिंशांशे राक्षसेश्वरे ।
शङ्खपाणिर्गणाध्यक्षः पूजितो देवशिल्पिना ॥ ९ ॥
शुद्धवास्तु समालोक्य काञ्च्यां शङ्कुः प्रतिष्ठितः ।
कुमारकोष्ठ नामास्ते तस्य पश्चात्षडंशके ॥ १० ॥
गुरुर्भूत्वा विधेस्स्कन्दस्तस्मै तारमुपादिशत् ।

### महादुर्गादि दुर्गाषट्कस्थाननिर्णयः

चतुर्विंशे तस्य याम्ये चण्डिका चोग्रवासिनी ॥११॥
महादुर्गा ग्रामदेवी ब्रह्मणा सा प्रपूजिता ।
तस्योत्तरे दशांशे तु दुर्गा तान्दोणिकाख्यका ॥१२॥
पुरा शङ्करमाराध्य धनुर्विद्यासु पण्डिता ।
तस्योत्तरे पंचमांशे दुर्गा सा पंचसन्धिका ॥१३॥
विघ्नान् निरस्य देवानां बलिना हितकारिणी ।
तस्या वाते पंचमांशे चण्डिकातीर्थ मालिनी ॥१४॥
नीलागर्भन्तु संरक्ष्य तया सम्यक्प्रपूजिता ।
तस्योत्तरे तु विंशांशे दुर्गा हेमासना स्मृता ॥१५॥
पुरा गोरक्षसिद्धाय विशेषधनदायिनी ।
तस्यैकविंशे याम्येऽस्ति पीठवर्तीति कालिका ॥१६॥
पुरा त्रिशिरसं हत्वा कामपीठाभिरक्षिणी ।



श्री वाराही



श्री राजमातङ्गी

दूर्वावर्णादिविष्णुचतुष्टयस्थाननिर्णयः

तस्य सौम्ये षडंशे तु दूर्वावर्णो रमापतिः ॥ १७ ॥
पुरा लक्ष्मीस्तमभ्यर्च्य लेभे पुत्रं रतिप्रियम् ।
तस्य चाग्नेयदिग्भागे द्वादशांशे त्रिविक्रमः ॥१८॥
आदिशेषस्तमभ्यर्च्य विश्वधारणपण्डितः ।
तस्य देवांशतो वाते मधुमूर्तिर्जनार्दनः ॥ १९ ॥
स पुराभ्यन्तरे काले मधुवृष्टिं चकार सः ।
तस्य केशे द्वितीयांशे विष्णुः काळाञ्जनामकः ॥२०॥
तमभ्यर्च्य पुरा काळं बहुसन्तान संयुतः ।
तत्र शम्भुर्महाकाळस्तमाराध्योरगेश्वरः ॥ २१ ॥

महाकाळादिरुद्रपञ्चकस्थाननिर्णयः

षण्मुखं पुत्ररूपेण प्राप्तश्शम्भोः प्रसादः ।
तस्य चैशाने त्रिपंचांशे शिवो भट्टारकेश्वरः ॥२२॥
पुरा तु तं समभ्यर्च्य जगद्धात्माभवत्कविः ।
एकोनचत्वारिंशांशे तस्य याम्ये फणाधरः ॥२३॥
पुरा प्रळयकाले तु द्वादशार्कमरीचिभिः ।
नीलीभूत फणाजालो देवानामपि मुक्तिदः ॥२४॥
तस्य पंचांशतस्सौम्ये फणीशः परमेश्वरः ।
पुरा कद्रुसुतान् धृत्वा तेषां ताक्ष्र्यभयापहः ॥२५॥
चतुर्विंशांशतस्तस्य सौम्ये काञ्चीश्वरशिवः ।
पुरा ब्रह्मा रविश्शास्ता कच्छपश्चण्डिकागृहः ॥२६॥

सनत्कुमारो देवाश्च एतैरभ्यर्चितात्मकः ।
तेषां सुधानिमित्तेन कच्छपस्य बलप्रदः ॥ २७ ॥

स्वयम्भुवं महालिङ्गमाद्यन्तरहितात्मकम् ।
तस्य प्रभावस्स्कन्देन कुम्भजाय पुरोदितः ॥२८॥

तस्य वाते पंचमांशे तपोवेषेण संयुता ।
कामाक्षीति महागौरी चूतलिङ्गस्य वल्लभा ॥ २९ ॥

### अन्नपूर्णेश्वरी प्रभावः

तस्य नैर्ऋतिदिग्भागे अन्नपूर्णेश्वरी शिवा ।
अन्नपूर्णाकृतिर्भूत्वा काश्यां दुर्भिक्षनाशिनी ॥ ३० ॥

धर्मद्वारेण संयुक्तस्त्रिधाभिक्षं तु यश्चरेत् ।
तस्यान्नवृद्धिरक्षय्या भवेत्तस्याः कटाक्षतः ॥३१॥

तस्मान्न गच्छेदद्वाराद्गच्छेद्द्वारेण चान्यतः ।
एवं तया पुरा चोक्तं तस्मादेतद्विधीयते ॥ ३२ ॥

तस्य वाते समीपे तु शास्ताऽऽस्ते देवनायकः ।
देवीस्तन्यं पुरा पीत्वा यथा स्कन्दस्तथा भवत् ॥३३॥

### अञ्जनकामाक्षी सन्तानस्तम्भयोः प्रभावः

अञ्जनच्छायकामाक्षी त्वास्ते तस्येशकोणके ।
महालक्ष्मीर्हरेः पत्नी वर्तते वृद्धरूपिणी ॥ ३४ ॥

तस्य पूर्वे समीपेऽस्ति स्तम्भस्सन्ताननामकः ।
तत्स्तम्भद्वारमूले तु पुरा वैवस्वताय च ॥ ३५ ॥



श्री अन्नपूर्णेश्वरी

कामाक्षी सुशुभां वाचं ददौ सन्तानकांक्षिणे ।
तद्गिरा तु सुतं प्राप्य महदानन्दतो मनुः ॥ ३६ ॥
यः पुत्रकामस्तत्स्तम्भं कुर्याद्भक्त्या प्रदक्षिणम् ।
प्रदक्षिणत्रयेणैव सोऽपुत्रः पुत्रवान् भवेत् ॥ ३७ ॥
इति स्तम्भाद्वरं प्राप्य चायोध्यां पुनरागमत् ।

पञ्चतीर्थादितीर्थचतुष्टयकथनम्

एकांशे पश्चिमे तस्य पञ्चतीर्थं मनोहरम् ॥ ३८ ॥

शिवपञ्चमुखोद्भूतं भूताभ्यां मुक्तिदायकम् ।
दर्शनात्सर्वपापघ्नं स्पर्शनान्मुक्तिदायकम् ॥ ३९ ॥

भूतयोस्तु भृगोर्वारे फलकृत्तत्पुरा नृप ।
भृगुवारे तु यस्स्नायाल्लभेद्गोदावरीफलम् ॥ ४० ॥

इतीश्वरः पुरा तस्मै ददौ तीर्थाय तद्वरम् ।
तस्य याम्ये चतुर्विंशे तीर्थं कायाधिरोहणम् ॥४१॥

पुरा ययातिभूपस्य सशरीरविमुक्तिदम् ।
गुरुवारे नरेन्द्राय फलं पूर्वमदान्नृप ॥ ४२ ॥

तस्मिन् वारे तु यस्स्नायात्सिन्धुस्नानफली भवेत् ।
पुरा तीर्थाय धौम्येन वरो दत्तो मुदा तदा ॥ ४३ ॥

सौम्ये तस्य त्रिसप्तांशे तीर्थं सिद्धाभिधं वरम् ।
पुरा सनत्कुमारस्य महाशापविमोचकम् ॥ ४४ ॥

दर्शनात्सर्वपापघ्नं स्मरणान्मुक्तिदायकम् ।
पुरा सनत्कुमाराय ददौ भानोर्दिने फलम् ॥ ४५ ॥

तस्मिन् वारे तु यस्स्नायाद्रेवास्नानफलं लभेत् ।
पुरा सनत्कुमारेण तस्मै दत्तो वरो महान् ॥ ४६ ॥
तस्य सौम्ये त्रिपञ्चांशे तीर्थं चक्राह्वयं नृप ।
पुरा तत्कार्तवीर्याय निजरूपप्रदायकम् ॥ ४७ ॥
दर्शनात्सर्वपापघ्नं स्मरणाद्भुक्तिमुक्तिदम् ।
देव्यास्तु जन्मऋक्षे तु शक्रस्य फलकृत्पुरा ॥४८॥
यस्स्नायात्पूर्वफल्गुन्यां गण्डकीफलभाग्भवेत् ।
इति शक्रेण तीर्थाय वरो दत्तो महीपते ॥ ४९ ॥
एवं क्रमात्कामकोष्ठे एको विघ्नेश्वरस्तथा ।
स्कन्दस्तत्र तु षड्दुर्गा चतुर्विष्णुश्च भूपते ॥ ५० ॥
पञ्चरुद्राश्च वर्तन्ते चतुस्तीर्थाण्यनुक्रमात् ।
अद्यापि शासनाद्देव्याः कामकोष्ठतले शुभे ॥ ५१ ॥
तत्क्षेत्रनिलयास्सर्वे कैवल्यपुरवासिनः ।
भूमौ तच्छ्रीपुरं देव्याः काञ्च्यां मध्यमभूतलम् ॥५२॥
तस्य क्षेत्रस्य सुरथ नामधेयानि पञ्च हि ।
कामकोष्ठं कामकोटीश्रीपुरं भद्रनामकम् ॥ ५३ ॥
जीवन्मुक्तिपुरं चेति पञ्चधा परिकीर्त्यते ।
यो वसेत्कामकोष्ठेस्मिन् क्षणार्धं वा तदर्धकम् ॥५४॥
मुच्यते सर्वपापेभ्यस्साक्षाद्देवी नराकृतिः ।
तत्क्षेत्रवासिनः पूर्वं बहवोप्युपकारतः ॥ ५५ ॥
पुण्येन देवीदूतैश्च नीतास्ते मौक्तिकं पदम् ।



श्री धर्मशास्ता

जगन्नाथाख्यद्विजोपाख्यानम्

तेषु कश्चित्पुरा विप्रो गङ्गातीरनिकेतनः ॥ ५६ ॥
कुण्डिनीनगरावासो ऋग्वेदी वत्सगोत्रजः ।
जगन्नाथ इति ख्यातो म्लेच्छकृत्ये सदा रतः॥५७॥

गोघातैश्छागघातैश्च मत्स्यघातैश्च सन्ततम् ।
म्लेच्छकृत्यरतो नाम्ना द्विज इत्यपि विश्रुतः॥५८॥

वेदहीनः कर्महीनो सदा मांसादनप्रियः ।
विप्राधमः कदाचित्तु कुण्डिनीनामपत्तने ॥ ५९ ॥

समागतं कामकोष्ठाद्यात्रायै च द्विजोत्तमम् ।
जगन्नाथाभिधो विप्रो दृष्ट्वा किंचिद्धनं ददौ ॥ ६० ॥

ततस्तद्धनमादाय तेनायं तण्डुलादिकान् ।
आनीयाथ पचित्वा स भुक्त्वा यात्रेच्छयागतः॥६१॥

ततस्सोपि जगन्नाथो विषान्मृत्युवशोऽभवत् ।
ततो यमभटाःक्रूरा महापापिनमुद्धुरैः ॥ ६२ ॥

बध्वा पाशैश्च तं विप्रं प्रहरन्तोऽग्निदण्डकैः ।
विदार्य शोणकोणैश्च तमाकृष्याग्निमार्गतः ॥६३॥

समागमनवेळायां यमलोकाय वेगतः ।
ततो देवीगणास्तत्र समागत्यातितीव्रतः ॥ ६४ ॥

मोचयित्वा भटेभ्यस्तमादाय द्विजपुंगवम् ।
विमाने च समारोप्य जगन्नाथाभिधं द्विजम्॥६५॥

श्रीपुराख्ये महाशक्त्या लोके देव्यास्तु सन्निधौ ।
देवीपादाम्बुजद्वन्द्वेऽयोजयन् शक्तिशासनान्॥६६॥

ततो दण्डधरश्श्रुत्वा कृतं देवीगणैस्तदा ।
कोपताम्रेक्षणः कालो गत्वा श्रीपुरमव्ययम् ॥६७॥

दृष्ट्वा तत्र महाशक्तिं पप्रच्छ कुपितो यमः ।

यम उवाच–

एष पापी विमुश्चाम्ब सदा हिंसापरो द्विजः ॥६८॥

नरकायैत्र युक्तोऽयं मद्वशं नय मा चिरम् ।
इति पृष्टा महादेवी प्रत्युवाच तदाऽन्तकम् ॥ ६९ ॥

देव्युवाच–

भूमौ तु मामके क्षेत्रे कामकोष्ठसमाह्वये ।
निवसन्त्यनिशं ये वै ते सर्वेप्यहमेव हि ॥ ७० ॥

पुरा तत्क्षेत्रनिलयं यात्रायै तु समागतम् ।
कुण्डिनीनाम नगरे दृष्ट्वा तं द्विजपुङ्गवम् ॥ ७१ ॥

तद्द्विजाय पुरा एष धनं किंचिद्ददौ मुदा ।
तद्धनेनैव सो विप्रो मम क्षेत्रात्समागतः ॥ ७२ ॥

एककालाशनं भुंक्त्वा यात्रायै स पुनर्ययौ ।
अहमेव हि सो विप्रस्तद्धर्मश्च मदीयकः ॥ ७३ ॥

तद्धर्माय धनं दत्तं तेनैवाहं सुखं गता ।
तत्पुण्यस्य प्रभावेन एष पुण्यतनूरभूत् ॥ ७४ ॥

मम भक्तोऽतिपुण्यात्मा पापहीनो दयान्वितः ।
तस्मान्मद्गतिमाश्रित्य नरकाय तु नोचितः ॥ ७५ ॥

तस्मात्त्वं गच्छ तीव्रेण त्वल्लोकाय यमाद्य वै ।
इति श्रुत्वा पितृपतिः प्रणम्य शिरसा च ताम् ॥७६॥



प्रतिगृह्य तदाज्ञां तु यमस्स्वभवनं ययौ ।
तत्कामकोष्ठे ये सन्ति महेश्वर्येव तेऽखिलाः ॥७७॥

तस्मात्तच्छ्रीपुरं भूमौ कामकोष्ठधरातलम् ।
एतद्रहस्यमाख्यातं कामकोष्ठप्रकाशकम् ॥ ७८ ॥

एतदध्यायमात्रं वा यः पठेच्छृणुयान्नरः ।
कामकोष्ठनिवासेन यत्फलं तत्फलं लभेत् ॥ ७९ ॥

इति श्रीमार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे कामकोष्ठप्रभाववर्णनं नाम दशमोऽध्यायः ॥

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

## एकादशाध्यायप्रारम्भः

गायत्रीमण्टपाधारं नाभिस्थानं भुवःपरम् ।
पुरुषार्थप्रदं शम्भोर्बिलाभ्रं तन्नमाम्यहम् ॥ १ ॥

इति स्तुत्वा नमस्कृत्य कामकोष्टमहाबिलम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

कामकोटिबिलमहिमानुवर्णनम्

अथ तत्र नृपश्रेष्ठ कामकोष्ठमहीतले ।
सिद्धतीर्थस्य चेशाने तृतीयांशे महाबिलम् ॥ ३ ॥

जगत्कामकळाकारं भूमेः कुण्डलिनीपदम् ।
यावन्महाबिलं तत्र तावन्मण्टपतां गतम् ॥ ४ ॥

तत्कामनगरं दिव्यमघघ्नं सर्वसिद्धिदम् ।
तपस्स्थानं बिलं सूक्ष्मं परमं व्योम तत्स्मृतम्॥५ ॥

आधिभौतिकमर्माङ्गं नाभिस्थानं भुवः परम् ।
तदेव ब्रह्मणश्शम्भोश्शरीरमिति कथ्यते ॥ ६ ॥



लोकानां व्यंग्यशब्दत्वान्नाभिरित्यभिसंज्ञितम् ।
श्रीपुरस्य त्रिमूर्तीनामीश्वराणां दिशामपि ॥ ७ ॥

लोकानां मेरुशैलस्य गोरूपायावनेरपि ।
नवद्वारस्य मार्गं तद् भूयोनिस्तन्महाबिलम् ॥ ८ ॥

कामकोटिस्स्मृतस्सोयं कारणं देवचिन्नभः ।
यत्र कामकृतो धर्मो जन्तुना येन केन वा ॥ ९ ॥

सकृद्वापि सुधर्माणां फलं फलति कोटिशः ।
तेनेदं कामकोटीति बिलद्वारं प्रसिद्धिमत् ॥ १० ॥
तत्तत्कामप्रदत्वाच्च कामकोष्ठमुदाहृतम् ।
आकाशशरीरं ब्रह्म सनादं बिन्दुसंज्ञितम् ॥ ११ ॥

बिलरूपेण वै काञ्च्यां प्रत्यक्षं मोक्षदं परम् ।
अथवा रुद्रनेत्राग्निनिर्दग्धः काम एकतः ॥ १२ ॥

स सृष्टो लीलया मात्रा नेत्राभ्यां कोटिसंख्यया ।
कामकोटीति विख्यातं काञ्च्यां यच्चिन्मयं नभः॥१३

अथ कामस्तृतीयोऽर्थः पुरुषार्थेषु विश्रुतः ।
तत्परस्ताच्छ्रुतो मोक्षः कोटिशब्देन शब्दितः॥१४॥

कामकोटिश्श्रुतो मोक्षः पुरुषार्थ चतुर्थकः ।
अर्थोऽथवा श्रुतः कामः कामेशो धनदस्स्मृतः॥१५॥

तत्कोटिधा पीठशक्तिः कामकोटीति विश्रुता ।

मुनिशापान्नष्टलिङ्गस्य शिवस्य कामकोटिबिलप्रवेशेन पुनर्लिङ्गोत्पत्तिः बन्धकासुरकथा च

पुरुषार्थप्रदं पूर्वं लिङ्गहीनस्य शूलिनः ॥ १६ ॥

तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ।
तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ १७ ॥

पुरा महेश्वरश्शम्भुर्दारुकाख्यं महावनम् ।
गत्वा तत्र ऋषेश्शापान्नष्टलिङ्गोऽभवन्नृप ॥ १८ ॥

अथ कैलासभवनं स गत्वा उमया सह ।
उवास हि तदाभ्यागाद्न्धको नाम राक्षसः ॥१९॥

दानवेन्द्रोऽमरध्वंसी साधूनां प्राणकण्टकः ।
अभूदाजगदन्तं च चिरञ्जीवी वराद्विधेः ॥ २० ॥

स सर्वलोकानाक्रम्य युद्धेनैव ततः परम् ।
कैलासं स समागत्य जित्वा तत्र महेश्वरम्॥ २१ ॥

तमुच्चाट्य सुरैर्युक्तं समारुह्येश्वरासनम् ।
वसंश्च तत्र स्वगणैस्सर्वलोकेषु सर्वदा ॥ २२ ॥

देवानृषीन् साधुजनान् पीडयामास दोर्मदात् ।
ततस्सुरादयस्सर्वे सेन्द्रास्सहमरुद्गणाः ॥ २३ ॥

भयाद्न्धकदैत्येन्द्रात्कैलासस्योत्तरां दिशम् ।
गत्वा ते गोमुखाभिख्ये क्षेत्रे तत्र महाबिलम्॥२४॥

प्रविश्याथादितेर्गर्भाद्यथा पूर्वं विनिर्ययुः ।
काञ्च्यां श्रीकामकोष्ठाख्य बिलाद्देवास्तथाययुः॥२५॥

समागमनमार्गे तु बिलगर्भनिवासिनीम् ।
कामकोटीश्वरीं देवीं महात्रिपुरसुन्दरीम् ॥ २६ ॥

दृष्ट्वा प्रणम्य शिरसा प्रार्थयन् स्वमनोरथम् ।
बिलद्वाराच्च ते ब्राह्मे समागत्य ततो हरम् ॥ २७ ॥



सुष्ठु लिङ्गधरं दृष्ट्वा भवन्नाश्चर्यमानसाः ।
महेशस्य महालिङ्गं यद्बिलागमनादभूत् ॥ २८ ॥
माहात्म्यं तस्य विबुधास्तमपृच्छन्महेश्वरम् ।

**ईश्वर उवाच–**

एषा भूमिर्ब्रह्मपुत्री गोरूपेणाखिलं जगत् ॥ २९ ॥
धृत्वा वसति चाद्यापि तस्या भूमेस्सुरोत्तमाः ।
वक्त्रं तु गोमुखक्षेत्रं श्रीपुरं शीर्षतां गतम् ॥ ३० ॥
हिमालयः कण्ठदेशः केदारं कुक्षिदेशगम् ।
वाराणसी पृष्ठदेशो मूलं तत्कमलालयम् ॥ ३१ ॥
काञ्चीदेशः पुरी काञ्ची तन्मध्यं कामकोष्ठकम् ।
तस्य मध्यमिदं द्वारं बिलमेतत्सुरोत्तमाः ॥ ३२ ॥
तस्मादहं गोमुखाख्ये बिले तत्र प्रवेशनात् ।
यथादितेर्गर्भवासे तस्याः कुण्डलिनी पथात् ॥३३॥
काञ्च्यामेतद्बिलद्वारात्समागमनतो बुधाः ।
द्वितीयदेहसंयुक्तोऽभवं गोगर्भसम्भवात् ॥ ३४ ॥
पूर्वजन्मोत्थशापस्य मुक्तिश्च समभूद्ध्रुवम् ।
तस्मादद्य तु शुद्धात्मा शापहीनो पुनर्भवः ॥ ३५ ॥
तस्मादद्य तु मे लिङ्गं जातं गोगर्भसम्भवात् ।
असाध्य एतल्लोकेषु धरागोगर्भसम्भवः ॥ ३६ ॥
साध्यं हिरण्यगोजन्म तद्दानाच्च द्विजो भवेत् ।
क्षितिगोगर्भसंजातस्तद्दानाद्विजयी भवेत् ॥ ३७ ॥
तस्माद्दानात्ततश्चाहं जन्मद्वययुतोऽभवम् ।
तज्जन्मकारणं द्वारबिलमेतत्सुरोत्तमाः ॥ ३८ ॥

तस्माद्रहस्यमाख्यातं प्रोक्तमेतद्बिलस्य तु ।
इत्येवं श्रावयन्तस्ते शम्भुना तत्र मोदतः ॥ ३९ ॥
दृष्ट्वा तद्बिलमाकाशं ते बिलाय वरं ददुः ।
यः कुर्यात्कामकोष्ठस्य बिलाकाशप्रदक्षिणम् ॥४०॥
पदसंख्याक्रमेणैव गोगर्भजननं भवेत् ।

## कामकोटिबिलप्रदक्षिणफलकथनम्

तत्काञ्चीनिलयो नित्यं पक्षमासार्धतोपि वा ॥४१॥
बिलप्रदक्षिणान्मुक्तो न चेद्देवोपि गर्दभः ।
इति दत्वा वरान् सर्वे भीतास्ते बन्धकासुरात् ॥४२॥
बिलान्तिकभ्राजमानचम्पकाख्यद्रुमोपरि ।
शुकरूपेण ते सर्वे वसन्ति स्मायुतं समाः ॥ ४३ ॥
तदा शिवाज्ञया मुक्ता बन्धकासुरभीतितः ।
सम्प्रापुस्ते सुखं सर्वे श्रीकामाक्ष्याश्चरित्रतः ॥ ४४ ॥
तस्मादत्र बिलाकाशो वर्तते महिमास्पदम् ।
पुरा प्रदक्षिणं कृत्वा बहवस्तद्बिलस्य तु ॥ ४५ ॥
तत्प्रदक्षिणमाहात्म्याद्गतास्ते मौक्तिकं पदम् ।

## बलभद्राख्यद्विजोपाख्यानम्

तेषु कश्चित्पुरा विप्रो नर्मदातीरसंस्थितः ॥ ४६ ॥
बलभद्राह्वयो युक्तो वज्रेश्वर्याख्यभार्यया ।
परदाररतो नित्यं स्वैरिणीसङ्गभागभूत् ॥ ४७ ॥



कृष्णकुष्ठश्शरीरेऽस्य व्रणश्चाप्यण्डदण्डयोः ।
दिने दिने क्षीणशेफो रण्डाव्याधिप्रपीडितः ॥४८॥
सद्भ्यस्तच्छान्तये दानैर्विविधैर्भेषजैश्च सः ।
हेमगोगर्भदानैश्चाकरोद्द्रव्यव्ययं बहु ॥ ४९ ॥
अविमुक्तमहारोगो कामकोष्ठबिलस्य च ।
माहात्म्यं तद्द्विजमुखाच्छ्रुत्वासौ कामकोष्ठकम् ॥५०॥
सम्प्राप्य तद्बिलाकाशे मासमेकं दिने दिने ।
स्वयमष्टोत्तरशतं संख्यया तत्प्रदक्षिणम् ॥ ५१ ॥
कृत्वा तद्व्याधिशान्तिं च लब्ध्वा सोऽभूद्यथापुरम् ।
दृढदेहाण्डलिङ्गश्च स्वदेशं सम्प्रविश्य च ॥ ५२ ॥
सुखेनोवास विप्रोसौ पुत्रपौत्रादिसंयुतः ।
धनधान्याभिवृध्या च भुक्त्वा भोगाननेकशः ॥५३॥
कदाचिदथ दैवेन कालमृत्युवशं गतः ।
ततो देवीगणास्सर्वास्त्वरयाऽभ्येत्य तं द्विजम् ॥५४॥
समारोप्य विमानेऽथ देवीपादे त्वयोजयन् ।
बिलप्रदक्षिणं नृणां मोक्षसाम्राज्यदायकम् ॥५५॥
एतद्रहस्यमाख्यातं बिलाकाशप्रभावयुक् ।
एतदध्यायमात्रं वा यः पठेच्छृणुयादपि ॥ ५६ ॥
प्रदक्षिणाद्बिलाभ्रस्य यत्फलं तत्फलं लभेत् ॥

इति श्रीमार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे बिलाकाशप्रकाशनं नाम एकादशोऽध्यायः ॥

॥ श्रीरस्तु ॥

# ❀ श्री कामाक्षीविलासः ❀

## द्वादशाध्यायप्रारम्भः

विश्वकारणनेत्राढ्यां महात्रिपुरसुन्दरीम् ।
बन्धकासुरसंहर्त्रीं कामाक्षीं तामहं भजे ॥ १ ॥

इति स्तुत्वा नमस्कृत्य श्रीमत्त्रिपुरसुन्दरीम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

महात्रिपुरसुन्दरीवर्णनम्

अथ तत्र नृपश्रेष्ठ कामकोष्ठधरातले ।
गायत्रीमण्टपे तत्र बिलपीठासने शुभे ॥ ३ ॥

गायत्र्योंकारकोणे सा कामाक्षी वर्तते सदा ।
आदिशक्तिस्स्वयंव्यक्ता सर्वविश्वस्य कारणम् ॥ ४ ॥

पद्मासने निषण्णा सा कामपीठनिवासिनी ।
चतुर्भुजा त्रिणयना महात्रिपुरसुन्दरी ॥ ५ ॥

मूलशक्तिर्ब्रह्मविद्या चादिलक्ष्मीरिति श्रुता ।
आत्मशक्तिर्जगद्धात्री राजीवसदृशप्रभा ॥ ६ ॥

अर्धेन्दुशेखरा दिव्यकिरीटपरिमण्डिता ।
पाशांकुशेक्षुकोदण्डपञ्चबाणलसत्करा ॥ ७ ॥

तपनोडुपताटङ्का मीनकुण्डलधारिणी ।
दिव्यशृङ्गारवेषाढ्या दिव्याभरणभूषिता ॥ ८ ॥

रक्ताम्बरधरा रक्तराजीववरमालिनी ।
सौभाग्याभरणोपेता दिव्यमाङ्गल्यधारिणी ॥ ९ ॥

राजराजेश्वरी रामा मणिमञ्जीरराजिता ।
श्रीचक्रनगराधीशा श्रीविद्यापरमेश्वरी ॥ १० ॥

शङ्कराराधिताकारा शङ्करात्मस्वरूपिणी ।
शारीरककलाधीशा सर्वतत्वस्वरूपिणी ॥ ११ ॥

प्राणिनी विश्वभूतस्था कालचक्रस्वरूपिणी ।
श्रीकांचीनगराधीशा कांक्षितार्थप्रदायिनी ॥ १२ ॥

सचामररमावाणीसव्यदक्षिणसेविता ।
कामकोटीति विख्याता कामाक्षी दिव्यमंगळा ॥१३॥

सदाशिवादिमूर्तीनां गौर्यादीनां च कारणम् ।
जननी चूतलिङ्गस्य चूतबीजार्थरूपिणी ॥ १४ ॥

शिवाधिका शिवाङ्कस्था शिवमूर्तिंशिवङ्करी ।
महाकामेशमहिषी महात्रिपुरसुन्दरी ॥ १५ ॥

पुरा हिताय देवानां बन्धकासुरमर्दिनी ।
तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ॥ १६ ॥

तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ।

### बन्धकासुरवधारम्भः

पुरा तस्मिन् कामकोष्ठे दिव्यचम्पकभूरुहे ॥ १७ ॥

संस्थिताश्शुकरूपेण सुरास्सर्वेऽभवन्नृप ।
शिवाज्ञया बिलस्थां तां महात्रिपुरसुन्दरीम् ॥१८॥

ध्यात्वा हृदि तपश्चक्रुर्बन्धकस्य वधाय वै ।
ततः कदाचित्सा देवी बिलस्था त्रिपुरेश्वरी ॥ १९ ॥

तेषां हिताय दयया प्रळयानलरूपतः ।
बिलादुद्भूय कोपेन भस्मीकृत्याखिलं जगत् ॥२०॥

पुनस्स्वरूपमापेदे निर्गुणा सगुणात्मकम् ।
शून्ये जगति च व्योम्नि स्थिता त्रैगर्भमण्डले॥२१॥

स्वयमेकावशिष्टा च ब्रह्माणं कमिति स्मृतम् ।
स्ववामनेत्रात्सृष्ट्वाऽथ केशवं त्वमिति स्मृतम् ॥२२॥

नेत्राद्दक्षिणतः कृत्वा शङ्करं ममिति स्मृतम् ।
फालनेत्रात्प्रकल्प्याऽथ ब्रह्मणे शिशुरूपिणे ॥ २३ ॥

सृष्टिविद्यात्मकं दुग्धं विष्णवे शिशुरूपिणे ।
स्थितिविद्यात्मकं दुग्धं शम्भवे शिशुरूपिणे ॥२४॥

लयविद्यात्मकं दुग्धं प्राशयित्वा ततः परम् ।
विरिञ्चादिषु पश्यत्सु तत्रैवान्तरधीयत ॥ २५ ॥

ततस्त्रिमूर्तयो देवा दुग्धपानेन तत्क्षणात् ।
नवयौवनरूपास्ते दृष्ट्वा शून्यात्मकं जगत् ॥ २६ ॥

किमाश्चर्यमिदं स्वप्न अव्यक्तोभूतगोचरः ।
इति त्रिमूर्तिषु तदाऽचिन्तयत्सु परस्परम् ॥ २७ ॥



भयेन निर्जनस्थाने तेषु ब्रह्माभयात्पुनः ।
यथा पूर्वं जगत्सर्वं ससर्ज सचराचरम् ॥ २८ ॥

तथा विष्णुश्च रुद्रश्च स्वस्वकार्यं प्रचक्रतुः ।
पुरेवासीद्विधेस्सृष्ट्या सबन्धकमिदं जगत् ॥ २९ ॥

चम्पकाख्यद्रुमो देवाश्शुकरूपाश्च तद्बिले ।
ततस्सर्वे जना देव्या यामेनैकेन कल्पितम् ॥३०॥

जगतां मरणं धात्रा पुनस्सर्जनकर्म च ।
अनुभूय तु तत्काले तत्स्वप्नमिति ते वदन् ॥३१॥

जगत्सृष्ट्या पुनर्जातं बन्धकं दानवेश्वरम् ।
कैलासनिलयं दैत्यं परस्मिन् दिवसे निशि ॥३२॥

स्वपन्तं राक्षसं घोरं निरीक्ष्य कुपिता तदा ।
पादं तद्धृदये चैकमन्यं तत्कण्ठदेशके ॥ ३३ ॥

निक्षिपन्ती च सा देवी महाभैरवरूपिणी ।
अष्टादशायुधोपेता अष्टादशभुजान्विता ॥ ३४ ॥

तेजसा ब्रह्मविष्ण्वीशसोमसूर्याग्निसन्निभा ।
चक्राद्यायुधसंयुक्ता हस्ताभ्यां तच्छिखां दृढम् ॥३५॥

गृहीत्वा पञ्चभूतानि हत्वा क्रुद्धाऽवधीद्रिपुम् ।
तत्रैव तं विसृज्याथ तद्बन्धून् पुत्रपौत्रकान् ॥३६॥

महासेनाधिकामित्रा दितिजा यत्र यत्र तु ।
वसन्ति सर्वलोकेषु तत्र तत्र क्षणेन सा ॥ ३७ ॥

गत्वा हत्वाऽऽयुधैस्सर्वानथ सूर्योदये तु सा ।
स्वयं देवी तदा भूत्वा पञ्चवार्षिककन्यका ॥ ३८ ॥

बन्धकस्य शिखां बध्द्वा हस्ताभ्यां कन्यकाऽम्बिका ।
महाशैलनिभाकारं राक्षसं घोरदर्शनम् ॥ ३९ ॥

समाकृष्य ततो देवी कामकोष्ठं समाविशत् ।
ततो वृक्षस्थिता देवा दुर्दर्शं बन्धकं मृतम् ॥४०॥

आकर्षन्तीं स्वहस्ताभ्यां सर्वलक्षणसंयुताम् ।
अतिसुन्दरवेषाढ्यां सर्वाभरणभूषिताम् ॥ ४१ ॥

दिव्याम्बरधरां बालां तप्तकाञ्चनसन्निभाम् ।
दृष्ट्वा देवीं विनिश्चित्य स्वानि रूपाण्यवाप्य च॥४२॥

देवदुन्दुभिशङ्खैश्च भेरीपणवकाहळैः ।
पटहैर्वेणुतालैश्च वीणामर्दळनिस्वनैः ॥ ४३ ॥

पद्ममल्लीजपाकुन्दैर्वकुळैः पारिजातकैः ।
हेमकेतकपुन्नागैश्चम्पकैर्हेमभासुरैः ॥ ४४ ॥

नवकुंकुमकर्पूररोचनाधिकचन्दनैः ।
कस्तूरिकासुरभिळैस्सुस्निग्धैश्चन्दनद्रवैः ॥ ४५ ॥

दिव्यमङ्गळगीतैश्च सुमवृष्ट्या जयस्वनैः ।
तोषयित्वा तदा देवीं स्तोत्रैश्च सुमनोहरैः ॥ ४६ ॥

जय मङ्गळकन्ये त्वं जय देविहितैषिणि ।
काऽसि त्वं ब्रूहि कल्याणि कुत्रत्या कुत आगता॥४७॥

इत्यापृच्छ्यान्तिकं देव्याः प्राप्य कृत्वा प्रदक्षिणम् ।
प्रणम्य शिरसा सर्वे बन्धकप्रेतदर्शनात् ॥ ४८ ॥

तदा प्रहृष्टाः पप्रच्छुः कामाक्षीं कन्यकात्मिकाम् ।



देवा ऊचुः--

काऽसि त्वं कन्यके ब्रूहि ययाऽसौ निहतस्त्वया ॥४९॥
येन त्रिमूर्तयः कन्ये वयं च परिपीडिताः ।
यन्निमित्तं जगत्सर्वं निर्दग्धं बिलवह्निना ॥ ५० ॥
कथं स निहतो दैत्यो बन्धको वद कन्यके ।

देव्युवाच--

देवेभ्यः कन्यारूपकामाक्षीप्रेरित स्वालयादिनिर्माणकथनम्

अथात्र राक्षसं घोरं बन्धकं प्रेतरूपकम् ॥ ५१ ॥
निखनन्तो वटे यूयं तदुपर्येव हे सुराः ।
जयस्तम्भं प्रतिष्ठाप्य मां च यावन्महाबिलम् ॥५२॥
तावदायतनं कृत्वा द्वारेणैकेन संयुतम् ।
तस्मिन् संस्थाप्य मां यूयं दिव्यसिंहासने शुभे॥५३॥
अस्मिन् बिले तु या देवी तामावाह्य परां मयि।
षडाधारयुतां देवीं षड्दर्शन सुसंयुताम् ॥ ५४ ॥
षडाम्नायसमाराध्यां नवावरणमध्यगाम् ।
महान्तर्याग मार्गेण सुतीर्थैर्नारिकेळजैः ॥ ५५ ॥
क्षीरैर्दधिभिराज्यैश्च मधुभिश्शुद्धवारिभिः ।
प्रणवान्त्याक्षरेणैव भक्त्या मामभिषिच्य च ॥५६॥
पञ्चपूजाविधानेन सुपुष्पैर्धूपदीपकैः ।
शोणाभिरक्षताभिश्च मामभ्यर्च्य विधानतः ॥५७॥
नैवेद्यं तु मधुक्षीरघृतदिव्यसितायुतम् ।
नानाभक्ष्यं षड्रसान्नं मुद्गोदनगुडोदने ॥ ५८ ॥

कर्पूरपाटलीपद्मसौगन्धिकहिमोदकम् ।
एलालवङ्गतकोलजातीफलसमन्विताम् ॥ ५९ ॥

कर्पूरवीटिकां चापि समर्प्य विधिवत्सुराः ।
राज्यहीना बिलद्वारं बलिदानपुरस्सरम् ॥ ६० ॥

गत्वा कवाटं बध्वा तु स्थित्वा बाह्येऽथ मौनतः ।
सूर्योदयान्तं मां ध्यात्वा जप्त्वा सर्वं समर्प्य मे॥ ६१॥

अथ प्रभाते तूत्थाय समुद्धाट्य कवाटके ।
कृते मद्दर्शने देवास्ततो वक्ष्यामि चोत्तरम् ॥ ६२ ॥

तावद्यूयं न पृच्छध्वं यत्किंचिदपि मां सुराः ।
एवमाकर्ण्य ते सर्वे भक्त्या परमया तदा ॥ ६३ ॥

धृत्वा शिरसि कन्याया वचनं ते सुरोत्तमाः ।
पुनः कन्यां प्रणम्याथ बन्धकं प्रेतरूपकम् ॥६४॥

तत्रैव निखनन्तस्ते देवास्तस्योपरि क्षणात् ।
प्रतिष्ठाप्य यशस्तम्भं तस्य याम्ये समीपतः ॥६५॥

यावन्महाबिलं तावन्मण्डपं परिकल्प्य च ।
बिलान्तस्स्थितदेवेशीं त्रिपुरां बिम्बरूपिणीम्॥ ६६ ॥

बहिरुद्धर्तुकामास्ते प्रविष्टा बिलमद्भुतम् ।
महाशक्तिमदृष्ट्वा ते तत्र विग्रहरूपिणीम् ॥ ६७ ॥

विस्मयाम्बुनिधौ सर्वे निमग्नास्संबभूविरे ।
कन्यकैव हि सा देवी निश्चित्यैवं सुरोत्तमाः ॥६८॥

बहिरागत्य ते पश्चात्तत्र यावन्महाबिलम् ।
वेदीः कृत्वा चतुर्वेदान् गायत्रीवर्णकांस्तथा ॥६९॥

गायत्री-मण्डपः





श्रीचक्रम्

श्रीदुर्वासाः

कृत्वा स्तम्भांश्च तद्वेद्या व्याहृत्यैव त्रिखण्डतः ।
वर्णत्रयं ततः कृत्वा प्रणवं पीठरूपकम् ॥ ७० ॥

कृत्वा ते ध्यानयोगेन क्रमादेवं सुमण्टपम् ।
गायत्रीमण्टपाभिख्यां चक्रुस्सर्वे सुरेश्वराः ॥ ७१ ॥

तस्मिन् सिंहासनन्यस्त दिव्यमाणिक्यपीठके ।
कन्यकां तां समावाह्य कन्यकोक्तविधानतः॥ ७२ ॥

सम्पूज्य च तदा कन्यामर्धरात्रे दिवौकसः ।
ध्यात्वा तां तन्मनुं जप्त्वाऽरुणोत्पत्तेर्ययुस्तपः॥७३॥

कामकोटिबिले महात्रिपुरसुन्दर्याविर्भावघट्टः

ततः प्रभाते कल्याणी कल्पे सावित्रनामके ।
स्वायम्भुवमनोः काले तमसि प्रथमे शुभे ॥ ७४ ॥

युगे कृताख्ये वैकुण्ठे मोहिनीरूपसंयुते ।
श्रीमुखाब्दे फल्गुनाख्ये मासि कुम्भगते रवौ॥७५॥

तत्कृष्णपक्षप्रथमा शुक्रवारारुणोदये ।
मध्यांशे पूर्वफल्गुन्याः कन्यकारूपशालिनी ॥७६॥

ललिता राजराजेशी महात्रिपुरसुन्दरी ।
स्वस्वरूपं समासाद्य बभौ सिंहासने शुभे ॥ ७७ ॥

ततो देवाखिलास्तत्र ञाचीभूतास्सुरोत्तमाः ।
कवाटोद्घाटनं कृत्वा दृष्ट्वा त्रिपुरसुन्दरीम् ॥ ७८ ॥

किमाश्चर्यमिदं देव्याश्चरित्रं परमाद्भुतम् ।
इति स्तुत्वा सुरास्सर्वे स्तुत्वा नत्वा महेश्वरीम्॥७९॥

देवा ऊचुः --

जय देवि जगन्मातर्जय त्रिपुरसुन्दरि ।
अस्माभिरर्चिता कन्या वदकुत्राद्य सा गता ॥ ८० ॥
धातुः प्रसादादाचन्द्रं चिरंजीवी महाबलः ।
बन्धको नाम दैत्योऽयं कथं विनिहतः क्षणात् ॥८१॥
निर्माय मण्टपं तत्र त्वां च स्थापयितुं शिवे ।
बिलं विशद्भिरस्माभिर्नदृष्टासि कथं तदा ॥ ८२ ॥
पूर्वं हि तद्बिलस्था त्वं कथं कुत्र गतासि च ।
कन्यास्थानगताद्य त्वं कल्याणि परदेवते ॥ ८३ ॥
कृपया ब्रूहि तत्सर्वमस्मभ्यं परमेश्वरि ।
इति सम्प्रार्थिता देवी प्रत्युवाच सुरेश्वरान् ॥८४॥

देव्युवाच--

तत्सर्वमुच्यतेऽस्माभिश्शृणुध्वं सावधानतः ।
अहं देवहितार्थाय तद्बिलस्थार्धरात्रके ॥ ८५ ॥
प्रळयानलभावेन भस्मीकृत्याखिलं जगत् ।
ककाराकारविलसन्मकार प्रतिपादितान् ॥ ८६ ॥
जगत्सिसृक्षया चाहं पुनर्ब्रह्महरीश्वरान् ।
त्रीनक्षिभिर्विरच्यासं कामाक्षीनामशालिनी ॥८७॥
यथापूर्वं जगत्सृष्टौ पुनर्जातं च बन्धकम् ।
पुत्रभ्रातृसुहृत्सेनायुतमन्यांश्च राक्षसान् ॥ ८८ ॥
निहत्य कन्यावेषेण तमाकृष्य महाबिले ।
निक्षिप्य चावटे कृत्वा मण्टपं तदुपर्यधो ॥ ८९ ॥



तस्मिन् संस्थाप्य कन्यां मां समभ्यर्च्य मुदान्विताः ।
ततः प्रभाते मां दृष्ट्वा महात्रिपुरसुन्दरीम् ॥ ९० ॥
विस्मयाम्बुनिधौ मग्ना बभूवुर्विबुधोत्तमाः ।
अहं तु तद्बिलं त्यक्त्वा युष्मदिष्टार्थसिद्धये ॥ ९१ ॥
गायत्रीमण्टपे दिव्ये निवसाम्यनिशं मुदा ।
इतः परमिदं क्षेत्रं सुस्थिरं प्रळयेपि च ॥ ९२ ॥
तस्मात्प्रळयजित्क्षेत्रनाम प्राप्स्यत्यसंशयः ।
इत्याकर्ण्य सुरास्सर्वे देव्याश्चित्रंचरित्रकम् ॥ ९३ ॥
प्रणम्य शिरसा देवीं कामाक्षीं परिपूज्य च ।
नीराजनं ततः कृत्वा महाभ्यन्तरमार्गतः ॥ ९४ ॥
अथ द्विजान्तरङ्गस्थां ध्यात्वा सिंहासनेश्वरीम् ।
षड्रसान्नैश्च भक्ष्यैश्च तोषयित्वा द्विजोत्तमान् ॥९५॥
सुगन्धैश्चन्दनैः पुष्पैस्ताम्बूलैर्वस्त्रभूषणैः ।
कृत्वा द्विगुणहर्षास्तान् सर्वं देव्यै समर्प्य च ॥९६॥
स्तोत्रजालैश्च ते सर्वे स्तुवन् सिंहासनेश्वरीम् ।
कुबेरेण यथा दत्ता देव्याः पट्टाभिषेचने ॥ ९७ ॥
शिल्पिनाप्यच देवानां शिबिका कुन्तलाख्यका ।
धाता तु मौक्तिकं छत्रं स्वर्णदण्डपरिष्कृतम् ॥९८॥
विष्णुः करण्डमकुटं नवरत्नविभूषितम् ।
ददौ शम्भुश्च पतकं सर्वरत्नोपशोभितम् ॥ ९९ ॥
अलंचक्रुस्सुरास्सर्वैस्तदा त्रिपुरसुन्दरीम् ।
ततो ब्रह्मादयो देवीभक्ताश्शाक्तास्सुरोत्तमाः ॥ १०० ॥

देवीं सायन्तने काले करण्डमकुटान्विताम् ।
श्रीचक्रपतकाढ्यां तां कुन्तळे शिबिकोत्तमे ॥१०१॥
लसन्मुक्तातपत्राढ्ये समारोप्य महोत्सवम् ।
कारयित्वा पुनः पीठे विधाय परमेश्वरीम् ॥१०२॥
ते सर्वे प्रार्थयामासुः काञ्च्यां सान्निध्यकांक्षया ।

देव्युवाच--

यथा सुधार्णवे चाहं मम श्रीपुरसत्तमे ॥ १०३ ॥
सामर्थ्यरूपा जगति शक्तिरित्यभिधानतः ।
कामाक्षीति तथात्रापि सन्तानादिवरप्रदा ॥१०४॥
निवसाम्यमरा यूयं सदा मद्दर्शने रताः ।
श्रीपुरादधिकेऽत्रैव स्थितिं कुरुत निश्चलाम् ॥१०५॥
इत्याज्ञाप्य सुरान् सर्वान् तत्रैवोवास चेश्वरी ।
ततश्शम्भुर्महादेवो नत्वा स्तुत्वा परात्पराम् ॥१०६॥
प्रीतिमाश्रित्य भक्तेभ्यो ददौ वरमनुत्तमम् ।
पराविर्भावदिवसे काञ्च्यामान्तरमार्गतः ॥१०७॥
योऽर्चयेदत्र कामाक्षीं कोटियज्ञफलं लभेत् ।
इति दत्वा वरं शम्भुर्देव्याः पीठे तिरोदधे ॥१०८॥
दूर्वाससस्वरूपेण स शिवः पुनरालयम् ।
बाह्यादागत्य शिष्यैश्च सहितस्स महामुनिः ॥१०९॥
कौशिकाख्यऋषेः पुत्रं तथा गौतमनन्दनम् ।
काश्यपस्य सुतं चैव तथात्रेस्तनुसम्भवम् ॥११०॥
भरद्वाजकुमारं च कुण्डिनीपुत्रकं तथा ।
क्रमादाकाशभूम्यन्तं ब्रह्मकल्पान्तमेव च ॥ १११ ॥



पूजार्थं तु महादेव्याः प्रतिष्ठाप्य क्रमेण तु ।
प्रवाळमेरुसंयुक्तां हेमरुद्राक्षमालिकाम् ॥ ११२ ॥
सौभाग्यकुंकुमं चैव गोपीमृच्चन्दनेपि च ।
देव्यास्तु शासनादेवं दत्वालंकारकाम्यया ॥ ११३ ॥
गोभूवस्त्रहिरण्यानि दत्वा दीक्षां यथाक्रमात् ।
कृत्वा चिन्तामणिं तन्त्रं दत्वा देव्यर्चनाविधिम् ॥११४॥
अहमद्य तु दूर्वासास्त्रेतायां रेणुकासुतः ।
धौम्योहं द्वापरयुगे कलौ मूकाह्वयः क्रमात् ॥११५॥
युगे युगे सम्भवामि कृते साहस्रयुग्मकम् ।
तस्मिन् पादविहीनेन त्रेतायां द्वापरे द्विजः ॥११६॥
पुनः पादविहीनेन कलौ पादयुगेन च ।
कृतिं करोमि कामाक्षीस्तवमित्यभिधानतः ॥११७॥
ततो ज्ञात्वा च मां यूयं दूर्वासा इति भावतः ।
मां गुरुत्वेन सम्पूज्ययात मच्छिष्यभावकम् ॥११८॥
एवमुक्त्वा सशिष्येभ्यो बिम्बाकारेण सम्बभौ ।
तस्मात्मदेवी कामाक्षी तदादिनिवसत्यहो ॥११९॥
पुरा प्रदक्षिणात्तस्या बहवो मोक्षकांक्षिणः ।
सेवयाभ्यन्तरेणैव गतास्ते मौक्तिकं पदम् ॥१२०॥

जयदेवोपाख्यानम्

तेषु कश्चित्पुरा गोदावरीतीरनिकेतनः ।
जमदग्निकुलोद्भूतः कृष्णवेदी धरासुरः ॥ १२१ ॥

जयदेव इति ख्यातः पञ्चवट्यां सदा वसन् ।
अतिदारिद्र्यदुःखार्तो यात्रार्थं कामकोष्ठकम् ॥१२२॥
समागत्य महादेव्या महाभ्यन्तरदर्शनम् ।
कृत्वा देशं पुनः प्राप्य सदनं हेमभासुरम् ॥१२३॥
धनधान्याश्वगोमत्तकलभादिविराजितम् ।
दृष्ट्वा देव्याः कटाक्षोयमिति निश्चित्य स द्विजः ॥१२४॥
सर्वसौभाग्ययोगेन भुंक्त्वा भोगाननेकशः ।
देहावसाने स ययौ श्रीदेव्याश्चरणाम्बुजम् ॥१२५॥
तस्मात्तत्र तु कामाक्षी सर्वेष्टफलदायिनी ।
गायत्रीमण्टपे देवी त्वास्ते सिंहासनेश्वरी ॥१२६॥
कोटिधर्मप्रतिष्ठायां यत्फलं लभते नरः ।
तत्फलं समवाप्नोति कामाक्षीसेवया सकृत् ॥१२७॥
एतद्रहस्यमाख्यातं श्रीकामाक्ष्याश्चरित्रकम् ।
एतदध्यायमात्रं वा यः पठेच्छृणुयादपि ॥१२८॥
कामाक्षीदर्शनात्तस्य यत्फलं तत्फलं भवेत् ॥

इति श्रीमार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासो नाम द्वादशोऽध्यायः ॥

॥ श्रीरस्तु ॥

# श्री कामाक्षीविलासः

## त्रयोदशाध्यायप्रारम्भः

स्थानत्रयस्थं देवेशं त्रिविधाकारमच्युतम् ।
प्रतिलिङ्गाग्रसंयुक्तं भूतबन्धं तमाश्रये ॥ १ ॥
इति स्तुत्वा नमस्कृत्य भूतबन्धजनार्दनम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

भूतबन्धजनार्दनप्रभावः

अथ तत्र नृपश्रेष्ठ कामकोष्ठमहाबिले ।
महात्रिपुरसुन्दर्याः पश्चिमेऽतिसमीपतः ॥ ३ ॥
अच्युतस्त्रिविधाकारो वर्तते भूतबन्धकः ।
शंखचक्रवराभीति भास्वत्पाणिचतुष्टयः ॥ ४ ॥
एवमादौ स्थिताकार उरुहस्तो वरान्वितः ।
पश्चादूर्ध्वे निषण्णश्च तदूर्ध्वे वरहस्तकः ॥ ५ ॥
भूतोपरि शयानश्च घननीलकळेबरः ।
त्रिस्थानेष्वपि लिङ्गाग्रस्वस्थानत्रयभक्तितः ॥ ६ ॥

पुरा भूतद्वयं बध्वा तदेनोमोक्षदायकः ।
तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ॥ ७ ॥

पुरा कन्यात्मिका देवी सर्वदेवहिताय च ।
बन्धकं दानवश्रेष्ठं हत्वा तं कामकोष्ठके ॥ ८ ॥

विनिक्षिप्य सुरान् दृष्ट्वा खननाय समादिशत् ।
सूचयामास पादेन तस्योचितमपि स्थलम् ॥ ९ ॥

खाते च तत्स्थले देवैरुद्भूतं देवकण्टकम् ।
तपश्चरन्तमत्युग्रं ज्वलदग्निं विचिन्त्य तम् ॥१०॥

मल्लकं नाम दैत्येन्द्रं दृष्ट्वा ते दूरतो ययुः ।
ततो देवेषु धीरात्मा वैकुण्ठो राक्षसान्तकः ॥ ११ ॥

बध्वा तं राक्षसं हत्वा तद्रक्तकणसम्भवान् ।
क्षणाद्देवाभिवृद्धांश्च शूरांस्तान् राक्षसाधमान् ॥१२॥

असंख्यातान्विलोक्यैषां हनने हरिरुद्यतः ।
तत्काले तत्सहायार्थमाविर्भूय महेश्वरः ॥ १३ ॥

तद्रक्षोरक्तपानार्थं जटामुद्धृत्य वेगतः ।
भूमौ सन्ताड्य चोत्पाद्य भूतद्वयमरुन्तुदम् ॥१४॥

पाययामास तद्रक्तं शूलपाणिर्महेश्वरः ।
तद्रक्तपानदुर्दान्तौ भूतौ सम्पीड्य तं हरम् ॥१५॥

यत्र यत्र हरिर्दैत्यान् रणे हन्ति विचक्षणः ।
तत्र तत्र पुरोगत्वा पिबतां दैत्यशोणितम् ॥ १६ ॥

शोणिताभावतो युद्धे पूर्वपीतमदाच्च तौ ।
संजातचित्तवैकल्यान्मूर्खौ दैतेयभावतः ॥ १७ ॥



युयुत्सयाऽऽगतौ भूतौ वीक्ष्य चक्रायुधो हरिः ।
शिक्षितुं भूतयुग्मं तन्निपात्य धरणीतले ॥ १८ ॥

दृढं निपीड्य पादाभ्यां तस्थावुपरि माधवः ।
भूतयुग्मं तदा विष्णुं भूमौ निक्षिप्य पीड्य च॥१९॥

अन्तरिक्षगतं चासीत्तद्दृष्ट्वा विस्मितो हरिः ।
ततस्तन्मदभङ्गं च पुनः कर्तुमनास्तदा ॥ २० ॥

आकृष्य भूतौ निक्षिप्य भूमावूरुबलं बहु ।
ध्वंसितुं च हरिस्तत्र निषसादोरुमण्डले ॥ २१ ॥

ततौ भूतद्वयं क्षिप्रं भूमौ विष्णुं निपात्य च ।
स्वर्गलोकगतं चाभूत्तच्च वीक्ष्य हरिः पुनः ॥२२॥

ततो निपात्य पादाभ्यां प्रहृत्य तदुपर्ययम् ।
शेते स्म मदनाशाय स तु विश्वंभरो हरिः ॥ २३ ॥

ततो निर्धूतदर्पं च चित्तवैकल्यहीनकम् ।
स्वभावगुणसम्पन्नं भूत्वा तद्भूतयुग्मकम् ॥ २४ ॥

दृष्ट्वा स्वदर्पहन्तारं केशवं शयनाकृतिम् ।
प्रणम्य शिरसा विष्णुमुवाच विनयेन तम् ॥ २५ ॥

भूतद्वयमुवाच--

स्वामिन्नावां त्वया येन दुष्कृतेन निपीडितौ ।
क्षमस्व चापराधं नौ दयया मुञ्च नौ प्रभो ॥२६॥

निष्कृतिं कथयस्वाद्य चावयोः करुणानिधे ।
अथ विष्णुश्चक्रपाणिर्भूतयोर्वचनं मुदा ॥ २७ ॥

निशम्य तु तयोश्च दर्पनाशाद्गुणोऽभवत् ।
इति संचिन्त्य भगवान्मोचयामास बन्धनात् ॥२८॥
मुक्तं च भूतयुग्मं तन्निरीक्ष्य हरिरब्रवीत् ।

हरिरुवाच--
दैत्यरक्तं युवां पीत्वा मदान्धौ समवाप्य च ॥२९॥
चित्तवैकल्यमत्यन्तं हस्ताभ्यां पादयुग्मतः ।
ताडयन्तौ च मां मौढ्यान्मया युद्धं समाश्रितौ॥३०॥
तस्मादहं च वां रक्तदर्पमोक्षाय सम्प्रति ।
युवां निपीडय सन्ताडयाकरवं मदनाशनम् ॥३१॥
तन्मर्दनेन युवयोरुदभूत्सुमतिर्गुणः ।
इतःपरं मदोन्मत्तौ मा भवेतां युवामिति ॥ ३२ ॥
आज्ञापितावुभौ भूतौ प्रत्यूचतुररिन्दमम् ।

भूतावूचतुः--
कराभ्यां चरणाभ्यां च ताडितोऽसि जनार्दन॥३३॥
अज्ञानेन कृतं सर्वं क्षमस्व करुणानिधे ।
तद्दोषशान्तिमद्यैव कृत्वा वां पावनौ कुरु ॥ ३४ ॥
इति प्रार्थितमाकर्ण्य दयया भगवान् हरिः ।
त्रियम्बकमुमानाथं शङ्करं नीललोहितम् ॥ ३५ ॥
पञ्चाननं चिरं ध्यात्वा प्रादुर्भूतं विलोक्य च ।
ततस्तच्छीर्षगां गङ्गामवातीतरदच्युतः ॥ ३६ ॥
तद्देशमकुटारूढा जाह्नवी लोकपावनी ।



पञ्चतीर्थप्रभावः

पञ्चधा शिववक्त्रेभ्यो जातया स्वच्छधारया ॥३७॥
निपपात तदा कामकोष्ठे सुरगणान्विते ।
ततस्तत्र स्थिता देवा विस्मयं परमं ययुः ॥ ३८ ॥
आकाशात्पतितस्वच्छगङ्गाधाराविनिर्मिते ।
महासरसि तौ भूतौ तत्पापविनिवृत्तये ॥ ३९ ॥
स्नापयित्वा स भगवान् प्रापय्य च शिवान्तिकम् ।
कारयित्वा च तत्सेवां हरं प्रार्थ्येदमब्रवीत् ॥ ४० ॥

हरिरुवाच--
देव देव महादेव त्वया कल्पित भूतयोः ॥ ४१ ॥
शैवापराध सम्भूत पापिनो मेऽपि निष्कृतिम् ।
वदेति पृष्टो गौरीशो हरिं वीक्ष्येदमब्रवीत् ॥ ४२ ॥

ईश्वर उवाच--
इदं तीर्थं पञ्चतीर्थं मम पञ्चमुखोद्भवम् ।
अस्मिन् तीर्थे तु यस्स्नायान्मुक्तो भवति पातकात्॥ ४३ ॥
स्वर्णस्तेयी वह्निभागे सुरापायी तु दक्षिणे ।
परदाररतः प्रत्यक्प्राणहा चोत्तरेपि च ॥ ४४ ॥
एतत्संसर्गभाङ्मर्त्यो भूतयोर्मध्यभागतः ।
एवं यस्स्नाति तत्तीर्थे महापापात्प्रमुच्यते ॥ ४५ ॥
सर्वदोषाश्च विलयं स्नातॄणां यान्ति तत्क्षणात् ।
सर्वकामसमृद्धिश्च भवत्येव न संशयः ॥ ४६ ॥
यथा त्वं त्रिविधाकारस्तथैवात्र त्रिधात्मकः ।
समाराध्य च मामग्रे भूतयोर्मध्यभागतः ॥ ४७॥

सर्वेषां मोक्षदानाय सन्निधिं कुरु सर्वदा ।
तेनैवाहं त्वयि प्रातो भवामि पुरुषोत्तम ॥ ४८ ॥
इति संस्थाप्य तं विष्णुं तत्र भूतं च भूतकीम् ।
तीर्थ संरक्षणार्थं च मध्ये रुद्राग्निकोणयोः ॥४९॥
संस्थाप्य स महेशोभूत्तदा लिङ्गत्रयात्मकः ।
ततो हरिः पञ्चतीर्थे स्नात्वा लिङ्गत्रयं महत् ॥५०॥
ध्यात्वा तद्भूतयोर्मध्ये प्राप्य च त्रिविधाकृतिम् ।
हरप्रियोऽथ दैत्यारिर्दृष्ट्वा देवान्मुनीनपि ॥ ५२ ॥
वर्षे वर्षे तु यः कुर्यात्प्रासादात्पतनं जले ।
दासीजातोपि विप्रत्वं याति जन्मान्तरे भुवि ॥५२॥
तद्दर्शनात्तु सर्वेषां प्रतिबन्धक पातकम् ।
भूतप्रेतपिशाचादिग्रहपीडा च नश्यतु ॥ ५३ ॥
इत्युक्त्वा भगवान्विष्णुस्तत्रैवाद्यापि वर्तते ।
विध्वस्तदैत्यप्रवरं भूतयोर्मध्यदेशगम् ॥ ५४ ॥
नत्वा स्नात्वा पञ्चतीर्थे विष्णुदत्त वरास्सुराः ।
श्वेतद्वीपे च वैकुण्ठे क्षीराब्धौ हरिसेवया ॥ ५५ ॥
यत्फलं तत्फलं प्राप्य भूतबन्धस्य दर्शनात् ।
स्वस्वस्थानं ययुस्सर्वे परिपूर्णमनोरथाः ॥ ५६ ॥
कन्यादेव्या निर्देशेन तदालयसमीपतः ।
वर्तते मोक्षदानाय भूतबन्धजनार्दनः ॥ ५७ ॥
पुरा तु भूतबन्धं तं बहवो मोक्षकांक्षिणः ।
नत्वा विमुक्तपापाश्च गतास्ते मोक्षसम्पदम् ॥५८॥



## गिरीन्द्राख्यद्विजोपाख्यानम्

तेषु कश्चित्पुरा विप्रः कृष्णातीरनिकेतनः ।
रामापुरनिवासी च गिरीन्द्र इति विश्रुतः ॥ ५९ ॥
पञ्चदारविवाहेनाप्यपुत्रः प्रतिबन्धतः ।
स कदाचित्पुत्रकामात्पञ्चनारीभिरन्वितः ॥ ६० ॥
श्रीदेवीदर्शनं कर्तुं यात्रया कामकोष्ठकम् ।
आगत्य पञ्चतीर्थे स स्नात्वा नियमतो द्विजः॥६१॥
श्रीदेवीदर्शनं कृत्वा भूतबन्धजनार्दनम् ।
नत्वा स्थित्वा क्षणं तत्र ध्यानयोगं चकार च॥६२॥
ततो दिव्यं मधु ददौ स द्विजाय सुताप्तये ।
पीत्वा मधु ततो विप्रो विमुक्तप्रतिबन्धकः ॥६३॥
नरस्वदेशं सम्प्राप्य प्राप पुत्रशतं द्विजः ।
स पश्चात्स्वशरीरान्ते देवीदूतैरसमाहृते ॥ ६४ ॥
उपविश्य विमाने स श्रीदेवी शरणं ययौ ।
तस्मान्मुक्तिप्रदो विष्णुस्तत्र त्रिविधविग्रहः ॥६५॥
भूतबन्धाभिधो विष्णुः स्थानत्रयफलप्रदः ।
तथा तत्र बिलाकाशः कामाक्षी त्रिपुराम्बिका॥६६॥
तत्कामकोष्ठे वर्तन्ते महापुण्यनिकेतने ।
यः कामकोष्ठं नेक्षेत व्यर्थात्मा नरकाश्रयः ॥६७॥
तस्माद्भूमौ देहधारी कामकोष्ठस्य दर्शनात् ।
स एव धन्यो लोकेऽस्मिन् स देवी किमुतापरे॥६८॥
तस्मादवश्यं कर्तव्यं कामकोष्ठस्य दर्शनम् ।
न चेन्नित्यं स्नानकाले श्लोकानेतान् पठेन्नरः॥६९॥

स्वामिपुष्करिणीतीर्थं पूर्वसिन्धुः पिनाकिनी ।
शिलाह्रदश्चतुर्मध्यं यावत्तुण्डीरमण्डलम् ॥ ७० ॥

मध्ये तुण्डीरभूवृत्तं कम्पावेगवतीद्वयोः ।
तयोर्मध्यं कामकोष्ठं कामाक्षी तत्र वर्तते ॥ ७१ ॥

स एव विग्रहो देव्या मूलभूतोद्रिराड्भुवः ।
नान्योस्ति विग्रहो देव्याः काञ्च्यां तन्मूलविग्रहः ॥ ७२ ॥

जगत्कामकळाकारं नाभिस्थानं भुवः परम् ।
पदपद्मस्य कामाक्ष्या महापीठमुपास्महे ॥ ७३ ॥

कामकोटिस्स्मृतस्सोयं कारणादेव चिन्नभः ।
यत्र कामकृतो धर्मो जन्तुना येन केन वा॥ ७४ ॥

सकृद्वापि सुधर्माणां फलं फलति कोटिशः ।
यो जपेत्कामकोष्ठेऽस्मिन्मन्त्रमिष्टार्थदैवतम्॥ ७५ ॥

कोटिवर्ण फलेनैव मुक्तिलोकं स गच्छति ।
यो वसेत्कामकोष्ठेऽस्मिन् क्षणार्धं वा तदर्धकम्॥७६॥

मुच्यते सर्वपापेभ्यस्साक्षाद्देवी नराकृतिः ।
गायत्रीमण्डपाधारं भूनाभिस्थानमुत्तमम् ॥ ७७ ॥

पुरुषार्थप्रदं शम्भोर्बिलाभ्रं तन्नमाम्यहम् ।
यत्कुर्यात्कामकोष्ठस्य बिलाभ्रस्य प्रदक्षिणम् ॥७८॥

पदसंख्याक्रमेणैव गोगर्भजननं लभेत् ।
विश्वकारणनेत्राढ्यां श्रीमत्त्रिपुरसुन्दरीम् ॥ ७९ ॥

बन्धकासुरसंहर्त्रीं कामाक्षीं तामहं भजे ।
पराजन्मदिने काञ्च्यां महाभ्यन्तरमार्गतः ॥ ८० ॥



योऽर्चयेत्तत्र कामाक्षीं कोटिपूजाफलं लभेत् ।
तत्फलोत्पन्नकैवल्यं सकृत्कामाक्षिसेवया ॥ ८१ ॥

त्रिस्थाननिलयं देवं त्रिविधाकारमच्युतम् ।
प्रतिलिङ्गप्रसंयुक्तं भूतबन्धं तमाश्रये ॥ ८२ ॥

य इदं प्रातरुत्थाय स्नानकाले पठेन्नरः ।
द्वादशश्लोकमात्रेण श्लोकोक्तफलमाप्नुयात् ॥ ८३ ॥

एतद्रहस्यमाख्यातं भूतबन्धप्रकाशकम् ।
यः पठेच्छृणुयान्नित्यमिममध्यायमादरात् ॥ ८४ ॥

दर्शनाद्भूतबन्धस्य यत्फलं तत्फलं लभेत् ॥

इति श्रीमार्कण्डेयपुराणे श्रीविद्याखण्डे
श्रीकामाक्षीविलासे भूतबन्धकथनं नाम त्रयोदशोऽध्यायः

॥ श्रीरस्तु ॥

# ❀ श्री कामाक्षीविलासः ❀

## चतुर्दशाध्यायप्रारम्भः

स्वर्णाङ्गीं रत्नभूषाढ्यां शुकहस्तां शुचिस्मिताम् ।
काञ्चीनिवासिनीं वन्दे कामाक्षीं कामितार्थदाम्॥१॥

इति स्तुत्वा नमस्कृत्य कामाक्षीं हेमभासुराम् ।
राजानं सुरथं दृष्ट्वा वचनं चेदमब्रवीत् ॥ २ ॥

मार्कण्डेय उवाच--

हेमकामाक्षीवर्णनम् ब्रह्मकृतबिम्बप्रविष्टहेमकामाक्षीकथारम्भश्च

अथ तत्र नृपश्रेष्ठ कामकोष्ठमहीतले ।
पूर्वे तु पञ्चतीर्थस्य हेमाङ्गी परिशोभते ॥ ३ ॥

परा फालाक्षिसम्भूता कामाक्षी स्वर्णविग्रहा ।
द्विनेत्रा द्विभुजा श्यामा दक्षहस्तलसच्छुका ॥ ४ ॥

लम्बवामकराम्भोजा त्रिभङ्गी दक्षकुञ्चिता ।
सा धनुर्विग्रहा तन्वी सर्वाभरणभूषिता ॥ ५ ॥

नवपद्मदळाकारनयनद्वयशोभिता ।
पीताम्बरधरापीता मणिकुण्डलमण्डिता ॥ ६ ॥



वराङ्कितधरा गौरी ब्रह्मणा रचिताकृतिः ।
मनोन्मनी लिङ्गशक्तिश्चूतलिङ्गस्य वल्लभा ॥ ७ ॥

ब्रह्मणा कृतबिम्बेऽसौ पुरासान्निध्यमातनोत् ।
तदहं सम्प्रवक्ष्यामि पुरावृत्तं चरित्रकम् ॥ ८ ॥

तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ।

अनङ्गस्य देवीकटाक्षाद्वपुःप्राप्तिः

पुरा पञ्चशरोऽनङ्गः प्रत्यक्षाङ्गाभिलाषया ॥ ९ ॥
कामकोष्ठं समासाद्य कामाक्षीं सम्प्रपूज्य च ।
हृदि ध्यात्वा तु तां कामस्तपस्तेपेऽतिदुष्करम्॥१०॥
ततस्तत्कामदेवस्य तपसा तुष्टमानसा ।
कदाचित्तत्र कामाक्षी महात्रिपुरसुन्दरी ॥ ११ ॥
प्रसन्नाऽथ महाशक्तिस्स्वकटाक्षनिरीक्षणात् ।
ददौ कामाय दिव्याङ्गं नृणामानन्ददायकम् ॥१२॥
अथ कामः प्रणम्याम्बां ध्यात्वा स्तुत्वा च भक्तितः।
पूर्वोत्थितेन कोपेन शंकरे कोपसंयुतः ॥ १३ ॥
ताञ्जिष्णुकाम्यया देवीमिदं वचनमब्रवीत् ।

काम उवाच--

त्वत्कटाक्षात्प्रभूतस्य शरीरस्य महेश्वरी ॥ १४ ॥
भूषणं हरजिष्णुत्वं न चेद्व्यर्थं शरीरकम् ।
तस्मादद्य महादेवं बंधयामि मदस्त्रतः ॥ १५ ॥
न करोषि यदि त्वं तु तच्छान्तिं त्रिपुरेश्वरि ।
इदानीं त्वत्कटाक्षैस्तु मच्छरीरमनश्वरम् ॥ १६ ॥

जरामरणमुक्तं च कुरु मे परदेवते ।
एतन्मे कांक्षितं नान्यदित्यनङ्गेन याचिता ॥ १७ ॥
प्रत्युवाच महाशक्तिर्मदनं मदिरानना ।

देव्युवाच –

कामकामसुधाकाम त्वच्छरीरमनश्वरम् ॥ १८ ॥
जरामरणशून्यं च भवत्वमृतभाजनम् ।
त्वद्बाणैः पीडितश्शम्भुर्यदा त्वच्चरणान्तिकम् ॥१९॥
सम्प्राप्नोति तदा शान्तिं महेशाय ददाम्यहम् ।
तावदन्तमहं तूष्णीं भवामि सुमकार्मुक ॥ २० ॥
तस्माद्गच्छ शिवस्थानमित्याज्ञप्तस्तया स्मरः ।
परिगृह्य वरं चापि प्रणम्य शिरसा शिवाम् ॥२१॥
स्वान्तके परमेशाने पूर्वोत्थित महाक्रुधा ।
जिगीषया ययौ कामः कैलासं शिवशोभितम् ॥२२॥

कामरुद्रयोर्युद्धम्

स्वशरैरग्निसदृशैरर्दयद्धरमव्ययम् ।
ततश्शिवोपि विज्ञाय कामेन प्रेरितानिति ॥ २३ ॥
नेत्रानलं त्रिशूलं च दिव्यं पाशुपतास्त्रकम् ।
मुमोच तस्मिन् तच्छूलं ध्वजाकारमभूदिदम् ॥२४॥
अस्त्रं पाशुपतं चापि पुष्पमाल्यमभूत्तदा ।
नेत्रानलोप्यभूत्तस्य ज्वलद्रत्नकिरीटवत् ॥ २५ ॥
महादेव्याः कटाक्षेण सर्वं व्यर्थमभूत्स्मरे ।
ततो दृष्ट्वा च तच्छम्भुस्स्वकृतं विपरीतकम् ॥ २६ ॥



मन्मथं सुन्दराकारं नाशहीनं सुखं गतम् ।
निरीक्ष्य त्रिपुरारातिर्भग्नो भूत्वा च तत्क्षणात् ॥२७॥
सिंहासनात्समुत्थाय प्रविश्यान्तःपुरं हरः ।
कवाटबन्धनं कुर्वन् स्त्रीणां स्थानमुपाययौ ॥२८॥
ततः काञ्चीपुराधीशा कामाक्षी कामवर्धिनी ।
स्वाश्रयाद्युद्धशीलस्य मन्मथस्य जयाय च ॥२९॥
स्वदत्तवररक्षार्थं कामाय सुशरीरिणे ।
हरगर्वापहारार्थं महात्रिपुरसुन्दरी ॥ ३० ॥
तदा सर्वेषु शैवेषु कैलासाद्यालयेषु च ।
यत्र यत्र स्थितास्सर्वागौरीस्स्वांशतया स्थिताः ॥३१॥
समाकृष्यैक्यतो देवी तूष्णीमासीच्छुभानना ।
ततो महेश्वरश्शम्भुः कैलासाद्यालयेषु च ॥ ३२ ॥
अपश्यन् स्वप्रियां गौरीं चिन्तयाऽऽक्रुष्टमानसः ।
चरन् क्षेत्राणि सर्वाणि ततः काञ्चीमुपागमत् ॥३३॥
कामपीठस्थितां देवीं गौरीत्द्रूपधारिणीम् ।
कामाक्षीं तां समालोक्य साक्षाद्गौरीं विभावयन् ॥३४॥
शान्तये कामबाणस्य तदन्तिकमुपाययौ ।
ततस्तपस्विनी गौरी महाशृङ्गारमोहिनी ॥ ३५ ॥
सात्यन्ततपसा शम्भुं समीपे समुपागतम् ।
दृष्ट्वा कोपेन सा गौरी वचनं चेदमब्रवीत् ॥ ३६ ॥

देव्युवाच--

कामाक्षीरुद्रसंवादः

कस्त्वं कामातुरः प्राप्तश्चासि त्वं शङ्करो न वा ।
किमर्थमागतोसि त्वं वद तत्कारणं हि मे।। ३७ ।।

इति गौरीवचश्श्रुत्वा मदनाग्निनिपीडितः ।
कामलीलोत्सुकश्शम्भुरिदं वचनमब्रवीत् ।। ३८ ।।

किं बभाषे महागौरी वल्लभे त्वं मनोन्मनि ।
मम स्थानानि सर्वाणि सम्परित्यज्य चण्डिके।।३९।।

किमर्थमत्र प्राप्तासि मह्यं तत्कारणं वद ।
अस्मिन् पीठे स्थिता शक्तिर्ब्रह्मविष्ण्वीशकारणम् ।।

कुत्र साद्य गता देवी तन्मे ब्रूहि मम प्रिये ।
मम सर्वहिता काममोचिनी मत्कुटुम्बिनी।। ४१ ।।

मयि किं कोपमाश्रित्य भवती किमिहागता ।
एतत्सर्वं क्रमादुक्त्वा कामशान्तिं च मे कुरु।। ४२ ।।

देव्युवाच--

नाहं गौरी महाशक्तिस्त्वद्ब्रह्महरिकारणम् ।
गौरीं तु तपसा प्राप्य तस्यै पृच्छस्व कारणम्।।४३।।

न चेत्स्मरं वा शरणं व्रज त्वं मदनातुर ।
इत्याकर्ण्य महादेवस्तां गौरीमिति चिन्तयन् ।।४४।।

मन्मथस्योपकाराय मयि द्रोहविलासिनी ।
इति निश्चित्य मनसा महाकोपानलोज्वलः ।।४५।।

बलात्कारेण तां देवीं गृहीतुमुपचक्रमे ।



कामाक्षीकटाक्षसृष्ट कामानां शम्भुसृष्टरुद्राणां च युद्धारम्भः

ततः कोपेन सा देवी स्वकटाक्षप्रसारणात् ।।४६।।
कोटिकामान् ससर्जाथ ताडनाय महेशितुः ।
ततस्समादिदेशामून् कुरुध्वं शम्भुपीडनम् ।।४७।।

इत्याज्ञप्तास्तया कामाः पीडयामासुरीश्वरम् ।
ततो महेश्वरश्शम्भुः कामबाणैश्च मुद्रितः ।। ४८ ।।

मम प्रियाऽद्य कोपेन केनेह समुपागता ।
इत्यालोच्य तु तत्सर्वं जिज्ञासुस्त्रिपुरान्तकः।। ४९ ।।

महाकोपोज्वलश्शम्भुः कामान् देव्यास्समुत्थितान्।
निहन्तुं कल्पयामास कोटिरुद्रान् हरः क्षणात्।।५०।।

ध्वस्तान् स्वजातरुद्रैस्तान् कृत्वा गौरीमिव स्वकाम् ।
बलादाकृष्य सञ्ज्ञार्थं स्वकटाक्षनिरीक्षणात् ।। ५१ ।।

संजहार हरस्तत्र कोटिरुद्रान्विचक्षणान् ।
ततः पुनर्महादेवी कटाक्षोत्थैश्च मन्मथैः ।। ५२ ।।

विजितश्च पुनश्शम्भुः कल्पयामास रुद्रकान् ।
ततो रुद्राश्च ते तत्र शूलाद्यायुधपाणयः ।। ५३ ।।

दृष्ट्वा तान्मन्मथांस्तैस्तुचक्रुर्युद्धं शिवाज्ञया ।
ततोऽतिदारुणं युद्धमुभयेषामभूत्तदा ।। ५४ ।।

कामा रुद्रान्विनिर्जित्य चक्रुस्ते विजयध्वनिम् ।
ततो रुद्रेषु भग्नेषु शिष्टाङ्ग वीक्ष्य तं हरम्।। ५५ ।।

श्मशानं स्वगृहं पद्मगृहं पद्मशरेण सः ।
घोररूपं दिव्यदेहमशोकाख्यशरेण च ।। ५६ ।।

चर्म दिव्याम्बरप्रायं सहकारशरेण च ।
सर्पराजिं पुष्पमालां मल्लिकाख्यशरेण च ॥ ५७ ॥
नेत्रानलं सुधाम्भस्त्वं नीलोत्पलशरेण च ।
एवं कृत्वा महेशस्य पञ्चबाणप्रयोगतः ॥ ५८ ॥
अथ देव्यन्तिकं नीत्वा हनौ सन्ताड्य हास्यतः ।
भिक्षापात्रं तस्य हस्ते दत्वा भिक्षां चरेति च ॥५९॥
एवं तं परिभूतं च दृष्ट्वा देवी वचोऽब्रवीत् ।

देव्युवाच--

अद्य त्वं कामविजितस्तव दर्पो वृथा वृथा ॥ ६० ॥
तस्मात्ते जितरुद्रा हि मदुत्पन्नाश्च मन्मथाः ।
तान् प्राप्य शरणं त्वं हि मद्ध्यानं कुरु सर्वदा॥६१॥
तेनैवास्मि त्वयि प्रीता तव पत्नी च जायते ।
तया त्वत्कामशान्तिश्च भविष्यति न संशयः॥६२॥
तस्मान्नाहं महागौरी पश्य त्वं मम चाकृतिम् ।
इत्युक्त्वा तत्र कामाक्षी यथारूपेण सा बभौ ॥६३॥
एकीचकार देहे स्वे तदा मन्मथमण्डलम् ।
ततो देवीं प्रणम्येशो कामकोटीं च तत्क्षणात् ॥६४॥
प्रदक्षिणीकृत्य पुनः प्रणम्य शिरसा ततः ।
पीठमोड्याणकं क्षेत्रं जगाम परमेश्वरः ॥ ६५ ॥
अथ कामो महादेव्याश्शासनादुडुरूपतः ।
व्योम्नि स्थित्वा तपोऽद्यापि करोति त्रिपुरासुतः ॥ ६६ ॥
तस्मात्तत्र ग्रहास्सर्वे ग्रहेशा भास्करादयः ।
तेषां मध्ये न गच्छन्ति प्रादक्षिण्येन यान्ति ते ॥ ६७ ॥



कदाचिदथ लोकेशः कैलासाद्यालयेषु च ।
सेवार्थं परमेशस्य समागत्यालयं तदा ॥ ६८ ॥
देवीहीनालयं दृष्ट्वा शिवस्थानेषु सर्वशः ।
किमर्थमम्बिका नास्ति सर्वशैवालयेषु च ॥ ६९ ॥
इति चिन्त्य ततो ब्रह्मा कामाक्ष्याश्चित्रमित्यपि ।
विज्ञाय ज्ञानदृष्ट्या तु कामकोष्ठमहीतले ॥ ७० ॥
कामाक्ष्यास्सन्निधिं प्राप्य ध्यात्वाराध्य महेश्वरीम् ।
सर्वालयेषु शैवेषु सर्वलोकस्थितेषु च ॥ ७१ ॥
यथा शम्भुस्तथा गौरी सदा सान्निध्यकांक्षया ।
हृदि ध्यात्वा तु कामाक्षीं द्वादशाब्दं तपोकरोत् ॥ ७२ ॥
ततः प्रसन्ना सा देवी कामाक्षी भक्तकामदा ।
तत्र ब्रह्माणमालोक्य वचनं चेदमब्रवीत् ॥ ७३ ॥

देव्युवाच--

पुरा कामेशयोर्युद्धे क्षेत्रेस्मिंस्तु चतुर्मुख ।
हरः कामेन भग्नोभूत्तस्मात्क्षेत्रमिदं विधे ॥ ७४ ॥
शिवजित्क्षेत्रमित्युक्तमिदं क्षेत्रं विना भुवि ।
सर्वालयेषु शैवेषु सन्निधत्तां सदाम्बिका ॥ ७५ ॥
शैवालयेषु लोकेषु कुरुदेव्यास्तु दर्शनम् ।

ब्रह्मोवाच--

अस्मिन् क्षेत्रे महादेवि देवीहीन शिवालयात् ॥७६॥
मन्मथेन तु किंलब्धं तन्मे ब्रूहि महेश्वरि ।

देव्युवाच--

अस्मिन् क्षेत्रे यदाशम्भुर्भवेत्कामजयी विधे ॥

तदा संशोभित गौर्या चूतलिङ्गं भविष्यति।। ७७ ।।
इत्युक्तः परया शक्त्या विधिः पप्रच्छ तां पुनः ।

ब्रह्मोवाच--

वर्षे वर्षे महेशस्य देवीहीनस्य शूलिनः ॥ ७८ ॥
विवाहं चूतनाथस्य केनोपायेन तं चरेत् ।
इत्याकर्ण्य महादेवी मुहूर्तं मौनमास्थिता ॥ ७९ ॥
अथ ब्रह्माणमालोक्य इदं वचनमब्रवीत् ।

देव्युवाच--

अस्मिन् क्षेत्रे च लोकेश सर्वशैवालयेश्वरी ॥ ८० ॥
एकाकृतिश्च सा भूत्वा एकाम्बेति च संज्ञया ।
मम फालेक्षणाद्याति चिज्ज्योतिः प्रभयाम्बिका॥ ८१ ॥
तज्ज्योतिश्चूतनाथस्य ध्यान नैष्ठिक भावतः ।
तपो लावण्यसौन्दर्याद्भवेत्तत्र क्षणेन सा ॥ ८२ ॥
तां देवीं ध्रुवतोस्थाप्य सर्वशैवालयेषु च ।
मूलविग्रहरूपेण सम्पूज्यैकाम्बिकां शिवाम् ॥ ८३ ॥
तथा द्विभुजसंयुक्तां दक्षहस्तलसच्छुकाम् ।
लम्बवामकराम्भोजां त्रिभंगीं दक्षकुञ्चिताम् ॥८४॥
तां धनुर्विग्रहांतन्वीं सर्वाभरणभूषिताम् ।
दिव्यलोहेन निर्माय तामावाह्य ध्रुवेश्वरीम् ॥ ८५ ॥
कल्याणदिवसे चूत महालिङ्गस्य सन्निधौ ।
तामानीय महागौरीं कल्याणं शिवयोर्मुदा ॥८६॥
कृत्वा परेह्नि सायाह्ने शिवयोरुत्सवं क्रमात् ।
ध्रुवालये महागौरीं शङ्करं शङ्करालये ॥ ८७ ॥



यथास्थाने निधेहित्वं ध्रुवहीनालयेम्बिका ।
दिनद्वयार्चिता चेत्सा महान् दोषः प्रजायते ॥८८॥
वेदोक्ततन्त्रमार्गेण दूर्वासश्शिष्यकैर्विधे ।
कृत्वा गौर्यभिषेकं च सहस्रकलशैस्तदा ॥ ८९ ॥
यजनं च ततः कृत्वा वर्षे वर्षे क्रमेण तु ।
उत्सवादीन् यथाशास्त्रं कारयित्वा महेशितुः॥९०॥
पश्चान्मनोरथं लब्ध्वा गच्छ त्वं निजमन्दिरम् ।
एवं स्वयम्भुवे चोक्त्वा स्वबिम्बेन्तर्दधे तदा ॥९१॥

### हेमकामाक्ष्यवतारघट्टः

सर्वालयेषु लोकेषु यथापूर्वं तथाम्बिका ।
एकाम्धिकां स्वाकृतिं तु चकार स्वांशभावनात्॥९२॥
एतस्मिन्नेव समये कल्पेश्वेतवराहके ।
मन्वन्तरे च भौच्याख्ये तामसे सप्तमे शुभे॥९३॥
युगे कृते हयग्रीवावतार समये शुभे ।
श्रीमुखाब्दे घटस्थेर्के मासि कार्तिकिकाह्वये॥ ९४ ॥
कृष्णपक्षदशम्यां तु शुक्रवार इनोदये ।
पूर्वफल्गुन्याख्यतारामध्यभागेमहाशुभे ॥ ९५ ॥
महात्रिपुरसुन्दर्याः फालनेत्रविकासतः ।
आविरासीत्परंज्योतिस्तज्ज्योतिस्तत्क्षणेन च॥९६॥
बिम्बाकृतिस्ततोभूत्वा दिव्यलावण्यशेवधिः ।
द्विभुजा श्यामलाकारा जपाक्षवलयान्विता ॥ ९७ ॥

जटामकुटभूषाढ्या द्विनेत्रा त्रिपुराम्बिका ।
चित्स्वरूपा महागौरी सुप्रसन्ना बभौ तदा॥ ९८ ॥

तामभ्यर्च्य ततो ब्रह्मा तावत्सौन्दर्य संयुताम् ।
द्विनेत्रां द्विभुजां गौरीं दक्षहस्तलसच्छुकाम् ॥९९॥

लम्बवामकराम्भोजां त्रिभङ्गीं दक्षकुञ्चिताम् ।
तां धनुर्विग्रहां तन्वीं सर्वाभरणभूषिताम् ॥१००॥

नवपद्मदळाकार नयनद्वयशोभिताम् ।
पीताम्बरधरां पीतां मणिकुण्डलमण्डिताम्॥१०१॥

सर्वशृङ्गारवेषाढ्यां त्रिभंगीं दिव्यलोहतः ।
क्षणात्कृत्वा ध्रुवस्थां तां तस्मिन्नावाह्यमोदतः ॥१०२॥

षण्मासं न्यासजालैश्च न्यस्त्वाभ्यर्च्य पितामहः ।
शिवकल्याणदिवसे महाशक्तिवचोनुगः ॥ १०३ ॥

विधिवच्च महादेव्याः कृत्वा वैवाहिकोत्सवम् ।
अथाभिषेकं निर्वर्त्य स्वकरस्थाम्बुजं विधिः ॥१०४॥

विससर्जव्योम्नि तत्र क्षणं ध्यानादिपूर्वकम् ।
ततो व्योम्नि समुत्पन्नश्चाकाश इति विश्रुतः॥१०५॥

चन्द्रांशजश्चक्रवर्ती तदाकाशात्समाययौ ।
तद्धर्मपालनार्थं तु वर्षे वर्षे क्रमेण सः ॥ १०६ ॥

अक्षय्यं धनपात्रं च पञ्चचिह्नानिपद्मभूः ।
आकाशभूमि पालाय दत्वा कृत्वानुशासनम्॥१०७।

सर्वालयेषु लोकेषु दृष्ट्वा गौरीं पितामहः ।
पुनस्स्वभवनं प्राप तदन्वधोभवद्विधिः ॥ १०८ ॥



मनः खेदान्वितं दीनमन्धीभूतं स्ववल्लभम् ।
दृष्ट्वा सरस्वतीदेवी इदं वचनमब्रवीत् ॥ १०९ ॥

अन्धकत्वविमोचनायब्रह्मणे सरस्वतीकथितोपाय घट्टः

सरस्वत्युवाच--

लोकेश करुणासिन्धो ममनाथ चतुर्मुख ।
तवान्ध्यहेतुं वक्ष्यामि श्रुणु मे प्रियवल्लभ ॥११०॥

काञ्च्यां श्रीकामकोष्ठेस्मिन् गायत्रीमण्टपादधः ।
विद्धि यावद्बिलाकाशं तदूर्ध्वे मण्टपोत्तमम् ॥१११॥

शिवेन निर्मितं पूर्वं तत्तु कुण्डलिनी गृहम् ।
तदेतन्मण्टपं गत्वा श्रीचक्रयजनं चरेत् ॥ ११२ ॥

नचेदंघ्रिस्पर्शपाप फलमान्ध्यं सविन्दति ।
अद्य त्वं मण्टपं गत्वा श्रीचक्रयजनं कुरु॥ ११३ ॥

अन्धकत्वनिवृत्तिस्ते सम्भवेन्नात्र संशयः ।

ब्रह्मोवाच--

यस्योपदेशात्कल्याणि ज्ञानमेतदभूत्तव ॥ ११४ ॥
तद्ब्रूहि प्राणशक्ते त्वं मह्यं याथार्थ्यतः प्रिये ।

सरस्वत्युवाच--

पुरा मे शम्भुना प्रोक्तो मण्टपे पापसम्भवः॥११५॥

तच्छान्तिस्तन्त्रमार्गेण रुद्रयामळके श्रुता ।
ब्रह्मन्कुरु मदुक्तिं त्वमन्धकत्वविमुक्तये ॥ ११६ ॥

एवं निशम्य लोकेशस्सरस्वत्या समन्वितः ।
कामकोष्ठं पुनः प्राप्य श्रीशक्रार्चनमातनोत् ॥११७॥
ततोन्धत्वाद्विमुक्तो दृष्ट्वा स्वर्णाम्बिकां शिवाम् ।
लोकानामुपकाराय तत्र ब्रह्मा वरं ददौ ॥ ११८ ॥
यत्पापं लभते काञ्चीबिलोर्ध्वे पादयोजनात् ।
तत्पापान्मुच्यते हेमकामाक्षीसेवया नरः ॥ ११९ ॥
नचेच्छ्रीचक्रराजं वा योर्चयेद्विधिपूर्वकम् ।
बिलोपरिपदस्पर्शजातं नास्त्यस्य पातकम् ॥१२०॥
इति दत्वा वरं ब्रह्मा सत्यलोकं समासदत् ।
तस्मात्मदेवी कामाक्षी स्वर्णाङ्गी त्रिपुराम्बिका ॥१२१॥
तत्रैव वर्ततेद्यापि कामकोष्ठमहीतले ।
पञ्च तस्याभिधानानि वक्ष्यामि श्रुणु भूपते ॥१२२॥

### कामाक्ष्यादीनां नामपञ्चकविवरणम्

स्वर्णाङ्गी शुकहस्ता च चूतलिङ्गस्य वल्लभा ।
कामाक्षी धर्मदेवीति नामपञ्चकसंयुता ॥ १२३ ॥
तस्याध्रुवात्म देव्यास्तु वर्तते नाम पञ्चकम् ।
तपस्विनी घनश्यामा सर्वशैवालयेश्वरी ॥ १२४ ॥
कामाक्षी कालिकाचेति नामपञ्चकसंयुता ।
तस्याः पूर्णांशदेव्यास्तु पञ्चाभिख्याश्श्रुणुप्रभो ॥२२५॥
त्रिपुराराजराजेशी महाकामेशवल्लभा ।
कामाक्षी कामकोटीति नामपञ्चकसंयुता ॥ १२६ ॥
तदात्मानाथशम्भोश्च नामधेयानि पञ्च हि ।
चूतज्योतिर्निर्गुणात्मा शिवकामेश्वरस्तथा ॥ १२७ ॥



श्रीमदेकाम्रनाथश्च नामपञ्चकसंयुतः ।
तस्यांशभावलिङ्गस्य वर्तते नाम पञ्चकम् ॥ १२८ ॥
रसाललिङ्ग सगुणो रुद्रकोटिस्सदाशिवः ।
एकाम्रनाथ इत्येव नामपञ्चकसंयुतः ॥ १२९ ॥
तस्यार्धभावदेवस्य शोभते नाम पञ्चकम् ।
यज्ञोद्भवः पुण्यकोटिर्महादेवश्च देवराट् ॥ १३० ॥
अभीष्टवरदश्चेति नामपञ्चकसंयुतः ।
त्रिधादेवी द्विधा शम्भुरेको विष्णुरितिक्रमात् ॥१३१॥
षड्भिन्ना तत्र कामाक्षी दिव्यलीलानुभावतः ।
निर्गुणं सगुणेध्यात्वा शक्तिभावेर्चयेच्छिवम् ॥१३२॥
तस्मात्सा शिवशक्त्यैक्यरूपिणी ललिताम्बिका ।
अपृथक्त्वेन तस्यास्तु यजनं परमं मतम् ॥१३३॥

### शिवशक्त्यैक्यपूजाविधिकथनम्

शिवशक्त्योश्च तेनैव तद्भावे सर्वदाप्रियम् ।
तद्भावेशिवशक्तिभ्यां भेदभावेन योर्चयेत् ॥१३४॥
रौरवस्तस्य नरकस्त्वभेदान्मङ्गळं भवेत् ।
तद्भावस्त्रिपुराबिम्बं कामाक्षीत्यभिविश्रुतम् ॥१३५॥
सगुणं सगुणे ध्यात्वा शिवशक्त्योश्च भावयोः ।
पूजयेदिष्टसिध्यर्थं शिवशक्त्योः प्रियावहम् ॥१३६॥
तयोश्शम्भुस्वरूपं तु प्रथमं हि समर्चयेत् ।
तत्पश्चादम्बिकादेवीं सावधानात्समर्चयेत् ॥१३७॥

गौरीभावे शंकरंच शंकरेत्वम्बिकामपि ।
योर्चयेद्रौरवस्तस्य नरको जन्मजन्मनि ॥ १३८ ॥

तत्तद्भावानुगुण्येन पूजनं मंगळप्रदम् ।
चूतलिङ्ग शम्भुरूपं विभावय नृपोत्तम ॥ १३९ ॥

पराफालाक्षसंभूतां गौरीरूपां तपस्विनीम् ।
तदुत्सवार्हां स्वर्णाङ्गीं कामाक्षीमभिभावय ॥१४०॥

निर्गुणाराधनं श्रेष्ठं सगुणेशक्तिभावके ।
सगुणाराधनं गौणं सगुणाकार भावयोः॥ १४१ ॥

एवं द्विविधपूजार्थं भक्तानां हित काम्यया ।
तत्तल्लीलानुभावेन कामाक्षी तत्रवर्तते ॥ १४२॥

तत्तद्भावोक्तविधिना तत्तद्भावान् प्रपूजयेत् ।
विष्णु योगेन विष्णुं च शिवयोगाच्छिवद्वयम् ॥ १४३ ॥

शक्तित्रयं शक्तियोगात्काञ्च्यां देवीं समर्चयेत् ।
तत्तद्भावविरोधेन नोर्चयेद्वेदवित्तमः ॥ १४४ ॥

बिम्बभेदाद्यन्त्रभेदान्मन्त्रतन्त्रप्रभेदतः ।
पूजनं चोत्सवं चैव यः कुर्यान्मङ्गळं लभेत् ॥१४५॥

पूर्णा च त्रिपुराबिम्बे गौरीबिम्बे कलात्मिका ।
आवाहिते चोत्सवार्हे निर्गुणा च रसालके ॥१४६॥

सगुणा लिङ्गरूपे च पुंरूपा विष्णुविग्रहे ।
एवं क्रमेण षट्स्थाने कामाक्ष्यास्ते हि तत्पुरे ॥ १४७ ॥

तस्याः पूर्णांशकं यत्र वर्तते तत्र भूपते ।
तत्पीठं कामराजाख्य कामकोटीति विश्रुतम् ॥१४८॥



यो न सेवेत तत्पीठं व्यर्थात्मा नरकाश्रयः ।
तस्मात्करोति यो भूमौ कामपीठस्य दर्शनम् ॥१४९॥
स एव धन्यो लोकेषु जीवन्मुक्तो न संशयः ।

### श्रीचक्रपूजाविधिः

अशक्तश्चेद्दर्शनेपि श्रीचक्रे च त्रिकोणके ॥ १५० ॥
पूर्वाग्रकोणे स्वगुरुं परमं परमेष्ठिनम् ।
परात्परगुरुं चैव विष्णुं पद्मभवं तथा ॥ १५१ ॥
वसिष्ठशक्तितत्पुत्रान् वेदव्यासशुकावपि ।
गौडपादं कौळिकं च मानवौघान् प्रपूज्य च ॥१५२॥
महाकामेश्वरीकूटं स्मृत्वा श्रीविद्ययार्चयेत् ।
अष्टोत्तरसहस्रं वा लघुसाहस्रमेव वा ॥ १५३ ॥
श्रीविद्यां वाग्भवाद्यां च जपेत्कौलिकधर्मरात् ।
तद्धर्मनिरतान्मर्त्यान् दिव्यैरन्नैश्च तोषयेत् ॥१५४॥
अशक्तश्चेत्तदा भक्तः कामाक्षीस्मरणं चरेत् ।
एवं यः कुरुते भक्त्या जन्ममध्ये कदापि वा ॥१५५॥
तस्य नास्ति पुनर्जन्म लयं याति च दुष्कृतम् ।
न चेदाब्रह्मकल्पान्तं विष्ठायां जायते कृमिः ॥१५६॥
तस्मादवश्यं कर्तव्यं श्रीविद्यायजनं नृभिः ।
तेषां फलप्रदा काञ्च्यां कामाक्षी तत्र वर्तते ॥१५७॥
तां पुरा श्रीहयग्रीवो मनुर्दशरथस्तथा ।
तुन्दः कान्तारचोळाख्यो पन्नगेन्द्रशिवस्तथा ॥१५८॥

समाराध्य तु तां देवीं तत्र शक्तिपदं गताः ।
तदहं सम्प्रवक्ष्यामि क्रमेण नृपसत्तम ॥ १५९ ॥

श्रीविद्योपास्तिसम्पन्नफल श्रीहयग्रीवादीनां प्रभावः

पुरा क्षीराब्धिमथन संजातविषदाहतः ।
श्वेतवर्णो महाविष्णुरसिताङ्गोभवत्तदा ॥ १६० ॥

तस्य वक्षःस्थिता लक्ष्मीस्ततो विष्णु प्रवीक्ष्य च ।
न मेर्हस्त्वं कृष्णवर्णः काञ्चनांग्या मम प्रभो ॥ १६१ ॥

इत्युक्तः परिहासेन पद्मया मधुसूदनः ।
ततः कोपेन महता लक्ष्मीं वीक्ष्य सुलक्षणाम् ॥ १६२ ॥

भव त्वं कृष्णवर्णा च वृद्धाचेत्यशपत्तदा ।
अथ सा पतिशापेन कामकोष्ठं प्रविश्य च ॥ १६३ ॥

पुरेवासीन्महालक्ष्मीर्देवी वीक्षावशाद्रमा ।
तां दृष्ट्वा तत्र कामाक्षी इदं वचनमब्रवीत् ॥ १६४ ॥

अत्र त्वमञ्जनच्छाया वृद्धवेषेण भासुरा ।
सदा मां च हृदि ध्यात्वा मम चोत्तरपार्श्वतः ॥ १६५ ॥

अस्यां काञ्च्यां ममाङ्के च विष्णोर्वक्षस्थले यथा ।
सन्निधत्स्व रमे नित्यं भक्ताभीष्टप्रदायिनी ॥ १६६ ॥

आपादमस्तकं यो मां दृष्ट्वा त्वां च मम प्रियाम् ।
स्पृष्ट्वा गच्छति तस्मै त्वमष्टलक्ष्मीमकण्टकाम् ॥ १६७ ॥

कुर्वित्याज्ञां ततो लब्ध्वा सा तत्राद्यापि वर्तते ।
लक्ष्मीवृत्तं मया प्रोक्तं हयग्रीवस्य तच्छृणु ॥ १६८ ॥



पुरा मुनिर्हयग्रीवः पुनर्विष्णुत्वकांक्षया ।
कामकोष्ठं समागत्य कामाक्षीं परिपूज्य च ॥ १६९ ॥

हृदि ध्यात्वा तु कामाक्षीं तपस्तेपेतिदुष्करम् ।
एतस्मिन्नेव समये राक्षसो पद्मनामकः ॥ १७० ॥

वाहनार्थं समाबध्य तं पाताळमवीविशत् ।
तं हत्वा तत्र कामाक्षी दत्वाविष्णुमुखं मुनेः ॥ १७१ ॥

पुनस्स्वस्थानमासाद्य स्वबिम्बेन्तर्दधे परा ।
ततो विष्णुस्वरूपेण हयग्रीवमहामुनिः ॥ १७२ ॥

पाताळस्थासुरान् हत्वा राक्षसानां वधाय च ।
शुक्रेण निर्मितं कुम्भमक्षयामृतपूरितम् ॥ १७३ ॥

तमाहृत्य हयग्रीवः काञ्च्यामभ्यन्तरे दिने ।
तत्राभिषिच्य कामाक्षीं सुधावृष्ट्या चतुर्भुजः ॥ १७४ ॥

तत्र देवीं समाराध्य देव्या दक्षिणतस्स्थितः ।
विष्णोर्वृत्तं मया प्रोक्तं मनुवृत्तमथो शृणु ॥ १७५ ॥

पुरा वैवस्वतो नाम मनूनामष्टमोऽभवत् ।
सूर्येण दत्तं भूभारं धृत्वा मनुजरक्षणे ॥ १७६ ॥

पुण्यपापानभिज्ञोसौ राज्यं दत्वा सुमन्त्रके ।
वसिष्ठोक्त्या चक्रवर्ती कामकोष्ठं प्रविश्य च ॥ १७७ ॥

तत्र दूर्वाससोभ्याशाद्देव्या मन्त्रवरं तथा ।
लब्ध्वा देवीं समभ्यर्च्य सच्चिदानन्दरूपिणीम् ॥ १७८ ॥

शतसंवत्सरं साग्रं देवीं ध्यात्वा तपश्चरन् ।
ततः कदाचित्कामाक्षी ब्रह्मस्त्रीरूपिणी तथा ॥ १७९ ॥

पञ्चतीर्थोदकं कुम्भे आपूर्यानीय मोदतः ।
अभिषिच्य मनुं देवी क्षणेनान्तर्दधे तदा॥ १८० ॥

ततो मनुश्चक्रवर्ती तस्या देव्याः कटाक्षतः ।
नैजवाणीसमायुक्तः कृत्वा धर्मस्मृतिं मुदा ॥१८१॥

पुनस्तद्भारतं गत्वा राज्यभारेण सम्बभौ ।
मनुवृत्तं मया प्रोक्तं श्रुणु पंक्तिरथस्य च ॥१८२॥

पुरा दशरथो राजा वसिष्ठमुनिवाक्यतः ।
अपुत्रः पुत्रलाभार्थी तीर्थयात्राक्रमादयम् ॥१८३॥

कामकोष्ठं समागत्य कामाक्षीं सम्प्रपूज्य च ।
आकाशवाणीं श्रुत्वाथ पुनर्देशं प्रविश्य च ॥१८४॥

एकसंवत्सरान्ते तु सुतं प्राप महीपते ।
दिग्रथस्य मया प्रोक्तं तुण्डीरस्य तु तच्छ्रुणु॥१८५॥

### आकाशराजतनय नामकरणदिने स्वर्णवर्षकथनम्

पूर्वमाकाशनृपतिश्चन्द्रवंशविवर्धनः ।
धर्मद्रव्यापहारेण बौद्धयुक्तस्सभूपतिः ॥ १८६ ॥

अपुत्रत्वमथ प्राप्तः पश्चाद्गोरक्षणकस्य च ।
धर्मसम्बोधनाद्राजा बुद्धान् बुद्धगुरूंस्तदा ॥१८७॥

हृत्वाथ धर्मबुध्या तु देव्या मन्त्रवरं नृप ।
लब्ध्वा गोरक्षसिद्धेन देव्यास्तन्मन्दिरादिकान्॥१८८॥

जीर्णोद्धारं ततः कृत्वा देव्यास्तु विषये सदा ।
धर्मबुध्या तु धर्मात्मा सर्वधर्मानपालयत् ॥१८९॥



श्री अरूपलक्ष्मी



श्री सन्तानगणपतिः

ततो विघ्नेश्वरो देवः पुत्ररूपेण तस्य तु ।
आविरासीद्गणाध्यक्षो महाशक्त्यनुशासनात्॥१९०॥

ततस्सन्तुष्टहृदयो राजा आकाशविश्रुतः ।
स्वपुत्रजन्मदिवसाद् द्वादशाहे नृपोत्तमः ॥ १९१ ॥

तन्नामकरणायासौ कामाख्या विधिवन्नृप ।
पूजां च विधिवद्धोमं दम्पत्योरर्चनं तदा ॥१९२॥

भोजनं सर्वविप्रेभ्यः कारयामास भूपतिः ।
भुज्यमानेषु विप्रेषु राष्ट्रवर्तिषु मोदतः ॥ १९३ ॥

अकस्मान्मध्यगे सूर्ये यावद्राजमहीतलम् ।
तावद्वृष्टिरभूद्धैम्नां मुहूर्तं विस्मिता जनाः ॥१९४॥

तदा तत्कारणं राजा श्रीवत्सादिमुनीश्वरान् ।
पप्रच्छ तेऽपि वक्तुं तत्कारणं नाशकन् तदा॥१९५॥

ततो शिशुर्मश्वगतः द्वादशाहशरीरवान् ।
आकाशनृपजस्तत्र चोरुपर्वप्रचारतः ॥ १९६ ॥

सुतल्पादवरुह्याथ भुज्यमानर्षिमण्डले ।
अन्तःपुरात्समागत्य स्थितवन्तं नृपोत्तमम् ॥१९७॥
आकाशनृपतिं वीक्ष्य इदं वचनमब्रवीत् ।

पित्रे आकाशराजाय बालोक्त हेमवृष्टिकारणम्

बालक उवाच--

वक्ष्यामि कारणं तात हेमवर्षस्य तच्छृणु॥ १९८ ॥

त्वत्सकाशन्निपतितं सुवर्णं मुद्गमात्रकम् ।
मुद्गभारेपतत्पूर्वं नापश्यन् पतितं च तत् ॥१९९॥

पाचकाश्च पचन्तिस्म मुद्गराशिं सहेमकम् ।
मेळयित्वासिताद्राक्षां मरीच्येलादिभिश्चतत्॥२००॥

मोदकीकृत्य सुघृतैः पाचयित्वान्यभक्ष्यकैः ।
परिबिष्टेसति स्वर्णमुद्गमोदकमण्डले ॥ २०१ ॥

भुज्यमानेषु विप्रेषु वनितामण्डलैस्सह ।
तत्पंक्तौ राजराजेशी त्रिपुरा परमेश्वरी ॥२०२॥

ग्राम्यस्त्रीभावतोभ्येत्य भुंजानायास्तदोदरे ।
निक्षिप्तं त्रिपुराम्बाया दिव्यं तन्मुद्गमोदकम्॥२०३॥

तत्कारणेन त्वद्राज्ये हेमवृष्टिरभून्नृप ।
सा देवी बर्तते चात्र तां देवीं पश्य भूपते ॥२०४॥

इत्युक्त्वा तं महीपालं तेनैव सह बालकः ।
समाकुंचितजानुभ्यां तत्र देव्यन्तिकं ययौ ॥२०५॥

ततो दृष्ट्वा सभूपं तं ग्राम्यस्त्रीरूपिणी तदा ।
कामाक्षी कलिदोषघ्नी तत्रैवान्तर्दधे च सा ॥२०६॥

ततस्तद्बालको देव्याबुभुजे भुक्तशेषकम् ।
भुक्तमात्रादभूद्बालस्सर्वतन्त्रविशारदः ॥ २०७ ॥

बालवत्तत्प्रसादं ते भुंक्त्वा विप्रनृपादयः ।
सरस्वतीसमा भूत्वा कवीन्द्राश्चाभवन् क्षणात्॥२०८॥

भावयन्तो गुरुत्वेन बालं देवीकटाक्षगम् ।
तद्बुध्या चाभिधां चक्रुर्गणेशं तुन्दमित्यपि ॥२०९॥



दिव्यांकितेन ते सर्वे तमाराध्य नृपात्मजम् ।
काञ्चीदेशाधिपत्वेन चक्रुः पट्टाभिषेचनम् ॥२१०॥

तदादि तुन्दनृपतिः कुर्वन् राज्यानुपालनम् ।
कृते गणेश्वराकारस्त्रेतायां देवयोनिजः ॥ २११ ॥

द्वापरे मनुजाकारस्स्वबिम्बे तेजसा कलौ ।
युगे युगे स वसति देव्यास्त्वावरणेनले ॥ २१२ ॥

तत्र मौनेन गन्तव्यं देव्यास्सन्दर्शनोत्सुकः ।
सम्भाषमाणश्चेद्द्रच्छेज्जायते तत्तपःक्षतिः ॥ २१३ ॥

तत्पापनिष्कृतिर्भूयात्सेवापुण्यप्रदानतः ।
तस्मान्मौनेन गन्तव्यं राजस्थाने नपोत्तम ॥२१४॥

## चोळराजचरित्रम्

तुन्दवृत्तं मया प्रोक्तमथ चोळस्य तच्छृणु ।
पुरा कवेरजातीरे वसन् चोरपुरे शुभे ॥ २१५ ॥

वृषवंशसमुद्भूतो वीरचोळसुतो नृपः ।
विक्रमाख्यो चोळभूपः पर्जन्याख्यसुहृद्युजा॥२१६॥

शल्याभिधकनिष्ठेन हृतराज्यस्सुदुःखितः ।
स्वभार्यासहितो राजा भिक्षुवेषसमन्वितः ॥ २१७ ॥

कामकोष्ठं ततः प्राप्य विक्रमार्कमहीपतिः ।
पुष्पारामं स्वयं कृत्वा तदुत्थैर्ग्रथितां सुमैः ॥२१८॥

दिने दिनेर्पयामास मालां करिकरोपमाम् ।
एतस्मिन्नेव काले सा कामाक्षी भक्तहृद्गता ॥२१९॥

ददौ सुपत्रिकां तस्मै दिव्यसौन्दर्यशालिनीम् ।
अथ पाण्ड्याधिपो भूपस्स्वपुत्राय तु कन्यकाम् ॥२२०॥

विवाहयितुमारेभे राज्ञश्चाह्वापयन्मुदा ।
एतस्मिन्नन्तरे स्वप्ने कामाक्षीशासनान्नृपः ॥२२१॥

ततो युधाजित्कारायां स्थाप्य पर्जन्यचोळकम् ।
कामकोष्ठं समागत्य दृष्ट्वा विक्रमनामकम् ॥२२२॥

देवीत्वेन च तं ध्यात्वा प्रणम्य शिरसा नृपः ।
कामाक्षीं तत्र सम्पूज्य राजानं विक्रमाह्वयम् ॥२२३॥

तद्देशाय प्रतिष्ठाप्य कृत्वा पट्टाभिषेचनम् ।
तस्य पुत्रीं स्वपुत्राय कृतवैवाहिकोत्सवः ॥ २२४ ॥

पुनस्स्वदेशमास्थाय स्वराज्यं धर्मवर्त्मना ।
पालयन् पाण्ड्यभूपेन्द्रो स बभौ कुलशेखरः ॥२२५॥

अथ विक्रमचोळेन्द्रस्स्वपुत्राय स्वराष्ट्रकम् ।
दत्वा पुनः कामकोष्ठं समागत्याखिलं वनम् ॥२२६॥

विदार्य देवीभक्त्या तु कान्तारच्छेदनामकः ।
यशोभिः प्रथितो भूत्वा तत्र पुष्पवनं महत् ॥२२७॥

कृत्वा च मन्दिरं देव्या गोभूमिधनभूषणान् ।
वस्त्राणि च समर्प्याथ देव्यै तद्विषये नृपः ॥२२८॥

स तत्र तपसा स्थित्वा देहान्ते मुक्तिमाप सः ।
चोळवृत्तं मया प्रोक्तमिदानीं च कलौ युगे ॥२२९॥

उरगेन्द्र हरौ देवीं सम्पूज्य विधिवच्च तौ ।
जीवन्मुक्तिपदं यातः कलौ चैव युगे युगे ॥२३०॥



तस्मादेवं महादेव्या भक्तिभाजो नरोत्तमाः ।
तत्र कैवल्यमाश्रित्य वर्तन्ते दिव्यतेजसा ॥२३१॥

गवां कोटिप्रदानैश्च दानशीलस्य यत्फलम् ।

### पुराणफलकथनघट्टः

तत्फलं लभते मर्त्यस्स्वर्णाङ्गीसेवया सकृत् ॥२३२॥

एतद्रहस्यमाख्यातं महागौरीप्रभावगम् ।
यः पठेच्छृणुयान्नित्यमिममध्यायमेववा ॥ २३३ ॥

सेवया हेमकामाक्ष्या यत्फलं तत्फलं भवेत् ।
हरिप्रसन्नसमये शिवकल्याणवासरे ॥ २३४ ॥

पराभ्यन्तरकाले च समाप्येदं पुराणकम् ।
तत्तत्काले पुराणस्य पूजनं भावकल्पनम् ॥२३५॥

तद्भावं तत्पुराणज्ञे हरिजन्मदिने हरिम् ।
कल्याणे शङ्करं चैव पराभावे परां तथा ॥२३६॥

अवसाने पुराणस्य व्यासं ध्यात्वा यथाक्रमात् ।
यथाशक्ति पुराणज्ञं वस्त्रैराभरणैर्धनैः ॥ २३७ ॥

चन्दनैः पुष्पमालाभिः धूपदीपैरुपायनैः ।
आहारफलताम्बूलैः कर्पूरैर्मङ्गळार्तिकैः ॥ २३८ ॥

एवं पुराणं विप्रेन्द्रं सम्पूज्य च सुवाहने ।
यथाविभवमारोप्य स्वस्तिवाचनपूर्वकम् ॥ २३९ ॥

निधाय तद्गृहे विप्रं यथा व्यासं तथा द्विजान् ।
पूजनैर्भोजनैर्दिव्यैस्तोषयित्वा धनादिभिः॥ २४० ॥

प्रदक्षिणनमस्कारान् कृत्वा व्यासाक्षतान् शुभान् ।
गृहीत्वा शिरसा धृत्वा गच्छेत्स भवनं ततः॥१४१॥

एवं यः कुरुते भक्त्या सर्वान्कामानवाप्नुयात् ।
इति श्रुत्वा तु सुरथो मार्कण्डेयमहामुनिम् ॥२४२॥

प्रदक्षिणत्रयं कृत्वा प्रणम्योत्थाय चास्तुवत् ।
सोपि भूपशिरस्स्पृष्ट्वा दृढमालिंग्य मोदतः ॥२४३॥

कनत्कनकदर्वीकं क्वणन्माणिक्यकङ्कणम् ।
करोतु तव कल्याणं कामाक्ष्याः करपल्लवम्॥२४४॥

निस्सपत्नमखण्डं च राज्यमायुस्सुदीर्घकम् ।
पुत्रपौत्राभिवृद्धिं च सर्वकामसमृद्धिताम् ॥ २४५ ॥

अवाप्यैहिकसाम्राज्यमन्ते देवीपदं व्रज ।
इत्याशिषं प्रयुयुजे मार्कण्डेयो महामुनिः ॥२४६॥

एवं वदन्तं तं व्यासं श्रेष्ठं सत्यवतीसुतम् ।
प्रणम्य शिरसा सूतं इदं वचनमब्रवीत् ॥ २४७ ॥

इति श्रीमार्कण्डेयपुराणे श्री कामाक्षीविलासे श्रीविद्याखण्डे
चतुर्दशोऽध्यायः ।